ગુજરાત રાજયના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# अनिवार्यसंस्कृतम्
## ( काव्यम् )

## मध्यमा २
## (ધોરણ 12)

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्य : ₹ 23.00**

**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा: गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तका: सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
प्रो. कमलेशकुमार चोक्सी

**लेखनम्**
डॉ. आलोक वाघेला
डॉ. जिगर भट्ट
डॉ. हार्दिक जोशी

**समीक्षणम्**
श्री हेमेन्द्रकुमार दवे
श्री परागकुमार जोशी
श्री नरेशकुमार जोशी
श्री जयदीपकुमार दवे
श्री राजेशकुमार ठाकर

**भाषाशुद्धि**
श्री परमात्मानंद तिवारी

**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजक: अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक : शैक्षणिक:)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लिम्बाचिया
(उपनियामक: उत्पादन)

## प्रास्ताविकम्

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो: अध्ययनाध्यापनयो: पद्धत्यो: समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमिति: (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिता: मानिता: च अभ्यासक्रमा: सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यताया: **अनिवार्यसंस्कृतम् (काव्यम्) मध्यमा २ (धो२ण 12)** इति विषयस्य नूतनाभ्यास-क्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञै: सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डल द्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भि: सूचिता: सूचना: सादरं स्वीकरणीया: एव।

पी. भारती (IAS)
नियामक: कार्यवाहकप्रमुख:
ता. 26-10-2020 गान्धीनगरम्

प्रथमावृत्ति : 2020
**प्रकाशक :** गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरप्रतिनिध्येन पी. भारती, नियामक:
**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अस्माकंराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां, तडागानां, नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसाय, मानवतावादाय, जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६ तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| | **पद्यविभागः** | |
| १ | रघुवंशम् | 1 |
| २ | किरातार्जुनीयम् | 6 |
| ३ | नैषधचरितम् | 11 |
| ४ | शिशुपालवधम् | 15 |
| ५ | मेघदूतम् | 19 |
| ६ | चम्पूरामायणम् | 23 |
| | **गद्यविभागः** | |
| ७ | दशकुमारचरितम् | 27 |
| ८ | शिवराजविजयम् | 31 |
| ९ | हर्षचरितम् | 34 |
| १० | कादम्बरी | 39 |
| | **नाट्यविभागः** | |
| ११ | अभिज्ञानशाकुन्तलम् | 45 |
| १२ | वेणीसंहारम् | 49 |
| १३ | उत्तररामचरितम् | 55 |
| १४ | मृच्छकटिकम् | 59 |
| | **रचनाविभागः** | |
| १५ | निबन्धलेखनम् | 63 |
| १६ | न्यायवाक्यानि | 77 |

# १ रघुवंशम्

**प्रस्तावना** संस्कृतसाहित्ये पञ्चमहाकाव्यानि सुप्रसिद्धानि सन्ति । तेषु प्रथमं रघुवंशमहाकाव्यम् । अस्य कर्ता महाकविः कालिदासः वर्तते । अस्यैव कवेः एकं द्वितीयमपि काव्यमस्ति, तच्च कुमारसम्भवनाम्ना प्रसिद्धमस्ति ।

महाकविः कालिदासः संस्कृतसाहित्याकाशे दिवाकर इव भ्राजते । अस्य खलु कालिदासस्य काव्यवैचक्षण्यं दृष्टिसमक्षं कृत्वा कथ्यते यत् – **'पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः । अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ॥'** अर्थात् यदा कस्यचित् वस्तुनः गणना क्रियते तदा अङ्गुलीनां प्रमाणत्वेन उपयोगः क्रियते । पुरा कवीनां गणनाप्रसङ्गे यदा अङ्गुलीनां प्रमाणत्वेनोपयोगः कृतः तदा प्रथमायां कनिष्ठिकायामङ्गुल्यां कालिदासस्य नाम स्थापितम्। तदनन्तरमन्यस्य कवेः नाम स्थापनीयमासीत् परं तादृशस्य कस्यापि कवेरभावात् कनिष्ठिकापरायाः अङ्गुल्याः नाम अनामिका संजातेति जनश्रुतिः। इयं जनश्रुतिः कालिदासस्य महिमानं प्रस्थापयति ।

अथ चायं कविः कालिदासः महाकाव्येऽस्मिन् प्रायः उपमालङ्कारं योजितवानस्ति । तेन 'उपमा कालिदासस्य ।' इत्यादि वचोभिरापि तस्य प्रसिद्धिरस्ति ।

इदं महाकाव्यं सर्गेषु विभक्तमस्ति। नातिस्वल्पाः नातिदीर्घाश्चात्र (एकोनविंशतिः) सर्गाः सन्ति। एषु सूर्यवंशीयपरम्परायां समुत्पन्नस्य रघोः वंशस्य सरसं वर्णनमस्ति । प्रारम्भे रघोः पितुः दिलीपस्य वर्णनं वर्तते। ततः रघु-अज-दशरथ-राम-कुश-अतिथि-निषध-नल-नभःशब्द-पुण्डरीक-क्षेमधन्वा-देवानीक-अहीनगु-पारियात्र-शील-उन्नाभ-वज्रनाभ-शंखण-व्युषिताश्व-विश्वसह-हिरण्यनाभ-कौसल्य-ब्रह्मनिष्ठ-पुत्र-पुष्य-ध्रुवसन्धि-सुदर्शन-अग्निमित्राणां राज्ञां चरितं वर्णितमस्ति । एषु पश्चाद्वर्तिनां केषाञ्चित् नृपाणां तु महाकविना कालिदासेन केवलं नामसङ्कीर्तनमेव कृतमस्ति।

प्रतिसर्गम् आदौ मध्ये च छन्दसः समानत्वम् अन्ते च पृथकृत्वं दृश्यते। नवमसर्गे अन्यत्र च क्वचित् क्वचित् नानावृत्तमयानि अपि पद्यानि दृष्टिपथमायान्ति । सर्गान्ते भाविसर्गकथा सङ्केतिता । महाकाव्ये कथनीयाश्च सन्ध्यासूर्येन्दुरात्रिप्रदोषादयः सर्व एव विषयाः यथास्थानं कविना वर्णिताः सन्तीति दिक् ॥

---

**कविपरिचयः**

महाकवेः कुलगुरोः कालिदासस्य विषये संस्कृतजगति अनेके प्रवादाः प्रसिद्धाः सन्ति । केषाञ्चित् मिथिलानिवासिनां मतेऽयं प्रवादः यदयं कालिदासः मिथिलायाः निवासी आसीत् । दक्षिणप्रान्तीयाः कालिदासं दाक्षिणात्यत्वेन स्वीकुर्वन्ति । बङ्गप्रदेशे कविरयं रङ्गपुरे लब्धजन्मा अस्तीति प्रवादः प्रवर्तते । केचन कथयन्ति कविरसौ विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीदुज्जैननगरीनिवासी चेति । एवमद्यापि कालिदासस्य जीवनवृत्तं विविधं रूपं धृत्वा संस्कृतविद्याजगति परिभ्रमति । अस्यां स्थितौ इदमित्थमिति वयं कथयितुं न पारयामहे इति दिक् ।

जीवनवृत्तं यथा तमोग्रस्तमस्ति तथा तस्य रचनाविषयः तमोग्रस्तः नास्ति । अत्र प्रायः मतैक्यमस्ति यदस्य महाकवेः सप्त कृतयः सन्तीति । ताश्च – ऋतुसंहारम्, मेघदूतम्, रघुवंशम्, कुमारसम्भवम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलम् चेति प्रसिद्धाः सन्ति ।

**कथासारः** कालिदासविरचितेऽस्मिन् रघुवंशाख्ये महाकाव्ये सूर्यवंशीयानां तपःपूतानां नरेशानां यशोगानपूर्वकं चरितचित्रणमस्ति।

रघोः जन्मनः पूर्वपीठिकया अस्य महाकाव्यस्य प्रारंभो भवति । अस्यां पूर्वपीठिकायां सूर्यवंशस्य आद्यपुरुषस्य मनोरुल्लेखं कृत्वा एतद्वंशीयानां चारित्र्यं संक्षेपतः सुचारु वर्णितमस्ति । ततः द्वितीय-तृतीयसर्गयोः दिलीपस्य गोचारणेन रघोः जन्मनः कथा कथिता अस्ति ।

राजा दिलीप अपुत्रः आसीत् । स वशिष्ठाश्रमं संगत्य स्वीयं पुत्रहीनतादुःखं निवेदयति । वशिष्ठः कामधेनोः शापवशादियं पुत्रहीनता वर्तते इति समादिश्य दिलीपं कामधेनोः शापनिवारणाय आश्रमस्थायाः तस्याः पुत्रीं नन्दिनीं सेवितुं सूचयति । राजा दिलीपः परमया निष्ठया नन्दिनीं सेवते । एकस्मिन् दिने आत्मबलिदानेन नन्दिनीं सिंहात् परिरक्षितुकामः सन् दिलीपः नन्दिन्याः पुत्रलाभस्य आशीर्वादं प्राप्नोति । यथाकालं दिलीपः रघोः जन्मना स्वीयात् पुत्रहीनतादुःखात् मुक्तो भवति । दिलीपसुतो रघुरयं स्वीयेन अदम्येन पराक्रमेण समस्ते भारते वर्षे दिग्विजयं करोति, स्वीयां दानशीलतां प्रदर्श्य जनान् चकितान् करोति । वरतन्तुशिष्यस्य कौत्सस्य अत्र वर्णिता दातृप्रतिगृहीत्रोरनुपमा सुप्रसिद्धा घटनास्य रघोः सविशेषं चरितमाख्याति ।

तदनन्तरं रघोः पुत्रस्याजस्य चरितः वर्णितमस्ति । अजचरितवर्णनेस्मिन् इन्दुमतीस्वयंवरः, अजेन सह इन्दुमत्याः विवाहः इन्दुमत्याः मरणं तेन च शोकमापन्नस्याजस्य सकरुणो विलापः - इति घटनात्रयम् प्राधान्यमावहति । एवमेतेषु प्रथमेषु नवसर्गेषु रामस्य चतुर्णां पूर्वजानां दिलीप-अज-रघु-दशरथानां वर्णनमस्ति ।

ततः पश्चात् दशतः पञ्चदशसर्ग-पर्यन्तं रामस्य सुप्रसिद्धं चरितं वर्णितमस्ति । ततश्चान्तिमेषु चतुर्थु सर्गेषु रामस्य वंशजानां नरेशानां संक्षेपतो वर्णनमस्ति । अन्तिमे सर्गे कामुकस्य अग्निवर्णस्य मार्मिकं चरितचित्रणमस्ति । चरितेनैतेन महाकविरस्मान् सर्वानुपदिशति यत् प्रकृतिरंजनेन राजा समृद्धिं प्राप्नोति प्रकृतिहिंसनेन राज्ञः सर्वनाशो भवतीति ।

**रघुवंशस्य मङ्गलाचरणम्**

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ 1 ॥**

**पदच्छेदः** - वागर्थाविव (1.2) इव (अ.) सम्पृक्तौ (1.2) वागर्थप्रतिपत्तये (4.1) जगतः (6.1) पितरौ (2.2) वन्दे (वन्द् आत्मनेपदम्, लट्लकारः वर्तमानकालः उत्तमपुरुषैकवचनम्) पार्वतीपरमेश्वरौ (2.2) ॥

**अन्वयः** - (अहम्) वागर्थप्रतिपत्तये वागर्थाविव सम्पृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वन्दे ॥

**पदार्थः**- अहं (कालिदासः) वाचः अर्थस्य च प्रतिपत्तये - सम्यक्ज्ञानार्थं वागर्थौ इव सम्पृक्तौ नित्यसम्बद्धौ जगतः - लोकस्य पितरौ - मातापितरौ पार्वतीपरमेश्वरौ वन्दे - अभिवादये ॥

**विशेषः - अस्मिन्** मङ्गलाचरणे महाकविः कालिदासः शिवापार्वत्यौ नत्वा रघुवंशस्य शुभारम्भं करोति । अत्रोपमालङ्कारस्य माध्यमेन सः कथयति यदहं विशिष्टशब्दार्थयोः सम्यग्ज्ञानार्थं शब्दार्थाविव नित्ययुक्तौ संसारस्य मातापितरौ शिवपार्वत्यौ भक्त्या नमस्करोमि इति । अनेन नमनकर्मणा पार्वतीपरमेश्वरौ प्रसन्नौ भूत्वा मह्यं (कालिदासाय) काव्यरचनार्थं शक्तिं दद्यास्ताम् इति सः प्रार्थयते ॥

**मङ्गलाचरणपद्यस्य टीका**

(अथ मल्लिनाथविरचिता संजीवनी टीका संक्षेपः)

(वागिति ।) वागर्थाविव इत्येकं पदम् । वागर्थाविव शब्दार्थाविव सम्पृक्तौ नित्यसम्बद्धावित्यर्थः । नित्यसम्बद्धयोरुपमानवत्वेनोपादानात् । नित्यः शब्दार्थसम्बन्धः - इति मीमांसकाः । जगतो लोकस्य पितरौ । माता च पिता च पितरौ । पिता मात्रा - इति द्वन्द्वैकशेषः । पर्वतस्यापत्यं स्त्री पार्वती। पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ । परमशब्दः सर्वोत्तमत्वद्योतनार्थः । मातुरभ्यर्हितत्वाद् अल्पाक्षरत्वाच्च पार्वतीशब्दस्य पूर्वनिपातः । वागर्थप्रतिपत्तये शब्दार्थयोः सम्यग्ज्ञानार्थं वन्दे अभिवादये । अत्रोपमालङ्कारः स्फुट एव ।।

**रघुवंशीयाः सूक्तयः**

**( क ) प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ( 1.79 )**

**विमर्शः** - पूज्यपूजाव्यतिक्रमः हि श्रेयः प्रतिबध्नाति - इति अन्वयः । पूज्यस्य मानार्हस्य पूजायाः मानस्य व्यतिक्रमः क्रमभेदः क्रमोल्लंघनम् अतिक्रमणं वा श्रेयः कल्याणं मङ्गलं वा प्रतिबध्नाति प्रतिबन्धं जनयति । अर्थात् जायमानं श्रेयः निहन्ति इत्यर्थः ।

**अयमाशयः** – मानवः यदि पूज्यजनं पूजयति, अपूज्यं च न पूजयति चेत् तस्य सर्वदा श्रेयः भवति । परन्तु अस्य उपक्रमस्य व्यतिक्रमः विरुद्धमाचरति अर्थात् पूज्यजनं न पूजयति, अपूज्यं च पूजयति, तदा तस्य श्रेयः न भवति, परन्तु श्रेयसः प्रतिबन्धो जायते । तादृशः जनः श्रेयसः लाभं प्राप्तुं न शक्नोति । अतः बुद्धिमता जनेन सर्वदा पूज्यानां पूजनम् अपूज्यानां च अपूजनं करणीयं भवतीत्युपदेशः ॥

**( ख ) आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ( 4.86 )**

**विमर्शः** – आदानं नाम ग्रहणम् । हि इति निश्चयार्थे । विसर्गः नाम परित्यागः । सताम् अर्थात् सज्जनानाम्। वारिमुच् नाम मेघः पयोदः वा । इव पदमत्र समानार्थे प्रयुक्तम् । एवमस्य वाक्यस्यायम् अर्थः– (ये खलु सज्जनाः भवन्ति, तेषाम् आदानं सर्वदा विसर्गाय अर्थात् परित्यागाय भवति, न तु स्वीयाय भोगाय । यथा खलु वारिमुचः । वारिमुचः अर्थात् मेघाः समुद्रात् जलमाददते। परमादत्तं तज्जलं ते स्वार्थाय न प्रयुञ्जन्ते, परं गृहीतं जलं ते परित्यज्य भूमौ पातयन्ति॥

**अयमाशयः** – आदानक्रियायाः ये के अपि कर्तारः सन्ति, ते प्रायः द्विप्रकारकाः भवन्ति । एके आदत्तस्य पदार्थस्य स्वार्थपूर्तये प्रयोगं कुर्वन्ति । एतादृशाः जनाः सज्जनाः साधवः न भवन्ति । अपरे आदत्तस्य पदार्थस्य स्वार्थपूर्तये प्रयोगं न कुर्वन्ति, परन्तु येन प्रकारेण प्राणिमात्रस्य सुखं भवति तेन प्रकारेण आदत्तस्य पदार्थस्य परित्यागं कुर्वन्ति । एतादृशाः ये जनाः भवन्ति ते सज्जनाः भवन्ति । अतः यदि मानवः सज्जनो भवितुमिच्छति चेत् तेन आदानक्रिया करणीया, परं आदानक्रियातः प्राप्तस्य पदार्थस्य केवलं स्वार्थपूर्तये प्रयोगः न करणीयः परन्तु प्राणिमात्रस्य बहुजनस्य वा कल्याणं यथा स्यात् तथा तस्य विसर्गः परित्यागः वा करणीयः। अस्याः सूक्तेरयमेवोपदेशः ॥

**( ग ) उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ ( 5.54 )**

**विमर्शः** – जलस्य या प्रकृतिः स्वभावो वा वर्तते, सः शैत्यमयो भवति । अर्थात् जलं स्वभावतः शीतं भवति । वयं जानीमहे यदस्य शीतगुणस्यैको विरुद्धो गुणोऽपि भवति । स च उष्णगुणः । किं शीतगुणवति जले किमुष्णगुणः संभवतीति प्रश्ने आतपस्य अग्नेः वा संयोगाज्जले उष्णगुणस्य संभावना भवतीत्युत्तरम् । अथवैवमपि विचारयितुं शक्यते यद् यदि कश्चिज्जनः शीतगुणवति जले उष्णतामाधातुमिच्छति चेत् तादृशमुष्णत्वमाधातुं शक्यते न वेति प्रश्नः । तस्योत्तरं भवति – अग्निसंयोगेनातपसंयोगेन वा स्वभावतः शीतं जलमप्युष्णं भवति । वस्तुतः जगति ये पदार्थाः सन्ति, तेषां कश्चित् स्वाभाविको गुणो भवति । स स्वाभाविकः गुणः कदाचित् अन्यस्य कस्यचिद् वस्तुनः संयोगात्परिवर्तितुं शक्यते ।

**अयमाशयः** – यस्य वस्तुनः प्राणिनः वा जन्मना सह प्रवर्तितः स्वभावः कस्यचित् वस्तुनः संयोगात् परिवर्तितुं शक्यते, परन्तु एतत्परिवर्तनं स्थायि न भवति । स्थायित्वं तु स्वीयस्य स्वभावस्यैव भवति ॥

**( घ ) भिन्नरुचिर्हि लोकः ॥ ( 6.30 )**

**विमर्शः** – लोके अर्थात् संसारे विभिन्नानां जनानां रुचिः कदापि समाना न भवति । अतः अस्य लोकस्य वैशिष्ट्यं वर्णयन् कविः कथयति यत् भिन्नरुचिर्हि लोकः इति । यदि लोके जनानां रुचिः अभिन्ना स्यात् तर्हि लोके दुर्व्यवस्था भवितुं शक्यते । तद्यथा – यदि सर्वेषां जनानां दुग्धे रुचिः स्यात् तदा दध्नः किं भवेत् । अतः इदमावश्यकं प्रतीयते यत् केषाञ्चित् दुग्धे रुचिः स्यात् केषाञ्चित् च दध्नि ।

**अयमाशयः** – लोकः नाम जनानां समूहः । एषः जनसमूहः भिन्नां भिन्नां रुचिं धरति । सर्वदा जनसमूहे अभिन्ना रुचिः द्रष्टुं न शक्यते । लोकस्य एतत् वैशिष्ट्यं ज्ञात्वा मानवेन स्वीयो व्यवहारः कर्तव्यः इति ॥

**( ङ ) विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥ ( 8.46 )**

**विमर्शः** – अस्य जगतः निर्माता संचालकश्च ईश्वरः वर्तते । यद्यपि अयमीश्वरः नियमानुसारं जगतः संचालनं करोति। तथापि केषाञ्चित् जनानामेषा अनुभूतिः भवति, यत् तस्येच्छया क्वचित् विषम् अमृतायते, क्वचिच्च अमृतं विषायते। यः खलु प्राणधारकः पदार्थः भवति, सः पदार्थः एव प्राणहारको भवति । एवमेव यः खलु प्राणहारको भवति, सः प्राणधारको भवतीति।

**अयमाशयः** – ईश्वरस्य कृपया विषमपि अमृतं भवति, अमृतमपि विषं भवति । ईश्वरेच्छया कदाचित् कण्टकः कस्यचित् जीवनस्य धारको भवति, कस्यचित् जीवनस्य च हारको भवति । पिपीलिकादंशेन कस्यचित् मरणं भवति, विषसर्पदंशेनापि कस्यचित् मरणं न भवति । एषा विचित्रा स्थितिः जनैः सर्वदा ध्यातव्या ॥

**( च ) मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः ॥ ( 8.87 )**

**विमर्शः** – ये खलु शरीरिणः सन्ति, तेषां सर्वेषां मरणं जीवनं चेति अवस्थाद्वयं प्रवर्तते । केचन एतत् अवस्थाद्वयं क्रमशः विकृतिरूपेण प्रकृतिरूपेण च जानन्ति । परं ये बुधाः सन्ति, तेषां मते तु शरीरिणां प्रकृतिः मरणमस्ति, विकृतिः च जीवनमस्तीति। वस्तुतः या प्रकृतिर्भवति, तस्याः स्थितिः चिराय भवति, या विकृतिर्भवति सा अचिराय भवतीति मत्वा अल्पकालिकं जीवनमत्र विकृतित्वेन उपदिष्टमस्ति ।

**अयमाशयः** – जगति सर्वत्र प्रकृति–विकृतिभावः प्रवर्तते । एवं हि मन्यते यत् प्रकृतितः विकृतिः जायते । अस्याः मान्यतायाः अनुरूपं विचार्यते चेत् शरीरिणां मरणात् जीवनं भवति, अतः मरणं प्रकृतिरस्ति, जीवनं च विकृतिः । प्रकृतौ प्रीतिः करणीया विकृतौ नेति नीतिरत्रोपदिष्टा ॥

**( छ ) तेजसां हि न वयः समीक्ष्यते ॥ ( 11.1 )**

**विमर्शः** – समाजे केचन जनाः तेजस्विनः भवन्ति । एतेषां तेजस्विजनानां यत् किमपि वयः भवति, तेषां वयसः आधारेण तेजसः मूल्यं न करणीयं भवति । अतः कविः कथयति यत् तेजसां वयः न समीक्ष्यते । अल्पवयस्काः अपि तेजस्विनः सन्ति चेत् तेषां तेजसः सदा आदरः करणीयः ॥

**अयमाशयः** – वयसा न कश्चित् ज्येष्ठो भवति न कश्चित् कनिष्ठो भवति । परन्तु ये खलु तेजस्विनः भवन्ति ते सदा पूज्याः भवन्ति । अतः यदि कश्चित् अल्पवयस्यः जनः तेजस्वी अस्ति, चेत् तस्य वयः दृष्ट्वा तेन सह वयोऽनुरूपः व्यवहारः न करणीयः अपितु तेजोऽनुरूपः व्यवहारः करणीयः इति ॥

## टिप्पणी

**( क ) समासपदानि** – वागर्थौ इव (इवेन सह नित्यसमासः विभक्ति – अलोपः च) । वागर्थप्रतिपत्तये (वाक् च अर्थः च इति वागर्थौ – इतरेतरद्वन्द्वः । वागर्थयोः प्रतिपत्तिः – वागर्थप्रतिपत्तिः, तस्मै वागर्थप्रतिपत्तये – षष्ठी–तत्पुरुषः) । पार्वतीपरमेश्वरौ (पार्वती च परमेश्वरः च इति, पार्वतीपरमेश्वरौ – इतरेतरद्वन्द्वः) । पितरौ (माता च पिता च इति पितरौ – एकशेष–द्वन्द्वः)॥

**( ख )** अत्र कविना उपमालङ्कारः प्रयुक्तः अस्ति ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) कालिदासः स्वीये महाकाव्ये .............. अलङ्कारं बहुत्र योजयति । (उत्प्रेक्षा, उपमा, श्लेषः)

(2) रघुवंशे ............ सर्गाः सन्ति । (विंशतिः, द्वाविंशतिः, एकोनविंशतिः)

(3) वागर्थाविव – इति पदम् ................. अस्ति । (तिडन्तम्, कृदन्तम्, समासान्तम्)

(4) मल्लिनाथस्य टीकायाः नाम ................. अस्ति । (लोचनम्, सञ्जीवनी, पञ्जिका)

(5) पूज्यपूजाव्यत्तिक्रमः ............. बध्नाति । (धनम्, वयः, श्रेयः)

(6) जगतः पितरौ .............. वर्णितौ कविना । (सम्पृक्तौ, दयावन्तौ, मङ्गलकारकौ)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) कालिदासेन कति महाकाव्यानि रचितानि ?

(2) 'वागर्थाविव' इत्यत्र कः समासः ?

(3) 'पितरौ' इत्यत्र कः समासः ?

(4) पार्वतीशब्दस्य का व्युत्पत्तिः ?

(5) लोकः कीदृशः वर्तते ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) अनामिका कथं सार्थवती बभूव ?

(2) 'वागर्थाविव' इति पद्ये मङ्गलत्वं कथं सूच्यते ?

(3) सतामादानं किमर्थं भवति ? सोदाहरणं विवृणुत ।

(4) ईश्वरेच्छया किं किं भवति ?

(5) रघुवंशस्य मङ्गलपद्ये उपमालङ्कारलक्षणं घटयत ।

**4. संक्षेपतः परिचयं कारयत ।**

(1) उपमालङ्कारः ।

(2) सूर्यवंशः ।

(3) प्रकृतिः विकृतिः च ।

(4) पूज्यपूजाव्यतिक्रमः ।

**5. सूक्तिविवेचनं कुरुत ।**

(1) भिन्नरुचिर्हि लोकः ।

(2) शैत्यं हि यत्सा प्रकृतिर्जलस्य ।

(3) तेजसां न वयः समीक्ष्यते ।

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) वागर्थौ ।

(2) पार्वती ।

(3) आदानं हि विसर्गाय ।

**छात्रप्रवृत्तिः**

रघुवंशस्य अन्यानि उपमालङ्कारोदाहरणानि यथाशक्यं कक्षे वर्णनीयानि ।

**शिक्षकप्रवृत्तिः**

सूर्यवंशीयानां केषाञ्चित् चतुर्णां नृपाणां चरितं छात्रेभ्यः कथनीयम् ॥

●

# ३ किरातार्जुनीयम्

**प्रस्तावना** – संस्कृतसाहित्ये यानि पञ्चमहाकाव्यानि सुप्रसिद्धानि सन्ति, तेषु तृतीयक्रमे किरातार्जुनीयं महाकाव्यमायाति। अस्य रचयिता महाकविः भारविः वर्तते । अस्य महाकवेरियमेकैव कृतिः समुपलभ्यते । महाकाव्यमिदम् अष्टादशसर्गेषु विभक्तमस्ति । व्यासविरचितात् महाभारतात् अस्य कथावस्तु कविना गृहीतमस्ति । महाभारते वनपर्वणि वर्णितमस्ति यत् अर्जुनः पाशुपतास्त्रप्राप्तये इन्द्रकीलनामके पर्वते तपः तपति । तपसि रतस्यार्जुनस्य परीक्षार्थं भगवान् शंकरः किरातस्य वेशं धृत्वा तत्र समागच्छति । ततः तयोः परस्परं युद्धं भवति । किरातवेशधारिणा सह युद्धस्य वृत्तान्तस्य प्राधान्यात् अस्य किरातार्जुनीयं नाम निर्धारितमस्ति । किरातश्च अर्जुनश्चेति किरातार्जुनौ, तौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम् इति च तस्य व्युत्पत्तिः ।

महाकवेः भारवेः काव्यमिदमालक्ष्य सुप्रसिद्धः टीकाकारः मल्लिनाथः कथयति–

**नेता मध्यमपाण्डवो भगवतो नारायणस्यांशज–**
**स्तस्योत्कर्षकृते नु वर्ण्यचरितो दिव्यः किरातः पुनः ।**
**शृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः**
**शैलोद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ॥**

अस्मिन् महाकाव्ये भावपक्षापेक्षया कलापक्षमेव कविः समधिकं पुष्णाति । द्यूते पराजितो युधिष्ठिरः सानुजः सभार्यः संविदानुसारेण वनवासनिमित्तं द्वैतवनं प्रविशति । तत्र स्थितः स दुर्योधनवृत्तान्तज्ञानाय कञ्चित्किरातं वर्णिरूपेण हस्तिनापुरं प्रेषयति। ज्ञातवृत्तश्च स द्वैतवनमागत्य सर्वं राज्ञे युधिष्ठाराय निवेदयति । युधिष्ठिरोऽपि तत्सर्वं भ्रातृभ्यः श्रावयति । विपक्षस्योत्कर्षमसहमाना पाञ्चाली पाण्डवान् युद्धाय प्रेरयति । पाञ्चालीवचनमनुसृत्य भीमोऽपि धैर्यमपहाय विक्रमाय सर्वान् भ्रातृन् प्रेरयति । युधिष्ठिरश्च तं सान्त्वयति । ततः व्यासस्य निर्देशानुसारं दिव्यास्त्रलाभाय अर्जुनस्तपसे हिमालयं प्रविशति। इन्द्रकीलपर्वतं गत्वा तपसि रतोऽर्जुनः विघ्नैः प्रतिहन्यमानोऽपि स्वलक्ष्यान्नैव विचलति । तं परीक्षितुं त्र्यम्बकः किरातवेषं धृत्वा तत्रायाति । अर्जुनः किरातश्चेति उभावेव समकालं मायाविनं सूकरं प्रहरतः । तस्य निधनकारणमादाय तयोः विवादः समुत्तिष्ठते। विवादः युद्धे परिणमति । ततः प्रवर्तिते युद्धे पराजितोऽप्यर्जुनः स्वप्रयासं नैव जहाति । तेन परमप्रीतः शङ्करस्तस्मै पाशुपतास्त्रं ददाति । काव्यं च समाप्तिं गच्छति ॥

---

**कविपरिचयः**

भारवेः जन्मनाम दामोदरः । एतस्य पिता नारायणस्वामी । दामोदरः चालुक्यराजस्य विष्णुवर्धनस्य मित्रम् आसीत्। कौशिकगोत्रोत्पन्नस्य भारवेः पूर्वजाः पूरा उत्तरपश्चिमभारतान्तर्गतमानन्दपुरं नाम नगरमध्यवात्सुः परतश्च ते नासिकनामकं दक्षिणभारतनगरमायाताः ।

अवन्तिसुन्दरीकथायामस्य कवेः विषये एका कथोल्लिखितास्ति । एकदा स्वसमकालिकेन राजकुमारेण विष्णुवर्धनेन समं मृगयायां घोरं काननमुपेतो भारविः मांसं सिषेवे, तत्पापापनोदनाय स तीर्थानि बभ्राम । तदीयं काव्यं श्रुत्वा काञ्चीनृपः सिंहविष्णुस्तमात्मराजधानीमानाययत् । सिंहविष्णुतनयेन राजकुमार–महेन्द्र–विक्रमेण स तत्र सानन्दमुवास । तस्य पुत्रो मनोरथनामाऽसीत् । तस्य प्रपौत्रः दण्डी बभूव ।

एवं मन्यते यदयं कविः ख्रिस्तस्य षष्ठे शतके सञ्जातः । भारविरिति नाम ऐहोलः शिलालेखे निम्नलिखितरूपेण प्राप्यते–

**येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।**
**स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥**

अयं पुलकेशिनो द्वितीयस्य 634 ई. सामयिकः शिलालेखः, अतो भारविस्तत्पूर्वतनः सम्भवति ।

कतिपये पण्डितास्तु बाणेन हर्षचरिते स्वपूर्ववर्तिकविप्रसङ्गे भारविः नैव स्मृतोऽस्तीति हेतुना तेन बाणपरवर्तिना भाव्यमित्यपि निर्दिशन्ति ।

न केवलं स्थितिकालस्यापि तु कवेरस्य देशविषयेऽपि तथैवान्धकारो विद्यते । राजशेखरानुसारेणाऽसौ विशालायां परीक्षित आसीत् किन्तु नैतावताऽस्य देशो निर्णेतुं शक्यते । अधिकांशतः पण्डिता अमुं दाक्षिणात्यं मन्यन्ते, किन्तु अस्य शरद्धिमालययोर्वर्णनं तु कविममुमौत्तरीयमेव सूचयति । अस्य हि सह्याद्रिप्रसंगमालोक्य केचित्तं महाराष्ट्रीयं मन्यन्तेऽन्ये तु तद्वाग्युक्तिमेव मन्यन्ते ।

भारवेरर्थगौरवं प्रसिद्धम् । अत एव मल्लिनाथोऽपि टीकायाः प्रारम्भे – नारिकेलफलसम्मितं वचो भारवेरित्याह। बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः । 'हितं मनोहारि च दुर्लभं वचः' 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतमभिप्रायं समर्थयन्ति । 'भारवेः अर्थगौरवम्' इत्युक्तिरपि विमर्शकलोके प्रसिद्धा। एकमेव महाकाव्यं लिखित्वा अपि भारविः स्वकवित्वेन, पाण्डित्येन, वर्णनकौशलेन च कविप्रपञ्चे विशिष्टं स्थानं प्राप्तवान् ।

**कथासार :** शिवार्जुनयोः युद्धमवलम्ब्य निर्मितं भारवेः महद्गौरवप्राप्तकं किरातार्जुनीयमिदं महाकाव्यम्। अष्टादशसर्गनिबद्धेऽत्र महाकाव्ये महाभारताधारकं सुन्दरमेकमुपाख्यानं चित्रितमस्ति ।

द्युते पराजितो युधिष्ठिरः भ्रातृभिः पत्न्या च सह द्वैतवने वसति स्म । सः दुर्योधनस्य तात्कालिकीं शासनपद्धतीं स्थितिं च ज्ञातुं वनेचरमेकं गुप्तचररूपेण हस्तिनापुरं प्रेषितवान् । तत्र गत्वासौ वर्णिलिङ्गी गुप्तचरः सर्वं यथेष्टं ज्ञात्वा प्रतिनिवृतः । ततोऽसौ वनेचरः दुर्योधनस्य शासनपद्धतिं युधिष्ठिरादीनां समक्षं निवेदयति । अस्मिन्नवसरे भीमः द्रौपदी च युधिष्ठिरं दुयोधनेन सह युद्धार्थं सोग्रं निवेदयन्ति । परं युधिष्ठिरः प्रतितामुल्लङ् ध्य युद्धाय न प्रावर्तत । अत्रान्तरे भविष्यस्य ज्ञाता महर्षिः वेदव्यासः तत्रागतः । स पाशुपतास्त्रमासादयितुम् अर्जुनं तपस्यार्थम् इन्द्रनीलं नाम पर्वतं प्रेषयामास ।

यथानिर्देशमर्जुनोऽपि इन्द्रनीलपर्वतमास्थाय तपसि मग्नः । तपस्यारतम् अर्जुनं दृष्ट्वा तस्य व्रतस्य तपसः च भङ्गाय एका सुराङ्गना किंवा देवबाला समागता, परं सा विफलप्रयासा अभवत् । तेन प्रसन्नः इन्द्रः । स स्वयं तत्र समागत्यार्जुनं प्रोत्साहयामास ।

अपरत्र अर्जुनस्य तपोबलं परीक्षितुं शिवः किरातस्य रूपं धृत्वा समागच्छति । तस्य प्रेरणया मायावी शूकरः एकः अर्जुनस्य आश्रमस्य पार्श्वे अदृश्यत । तं निमित्तीकृत्य शिवः अर्जुनश्च क्रमशः संहारकरूपेण पालकरूपेण च परस्परं युद्धं कृतवन्तौ । युद्धेऽस्मिन् गाण्डीवी अर्जुनः स्वीयाभ्यां भुजाभ्यां किरातम् आबध्ने । अर्जुनस्य पराक्रमं दृष्ट्वा संतुष्टः शिवः स्वीयं वास्तविकं रूपं प्रदर्श्य तस्मै अर्जुनाय पाशुपतास्त्रं ददौ । सैषा कथा अत्राष्टादश सर्गेषु निबद्धा महाकविना भारविना ।

**किरातार्जुनीयस्य प्रारम्भिकं पद्यम् ।**

**श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।**
**स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ 1.1॥**

**पदच्छेदः** – श्रियः (6.1) कुरूणाम् (6.3) अधिपस्य (6.1) पालनीम् (2.1) प्रजासु (7.3) वृत्तिम् (2.1) यम् (2.1) अयुङ्क्त (युज् लङ्लकारः, अन्यपुरुष एकवचनम्) वेदितुम् (अ.) सः (1.1) वर्णिलिङ्गी (1.1) विदितः (1.1) समाययौ (सम् या लिट्लकारः, अन्यपुरुषः, एकवचनम्) युधिष्ठिरम् (2.1) द्वैतवने (7.1) वनेचरः (1.1) ॥

**अन्वयः** – कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यम् (युधिष्ठिरः) अयुङ्क्त, सः वर्णिलिङ्गी विदितः वनेचरः द्वैतवने युधिष्ठिरं समाययौ ॥

**पदार्थः** कुरूणाम् – कुरूवंशीयानां कुरूवंशजानां वा, अधिपस्य – नृपस्य, श्रियः – राज्यलक्ष्मीं, पालनीम् – रक्षणीम्, प्रजासु – जनसामान्येषु, प्रवर्तिता वृत्तिं – पारस्परिकं व्यवहारं, वेदितुम् – परिज्ञातुं, यम् (युधिष्ठिरः) अयुङ्क्त – नियुक्तं कृतवान्, सः वर्णिलिङ्गी ब्रह्मचारिवेषवान् विदितः ज्ञातः वनेचरः वनं चरितुं शीलं यस्य सः, द्वैतवने – एतन्नामके वने युधिष्ठिरं पाण्डवस्य ज्येष्ठं पुत्रं समाययौ – समीपम् आगतवान् ॥

**टीका - श्रीमल्लिनाथसूरिकृता घण्टापथनामिका टीकासारः ।**

श्रिय इति । आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिर्नात्रातीवोपयुज्यते । तदुक्तम् 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा' इति । कुरूणां निवासाः कुरवो जनपदाः । तेषामधिपस्य सम्बन्धिनीम् । श्रियो राजलक्ष्म्याः । पाल्यतेऽनयेति पालनी ताम् । प्रतिष्ठापिकामित्यर्थः । प्रजारागमूलत्वात्सम्पद इति भावः । प्रजासु जनेषु विषये। वृत्तिं व्यवहारं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी । तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी । ब्रह्मचारिवेषवानित्यर्थः । स नियुक्तः वने चरतीति वनेचरः किरातः। विदितं वदनमस्यातीति विदितः । परवृत्तान्त-ज्ञानवानित्यर्थः । द्वैतवने द्वैताख्ये तपोवने । यद्वा द्वे इते गते यस्मात्तद् द्वीतम् । तच्च तद्वनञ्च तस्मिन् । शोकमोहादिवर्जित इत्यर्थः । युधि रणे स्थिरं युधिष्ठिरं धर्मराजम् समाययौ सम्प्राप्तवान्। अत्र 'वने वनेचरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकदैवावृत्त्यावृत्यनुप्रासो नामालङ्कारः। अस्मिन्सर्गे वंशस्थवृत्तम् तल्लक्षणम्- 'जतौ तु वंशस्थमुदीरितं जरौ' इति ॥ 1॥

**सूक्तयः**

**( क ) - हितं मनोहारि च दुर्लभं वचः ॥ ( 1.4 )**

यत् हितकारि मनोहारि च स्यात् तादृशमुभयगुणयुक्तं वचनं दुर्लभं भवतीति उक्तेराशयः । वस्तुतः यद्वचनं हितं करोति, तत् सर्वदा मनः न हरति । यत् खलु मनः हरति, तद्वचनं खलु सर्वदा श्रोतुः हितं न करोति । यत् खलु हितं करोति, तत् सत्यं वचनं कटु भवतीति अनुभववशात् वयं जानीम एव ॥

**( ख ) - सहसा विदधीत न क्रियाम् ॥ ( 2.30 )**

केनापि मानवेन सहसा किमपि कार्यं न करणीयम्, यतोहि सहसा कृतं कर्म प्रायः आपदां पदम् अर्थात् आपत्तिस्थानं भवतीति उक्तेराशयः । यः मत्वा अर्थात् विचार्य कर्म करोति, स एव मानवः भवति । अतः प्रत्येकं मानवेन सर्वदा सहसा कार्यं न करणीयमपितु विचार्य एव कार्यं करणीयमित्येषा नीतिज्ञानां स्वीकृता नीतिः ॥

**( ग ) - सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥ ( 1.5 )**

राज्यशासनं राज्ञः अमात्यस्य चाधीनं भवति । उभौ सम्मिल्य राज्यस्य शासनं कुरुतः । अस्यां स्थितौ यस्मिन् राज्ये उभयोः मध्ये सदा अनुकूलता भवति, तत्र राज्यशासनं सम्यक् चलति, तेन च सर्वसम्पदः तस्मिन् राज्ये रतिं कुर्वन्ति। परं यत्र नृपः आमात्यः च परस्परं सानुकूलं न व्यवहरतः तत्र समुपस्थिताः सम्पदः अपि ततः दूरे भवन्ति । अतः एतयोरुभयोः राज्यशासने आनुकूल्यं भवेदित्यपेक्षितमस्ति ॥

**( घ ) - अहो दुरन्ता बलवद्विरोधिता ॥ ( 1.23 )**

संसारे विरोधिता सर्वत्र दृश्यते । परन्तु कुत्रचित् येन सह विरोधिता भवति, स निर्बलो भवति । एतादृश्यां स्थितौ तादृशी विरोधिता चिन्तां नोद्भावयति । परन्तु यत्र खलु बलवता सह विरोधो भवति, तत्र तादृशी विरोधिता चिन्तामुद्भावयति। यतो हि निर्बलविरोधितायाः अन्तः सर्वदा सुखान्तो भवति । परं बलवद्विरोधितायाः अन्तः सर्वदा दुरन्तो भवति । अतः अस्मिन् वचने अहो इत्यव्ययपदेन कविः चिन्तामयमुद्गारं करोति ॥

**( ङ) - सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥ ( 11.11 )**

लोके अर्थात् अस्मिन् संसारे या रम्यता दृश्यते, सा रम्यता सर्वेभ्यः जनेभ्यः सर्वथा सुलभा भवति । यतो हि सा यदि नास्ति, अल्पतरा वा अस्ति चेत् अनेकैः उपायैः सरलतया प्राप्तुं शक्यते । परन्तु गुणानामर्जनं सरलतया प्राप्तुं न शक्यते । तदर्थं तु महान् प्रयत्नः करणीयो भवति । एतत् सुलभत्वं दुर्लभत्वं च मनसि कृत्वा कविनेदं वचः उच्चारितमस्ति॥

**( च ) - जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ ( 11.59 )**

यः सामान्यः जनः मानेन हीनो भवति, तस्य समाजे किमपि मूल्यं स्थानं वा न भवति । सः सर्वदा पादाघातैः सततं पीड्यते । तद्यथा भूमौ यः घासः जायते, तस्मिन् घासे सर्वे जनाः चलन्ति । घासस्योपरि पादाघातो नाम प्रशंसनीयो नास्ति। एवमत्र मानः न भवति, परम् अपमानः एव भवति । एतादृशी स्थितिः लोके मानहीनानां जनानां भवति । ये खलु बलिष्ठाः भवन्ति, ते एतादृशान् जनान् पादाघातैः पीडितान् कृत्वा व्यवहरन्ति । अतः कविरत्र मानहीनस्य जनस्य भूमौ जातस्य तृणरूपस्य घासस्य च समानां गतिं पश्यति ॥

## टिप्पणी

**समासपदानि** - वर्णिलिङ्गी-वर्णः यस्य अस्ति सः वर्णी (तद्धितान्तप्रयोगः) । वर्णिनः लिङ्गम् अस्ति अस्येति - बहु.। वनेचरः - वने चरतीति, उपपदसमासः ॥ युधिष्ठिरः - युधि तिष्ठति, उपपदसमासः ॥

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) महाकविभारवेः ................ कृतिसंख्या का । (तिस्रः, एका एव, द्वे)

(2) किरातवेशधारी ............ अस्ति । (अर्जुनः, भीमः, त्र्यम्बकः)

(3) भारवेः .............. प्रसिद्धमस्ति । (पदलालित्यम्, अर्थगौरवम्, पाण्डित्यम्)

(4) वर्णिलिङ्गी - पदस्य अर्थः ............ अस्ति । (वनेचरः, ब्रह्मचारी, गुप्तचरः)

(5) प्रजासु - इत्यस्य सप्तम्यन्तस्य पदस्य .............. अर्थः । (जनेषु विषये, जनेषु मध्ये, जनेषु अन्तः)

(6) बलवद्विरोधिता ............. वर्णिता । (सान्ता, दुरन्ता, निकटान्ता)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) भारवेः वचः कीदृक् वर्तते ?

(2) वर्णिलिङ्गी युधिष्ठिरं कुत्र समाययौ ?

(3) विदितः इति पदं केन प्रकारेण टीकायां व्याख्यातम् ?

(4) वने वनेचरः - इत्यत्र कः अलङ्कार ?

(5) सुलभं किमस्ति दुर्लभं च किम् ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) भारवेः काव्यमालक्ष्य मल्लिनाथस्य कोऽभिप्रायः ?

(2) किरातार्जुनीयस्य कथावस्तु किम् ?

(3) अर्थगौरवं नाम किम् ?

(4) वर्णिलिङ्गी शब्दे किं किं निहितमस्ति ?

(5) दुर्लभं वचः कीदृशं भवति ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) भारवेः परिवारः ।

(2) भावपक्षः कलापक्षश्च ।

(3) मानहीनस्य तृणस्य च गतिः ।

(4) सर्वसम्पदाम् रतिः ।

**5. सूक्तिविवेचन कुरुत ।**

(1) हितं मनोहारि च दुर्लभं वचः ।

(2) अहो दुरन्ता बलवद्विरोधिता ।

(3) जन्मिनो मानहीनस्य तृणस्य च समा गतिः ।

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) अर्थगौरवम् ।

(2) वाग्मिता ।

(3) वंशस्थवृत्तम् ।

**छात्रप्रवृत्तिः**

ब्रह्मचारिणः नियमाः ज्ञातव्याः ।

**शिक्षकप्रवृत्तिः**

छात्रेभ्यः पर्वतस्य वनस्य च महिमा कथनीयः ॥

●

# ४ नैषधचरितम्

**प्रस्तावना** – संस्कृतसाहित्ये महाकाव्येषु पञ्चमहाकाव्यानि प्रसिद्धानि सन्ति । तेषु पञ्चमहाकाव्येषु अन्यतमस्य नैषधीयचरितस्य प्रणेता श्रीहर्षः अस्ति । स्वीयस्य काव्यस्य विषये कविः स्वयमेवैवं कथयति –

साहित्ये सुकुमारवस्तूनि दृढन्यायग्रहग्रन्थिले, तर्के वा मम संविधातरि समं लीलायते भारती ॥

ग्रन्थस्यास्य प्रत्येकसर्गः कवेरस्य विस्तृतं प्रौढञ्च ज्ञाननिधिं सूचयति । तत्रापि विशेषतः सप्तदशसर्गं तस्य दर्शनप्रावीण्यं व्याकरणदक्षतां च प्रमाणयति । क्वचिच्चात्र प्रकरणविशेषे तत्पूर्ववर्तिनां महाकवीनां प्रभावः स्पष्टमेव दृश्यते । यथा इन्दुमतीस्वयंवरस्य दमयन्तीस्वयंवरे । तथापि कवेरस्य मौलिकीपद्धतिः न केनाऽप्यपलपितुं शक्यते । एवं हि कथ्यते यत् कालिदासस्य उपमाच्छटा भारवेरर्थगाम्भीर्यवैलक्षण्यं दण्डिनः कोमल–कमनीय–पदावली चेति त्रयो विशेषाः माघे सन्ति, किन्तु – 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इत्युक्तिः एतान् सर्वान् अतिक्रम्य महाकविममुमग्रपङ्क्तौ प्रस्थापयति।

अथ च संस्कृतसाहित्ये ये प्रख्याताः दश कवयः परिगणिताः सन्ति, तेष्वयमेकतमः महाकविः । तद्यथा–

आदौ कविः कालिदासोऽश्वघोषस्तु ततः परम् । ततः कुमारदासोऽथ भारविर्भट्टिरेव च ॥

माघो रत्नाकरः सिद्धो हरिश्चन्द्रस्तथैव च । कविराजश्च श्रीहर्षः प्रख्याताः कवयो दश ॥

अस्मिन् द्वाविंशतिः सर्गाः सन्ति । अन्ते ग्रन्थस्य समाप्तिः न निर्दिष्टा इति कारणतः इदम् असम्पूर्णं स्यात् इति संशयः उत्पद्यते। नैषधं विद्वदौषधम् इति उक्त्यनुसारं काव्यमिदं कठिनमस्ति ।

---

**कविपरिचयः**

महाकवेः हर्षस्य पितृनाम श्रीहीरपण्डितः आसीत् । तस्य मातुः नाम मामल्लदेवी । स्वपितरौ कविरसौ नैषधीयचरितस्य प्रतिसर्गस्य समाप्तिश्लोके स्मरति । तद्यथा–

**श्रीहर्ष कविराजराजिमुकुटालङ्कारहीरः सुतं**
**श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।**
**तच्चिन्तामणिमन्त्रचिन्तनफले श्रृङ्गारभङ्ग्या महा-**
**काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥**

श्रीहर्षः स्वीयस्य कालस्य प्रकृष्टपण्डितो महाकविः अस्ति । स कान्यकुब्जेश्वरस्य गहडवालवंश्यस्य गोविन्दचन्द्रप्रपौत्रस्य विजयचन्द्रपुत्रस्य जयचन्द्रस्य सभापण्डित आसीदिति तेनैव स्वयं कथितमस्ति । तद्यथा– 'ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्' इति । एवं हि श्रूयते यत् – श्रीहर्षस्य पितृचरणाः राज्ञः गोविन्दचन्द्रस्य सभापण्डिताः आसन् । ततः श्रीहर्षोऽपि पूर्व विजयचन्द्रस्य तदनु जयचन्द्रस्य च सभापण्डितः आसीत् । अस्य खलु विजयचन्द्रस्य प्रशंसायां श्रीहर्षः विजयप्रशस्तिनामकं ग्रन्थमेकं प्रणीतवान् । विजयचन्द्र एव स्वजीवनोत्तरार्धं कान्यकुब्जेऽयापयत् । तेनैव सह श्रीहर्षोऽपि वाराणसीतः कान्यकुब्जमगात्। तर्क–व्याकरण–वेदान्तादिषु शास्त्रेषु श्रीहर्षः उद्दामपण्डितः। पुराणान्यप्यसौ सम्यक् जानाति स्म । नैयायिकस्याऽपि कवेरस्य सरला तरला च वर्णनचातुरी प्रशंस्या विद्वन्मनोविनोदनक्षमा च वर्तते । अनेन खण्डनखण्डखाद्यनामा एकः मीमांसाशास्त्रीयः ग्रन्थः विरचितः। स चाद्यत्वे उपलभ्यते । अर्णवर्णनं, शिवशक्तिसिद्धिः, स्थैर्यविचारणप्रकरणम्, ईश्वराभिसन्धिः, द्विरूपकोशश्च तत्प्रणीता इतरे ग्रन्थाः सन्ति ॥

**कथासार** : द्वाविंशतिसर्गात्मके महाकाव्येऽस्मिन् निषधशासकः नलः नायको वर्तते दमयन्ती च नायिका । उभयोः सुखदुःखात्मकं चरिंतं महाकविना श्रीहर्षेण स्वीयेन कव्यकलानैपुण्येन वर्णनमय्या सरसया पद्धत्या वर्णितमस्ति ।

अस्मिन् महाकाव्ये नलदमयन्त्योः परिणयमधिकृत्य निखिलं विषयवस्तु ग्रथितमस्ति । नलो नाम राजा दमयन्त्याः स्नेहपाशेन बद्धः आसीत् । एकदा नलेन उद्याने भ्रमता हंसो गृहीतः । दयार्द्रतया नलेन च मुक्तः । स हंसः प्रत्युपकारभावनया नलस्य स्तुतिं दमयन्तीं न्यवेदयामास । अनेन दमयन्त्याः पूर्वरागः उदयं प्राप्नोति । ततस्सा दमयन्ती नलाय स्निह्यतीति ।

यथासमयं दमयन्त्याः पिता विदर्भनरेशः दमयन्त्याः परिणयार्थं स्वयंवरं रचयति । तत्र दमयन्तिकामुकाः सन्तः इन्द्र-यम-वायुकुबेराख्याः देवाः अप्यायान्ति । दमयन्ती नलाय स्निह्यतीति ज्ञात्वा ते नलस्य रूपं धृत्वा स्वयंवरे समुपस्थाताः भवन्ति । चत्वारो देवाः नलश्चेति पञ्च समरूपान् समक्षमुपस्थितान् दृष्ट्वा दमयन्ती विचित्रां दशां प्रपद्यते ।

स्वयंवर-सभावर्णनाय समुपस्थिता देवी सरस्वत्यपि श्लेषवर्णनेन दमयन्तीं व्यामोहयति । अन्ते च दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीताः देवाः स्वानि विशिष्टानि चिह्नानि प्रकटयन्ति । येन दमयन्ती नलेन परिचिता भवति, वास्तविकं नलं च वरयति । ततः जाते पाणिग्रहणे उभयोः जीवने कलिप्रवेशो भवति । तेन समागतां विविधामापदां वर्णयित्वा कविः अन्ते नलदमयन्त्योः सुखसङ्गमेन काव्यं समापयतीति दिक् ॥

**नैषधचरितस्य मङ्गलाचरणम्**

**निपीय यस्य क्षितिरक्षिणः कथाः**
**तथाद्रियन्ते न बुधाः सुधामपि ।**
**नलः सितच्छत्रितकीर्तिमण्डलः**
**स राशिरासीन्महसां महोज्ज्वलः ॥ 1॥**

**पदच्छेदः** – निपीय (अ.) यस्य (6.1) क्षितिरक्षिणः (6.1) कथाः (1.3) तथा (अ.) आद्रियन्ते (आ द्रि लट्लकारः, अन्यपुरुष) बहुवचनम्) न (अ.) बुधाः (1.3) सुधाम् (2.1) अपि (अ.) नलः (1.1) सितच्छत्रितकीर्तिमण्डलः (1.1) सः (1.1) राशिः (1.1) आसीत् (अस् लुङ्लकारः, अन्यपुरुषः, एकवचनम्) महसां (6.3) महोज्ज्वलः (1.1) ॥

**अन्वयः** – यस्य क्षितिरक्षिणः कथाः निपीय बुधाः सुधाम् अपि न तथा आद्रियन्ते, सः नलः सितच्छत्रितकीर्तिमण्डलः महोज्ज्वलः नलः महसां राशिः आसीत् ॥

**पदार्थः** यस्य – नलनामकस्य, क्षितिरक्षिणः – भूमिपालस्य कथाः – चरितानि, निपीय – पीत्वा बुधाः – विद्वांसः, पण्डिताः वा सुधाम् – अमृतम्, अपि न तथा आद्रियन्ते – सम्मानयन्ति, सः नलः सितच्छत्रितकीर्तिमण्डलः – सितेन छत्रेण कृतं कीर्तेः यशसः मण्डलं येन सः, तादृशः, महैः उत्सवैः, उज्ज्वलः दीप्यमानो, महसां तेजसां, राशिः-पुञ्जः, आसीत् – अभवत् ॥

**टीका – ( श्रीमल्लिनाथकृता जीवातुनाम्ना प्रसिद्धा टीका ( सार मात्रम् ) )**

अथ तत्रभवान् श्रीहर्षकविः – नैषधाख्यं महाकाव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिहेतोः आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् – इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् कथानायकस्य राज्ञो नलस्य इतिवृत्तरूपं मङ्गलं वस्तु निर्दिशति निपीयेति । यस्य क्षितिरक्षिणः क्ष्मापालस्य नलस्य कथाम् उपाख्यानम् । निपीय नितरामास्वाद्य बुधास्तज्ज्ञाः सुराश्च सुधामपि तथा यथेयं कथा तद्वदित्यर्थः । नाद्रियन्ते सुधामपेक्ष्य बहु मन्यन्ते इति यावत् । सितच्छत्रितं सितच्छत्रं कृतं सितातपत्रीकृतमित्यर्थः। कीर्तिमण्डलं येन सः । महसां तेजसां राशिः रविरिवेति भावः। महैः उत्सवैः उज्ज्वलः दीप्यमानो नित्यमहोत्सवशालीत्यर्थः । स नलः आसीत् । अत्र नले महसां राशिरिति कीर्तिमण्डले च सितच्छत्रत्वरूपस्यारोपात् रूपकं, कथायाश्च सुधापेक्षया उत्कर्षात् व्यतिरेकश्चेत्यनयोः संसृष्टिः । अस्मिन् सर्गे वंशस्थं वृत्तं जतौ तु वंशस्थमुदीरितं जराविति तल्लक्षणात्॥

**सूक्तय: -**

**( क ) - ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ॥ ( 2.48 )**

**विमर्श:** – साधवो निजोपयोगितां स्वोपकारित्वं फलेन कार्येण ब्रुवते बोधयन्ति, किन्तु कण्ठेन वाग्वृत्या न ब्रुवते। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास: ॥

**( ख ) - प्रतीक्षते जातु न कालमार्ति: ॥ ( 3.91 )**

**विमर्श:** - आर्ति-आधि, जातु-कदापि, काल न प्रतीक्षते - कालक्षेपं न सहते इत्यर्थ: । तीक्ष्णा शीघ्रग्राहिणी प्रतिभा प्रज्ञा गुरुपदेशमिव आर्ति: आधि: जातु कदापि कालं न प्रतीक्षते, कालक्षेपं न सहते इत्यर्थ: ॥

**( ग ) - झटिति पराशयवेदिनो हि विज्ञा: ( 4.118 )**

**विमर्श:** - ये खलु विशेषं जानन्ति ते, विज्ञा: परस्य आशयं (भावं) शीघ्रं जानन्ति, पराशयस्य वेदिन: ज्ञातर: भवन्ति इत्यर्थ:॥

**( घ ) - कर्म क: स्वकृतमत्र न भुङ्क्ते ॥ ( 5.6 )**

**विमर्श:** - यो जन: यत्कर्म कुरुते, स जन: तस्य कर्मण: फलमपि प्राप्नोति । अयं कर्मफलसिद्धान्त: । अमुं सिद्धान्तं मनसि कृत्वा कवि: कथयति यत् स्वेन कृतं शुभं वा अशुभं कर्म अत्र अस्मिन् जगति जन्मनि वा क: जन: न भुङ्क्ते अर्थात् कृतस्य कर्मण: फलं तु कर्ता सदा भुनक्ति एव ।

**( ङ ) - आर्जवं हि कुटिलेषु न नीति: ( 5.103 )**

**विमर्श:** - समाजे द्विविधा: जना: भवन्ति सरला: कुटिला: च । ये खलु सरला: जना: भवन्ति, तै: सह ऋजु: व्यवहार: अपेक्षितो भवति । परन्तु ये खलु कुटिला: जना: भवन्ति, तै: सह ऋजु: व्यवहार: यदि क्रियते चेत् व्यवहर्तु: दु:खमेव भवति । अत: कुटिलेषु जनेषु आर्जवं न करणीयम् अर्थात् ऋजुतामय: व्यवहार: न करणीय: इति नीतिं बुधा: उपदिशन्ति।

**( च ) - मितं च सारं च वचो हि वाग्मिता ॥ ( 9.8 )**

**विमर्श:** - मुखमस्तीति वक्तव्यम् इति संचित्य य: खलु निरन्तरं सारहीनं नम् अमितं च वदति, स: वाग्मी नास्ति। परन्तु य: खलु मितम् अर्थात् परिमितं सीमितं वा वदति, अथ यदपि वदति तत् सारवत् अर्थात् सारपूर्णं वच: वदति, स एव वाग्मी भवति । एतादृशी वाग्मिता प्रशंसनीया भवति ।

## टिप्पणी

**समासपदानि** - क्षितिरक्षिण: - क्षिते: रक्षिण: - ष.तत्पु. । सितच्छत्रितकीर्तिमण्डल: - सितं चाद: छत्रितम् - कर्मधारय: । कीर्ते: मण्डलम् - कीर्तिमण्डलम् - ष.तत्पु. । सितच्छत्रितं कीर्तिमण्डलं येन स: - बहु. । महोज्जय: - महै: उज्ज्वल: - तृ.तत्पु. ॥

## स्वाध्याय:

**1. अधोलिखितानां रिक्तस्थानानां पूर्ति: विधेया ।**

(1) ................ सर्गे दर्शनप्रावीण्यं प्रमाणयति कवि: श्रीहर्ष: । (सप्तदशसर्गे, नवमसर्गे, एकादशसर्गे)

(2) दमयन्ती ........... राज्यस्य पुत्री आसीत् । (विदर्भस्य, निषधस्य, मगधस्य)

(3) श्रीहर्षस्य पितुर्नाम ............. आसीत् । (विजयचन्द्र:, श्रीहीरपण्डित:, गोवर्धनदास:)

(4) टीकायां प्रदत्त: 'क्षितिरक्षिण:' पदस्य अर्थ: - .............. अस्ति । (क्ष्मापालस्य, धनपालस्य, धर्मपालस्य)

(5) ............ कालं न प्रतीक्षते ।(दया, आर्ति:, मृत्यु:)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) श्रीहर्षस्य मीमांसाशास्त्रीयः ग्रन्थः कः ?

(2) श्रीहर्षः पितरौ कस्मिन् श्लोके स्मरति ?

(3) महसाम् - पदस्य कोऽर्थः ?

(4) नैषधचरितस्य मङ्गलपद्ये किं वृत्तम् ?

(5) विज्ञाः झटिति किं विदन्ति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) नैषधचरिते किं कथावस्तु ?

(2) बुधाः सुधामपि किमर्थं नाद्रियन्ते ?

(3) मङ्गलाचरणपद्ये कः अलङ्कारः ? अलङ्कारलक्षणं घटयत।

(4) श्रीहर्षमतेन वाग्मिता का भवति ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) सुधा ।

(2) आशीर्नमस्क्रियावस्तुनिर्देशः ।

(3) कुटिलेषु का नीतिः न ।

(4) साधवः फलेन ब्रुवते ।

**5. सूक्तिविवेचनं कुरुत ।**

(1) प्रतीक्षते जातु न कालमार्तिः ।

(2) कर्म कः स्वकृतमत्र न भुङ्क्ते ।

(3) मितं च सारं च वचो हि वाग्मिता ।

**6. विवरणात्मिका टीप्पणी लेखनीया ।**

(1) नैषधं विद्वदौषधम् ।

(2) प्रख्याताः कवयो दश ।

(3) प्रथमपद्ये नलस्य विशेषणानि ।

**छात्रप्रवृत्तिः**

राज्ञः नलस्य महाभारतस्य वनपर्वगतं चरितं पठनीयम् ।

**शिक्षकप्रवृत्तिः**

अक्षक्रीडायाः दोषाः छात्रेभ्यः कथनीयाः ।

●

# ४ शिशुपालवधम्

**प्रस्तावना** – पुरातनस्य संस्कृतसाहित्ये महाकाव्यस्य क्षेत्रे युगद्वयं प्रवर्तते । तत्र एकं कालिदासकवेः अश्वघोषकवेः च। द्वितीयं भारविकवेः भट्टिकवेः, माघकवेः श्रीहर्षकवेः च । एषु भारविमाघयोः कालः प्रायः विक्रमस्य सप्तमी अष्टमी वा शताब्दी वर्तते । अस्मिन् समये संस्कृतभाषा शनैः शनैः जनसामान्यसमाजात् दूरीभूय राज्याश्रितानां पण्डितानां मध्ये स्थिता – इति ऐतिह्यविदः कथयन्ति । इदमेव कारणमस्ति यत् अस्मिन् काले विरचितेषु काव्येषु सरसता सुगमता न दृश्यते अपि तु शब्दपाण्डित्यं स्वच्छन्दतरङ्गः, दीर्घ-प्रदीर्घवर्णनानि च दृश्यन्ते ।

शिशुपालवधं नाम महाकाव्यं श्रीमता माघेन विरचितमस्ति । शिशुपालवधमपहाय अन्यः कोऽपि माघस्य ग्रन्थः नोपलभ्यते। शिशुपालवधस्य कथावस्तु महाभारतात् संगृहीतम् । अत्र महाभारताश्रिता शिशुपाल-वधात्मिका कथा वर्णिताऽस्ति। यदुनन्दनोऽत्र नेता, वीरस्तु प्रधानरसः ।

अत्र हि शिशुपालवधस्य प्रथमे सर्गे नारदागमनं श्रीकृष्णेन तदादरः, नारदेन शिशुपालवधाय प्रोत्साहनं शक्रसन्देशकथनम् चेति विषयाः सन्ति । द्वितीये कृष्णबलरामोद्धवानां गुप्तमन्त्रणा, उद्धवपरामर्शानुसारेण युधिष्ठिरस्य यज्ञे गमनाय निर्णयः, तृतीये श्रीकृष्णस्य प्रस्थानं, द्वारकासेनासमुद्रादीनां वर्णनम्, चतुर्थे रैवतकपर्वतवर्णनम्, पञ्चमे तत्र सैन्यशिविरवर्णनम्, षष्ठे षड्ऋतुवर्णनम्, सप्तमे वनविहारवर्णनम्, अष्टमे जलक्रीडावर्णनम्, नवमे सायं चन्द्रोदय-शृंगारविधानादिवर्णनम्, दशमे दानगोष्ठीरात्रिक्रीडावर्णनम्, एकादशे प्रभातवर्णनम्, द्वादशे प्रस्थानवर्णनं यमुनावर्णनञ्च, त्रयोदशे कृष्णपाण्डवसमागमः, श्रीकृष्णस्य नगरप्रवेशवर्णनं च, चतुर्दशे राजसूय-यज्ञक्रमः, श्रीकृष्णस्याग्रपूजा, भीष्मेण तस्य स्तवनञ्च, पञ्चदशे शिशुपालक्रोधः. युद्धाय सन्नद्धता च राज्ञाम्,, षोडशे दूतसंवादः सप्तदशे युद्धप्रयाणम्, अष्टादशे युद्धवर्णनम्, एकोनविंशे युद्धवर्णनं चित्रालंकारयोजना च, विंशे शिशुपालवधः इति प्रतिसर्गकथासारः।

---

**कविपरिचयः**

शिशुपालवधस्य अन्ते पञ्चसु पद्येषु माघः किञ्चिन्निवेदयति । तदनुसारेण ज्ञायते माघस्य पितामहः सुप्रभदेवः आसीत्। यः किल वर्मलातनाम्नो राज्ञः मन्त्री बभूव । माघस्य पितुः नाम दत्तकः आसीत् । माघस्य परिवारस्य विषये एतावदेव विवरणं प्राप्यते।

माघस्य स्थितिकालविषयकानि पुरातात्विकानि साहित्यिकानि प्रमाणानि चेति द्विविधानि प्रमाणानि प्राप्यन्ते । पुरातात्विकेषु प्रमाणेषु एकतममस्ति – राजस्थानस्य वसन्तपुरप्रदेशे वर्मलातराजस्य कश्चन शिलालेखः । अस्य लेखस्य समयः ख्रि. श. 625 निश्चितः । अयमेव वर्मलातः यदि माघपितामहस्य आश्रयदातेति सम्भाव्यते, तर्हि माघस्य समयः प्रायः ख्रि. श. 675-750 भवेदिति सम्भाव्यते ।

अथ च शिशुपालवधस्य द्वितीयसर्गस्थितः, 'अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना । शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥' इति श्लोकः काशिकावृत्तिं (यस्य कालः ख्रि. श. 650 निर्धारितोऽस्ति), जिनेन्द्रबुद्धिन्यासं च (यस्य कालः ख्रि. श. 700 निर्धारितोऽस्ति) प्रकारान्तरेण निर्दिशन् माघस्य पूर्वोक्तं समयं समर्थयतीव । अतः ख्रिस्तस्य सप्तमी अष्टमी शताब्दी अस्य स्थितिकालः ।

अनेन विरचितं शिशुपालवधनामकमेकमेव महाकाव्यमस्ति । अस्मिन् महाकाव्ये यत्कथावस्तु वर्तते तदेवंप्रकारकमस्ति- इन्द्रेण प्रेषितो नारदः द्वारकायां श्रीकृष्णमुपगम्य शिशुपालवधाय प्रोत्साहयति । तस्मिन्नेव समये श्रीकृष्णः युधिष्ठिरेण राजसूययागाय आहूतो भवति । कार्यद्वयाकुलो वासुदेवः उद्धवेन बलरामेण च समं संमन्त्र्य राजसूयं गच्छति तत्र शिशुपालं निहन्ति च ।

संक्षिप्तकथाश्रयेण काव्यप्रवर्तनं संस्कृतपण्डितानां महानामोदविषयः । कालिदासो हि सुविस्तृतां कथामादाय काव्यरत्नं प्रणीतवान् । एवमेव कुमारदासोऽपि । भारविस्तु तदपेक्षया स्वल्पतरां कथामाश्रित्य महाकाव्यं विरचितवान् । माघस्ततोऽपि स्वल्पतरां कथां गृहीतवान् शिशुपालवधं च रचितवान् ॥

**माघस्य शैली**

'माघे सन्ति त्रयो गुणाः' इति सुविदितमेवैतत् संस्कृतसाहित्ये । महाकविः माघः संस्कृतसाहित्योदधेः खल्वत्यन्तं भासुरं रत्नम् । अस्य हि नवाभिनव-पदविन्यास-विलासो नितराम् उदात्तशैलीम् अनुशेते । तेनैव कारणेन काव्यकलायाः उत्कर्षम् उद्घोषयति । सर्गे-सर्गे नैकविधानि पद्यानि वर्णनसौन्दर्येण, भावसौष्ठवेन विचारगाम्भीर्येण चाऽद्वितीयं भावमुपस्थापयन्ति । चरित्रचित्रण-धुरन्धराणां प्रकृतिपर्यवेक्षणविचक्षणानां गणना-प्रसङ्गे तु माघस्य तुलां न कोऽपि अधिरोहति । कविनानेन कृतं वर्णनं सर्वेषामेव पाठकानां हृदयान्यावर्जयति ।

अथ चापरमेकं वैशिष्ट्यमत्रोदाहरणरूपेण प्रस्तूयते । तद्यथा शिशुपालवधे अस्तीदमेकं पद्यम्-

**उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।**

**वहति गिरिरयं विलम्बि-घण्टाद्वयपरिवारित-वारणेन्द्रलीलाम् ।**

अस्मिन् पद्ये कविः रैवतकं पर्वतम् उभयतः सूर्येन्दु-रूपविलम्बिघण्टा-द्वय-परिवारित-वारणेन्द्रलीलाम् आवहन्तम् इवाऽऽकलयति । अनेन वर्णनेन एव माघः 'घण्टामाघः' इति नाम्ना प्रसिद्धिमुपगतः ।

माघप्रणीतकाव्येऽस्मिन् विषयाणां वैविध्यनिवेशेनेदमनुमातुं शक्यते, यदसौ कविः अनेकशास्त्रनिपुणः सङ्गीत-नाट्य-व्याकरणाऽलङ्कार-राजनीति-विशेषज्ञश्च । अत एव भारतीयैः आलोचकैः माघस्य प्रभूता प्रशंसा कृताऽस्ति । अथ च माघकाव्ये कालिदासस्योपमा, भारवेरर्थगौरवं, दण्डिनः पदलालित्यम् इत्येतेषां त्रयाणामपि गुणानामभूतपूर्वः सन्निवेशः समजनि इत्यपि आचक्षते। तथा हि-

**उपमा कालिदासस्य भारवेरर्थगौरवम् । दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥ इति ॥**

वस्तुतत्वेषु विमृश्यामानेषु विदितं भवति यत् प्रशस्तिरियं माघस्य काव्यकलां सर्वोत्कृष्टां ज्ञापयति ॥

**शिशुपालवधस्य प्रथमं पद्यम्**

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।**

**वसन् ददर्शावतरन्तमम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ 1॥**

**पदच्छेदः** - श्रियः (6.1) पतिः (1.1) श्रीमति (7.1) शासितुम् (अ.) जगत् (2.1) जगन्निवासः (1.1) वसुदेवसद्मनि (7.1) वसन् (1.1) ददर्श (दृश् परस्मै., लिट्लकारः, अन्यपुरुषः, एकवचनम्) अवतरन्तम् (2.1) अम्बरात् (5.1) हिरण्यगर्भाङ्गभुवम् (2.1) मुनिम् (2.1) हरिः (1.1) ॥

**अन्वयः** - श्रियः पतिः जगन्निवासः (तथापि) जगत् शासितुं श्रीमति वसुदेवसद्मनि वसन् हरिः अम्बरात् अवतरन्तं हिरण्यगर्भाङ्गभुवं मुनिं ददर्श ॥

**पदार्थः**- श्रियः - लक्ष्म्याः, पतिः - स्वामी भगवान् विष्णुः, जगन्निवासः - निखिलस्य जगतः निवासः, आश्रयस्थानम् (तथापि) जगत् - निखिलं संसारं, शासितुं - शासनकरणाय, श्रीमति - शोभायुक्ते, शोभामये, वसुदेवसद्मनि - वसुदेवस्य राजप्रासादे भवने वा, वसन् - निवासं कुर्वन्, हरिः - विष्णुः अम्बरात् - आकाशात्, अवतरन्तं - अधस्तात् आगच्छन्तम् हिरण्यगर्भाङ्गभुवं - हिरण्यस्य गर्भस्य अङ्गभुवम्, मुनिं-नारदं नाम मुनिं, ददर्श - दृष्टवान्, आलोकितवान् ॥

**टीका - मल्लिनाथस्य सर्वङ्कषा टीका**

शिशुपालवधस्य प्राचीनाः नवीनाः च अनेकाः टीकाः सन्ति । तेषां सङ्ख्या विंशत्यधिका । तासु मल्लिनाथस्य सर्वङ्कषानामिका टीका प्राचीनासु सुप्रसिद्धाः, नवासु च शेषराजस्य चन्द्रकला । एतासु अत्र केवलं मल्लिनाथस्य सर्वङ्कषा ससंक्षेपा प्रस्तूयते ।

**श्रिय इति ॥** श्रियो लक्ष्म्याः पतिः । अनेन रुक्मिणीरूपया श्रिया समेत इति सूचितम्। जगन्निवासो जगतामाधारभूतः कुक्षिस्थाखिलभुवन इति यावत्। तथापि जगत् लोकं शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुं श्रीमति लक्ष्मीयुक्ते वसुदेवसद्मनि वसुदेवरूपिणः कश्यपस्य वेशमनि वसन्कृष्णरूपेण तिष्ठन् हरिर्विष्णुरम्बरादवतरन्तमायान्तम्। इन्द्र-संदेशकथनार्थमिति भावः ।

हिरण्यस्य गर्भो हिरण्यगर्भो ब्रह्मा । ब्रह्माण्डप्रभवत्वात् । तस्याङ्गभुवं तनूजम् । अथवा तस्याङ्गादवयवादुत्सङ्गाख्याद्भवतीति । हिरण्यगर्भाङ्गभूस्तं मुनिम् । नारदमित्यर्थः । ददर्श । कदाचिदिति शेषः । अत्राल्पीयसि वसुदेवसद्मनि सकलजगदाश्रयतया महीयसो हरेराधेयत्वकथनादधिकप्रभेदोऽर्थालंकारः । सर्गेऽस्मिन्वंशस्थं वृत्तम्। 'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात् ॥

**सूक्तयः**

**( क ) सती च योषित् प्रकृतिश्च निश्चला पुंमासमभ्येति भवान्तरेष्वपि ॥ ( 1.72 )**

**अन्वयः** – निश्चला प्रकृतिः सती योषित् च भवान्तरेषु अपि पुमांसम् अभ्येति ।

**विमर्शः** – यथा सती – पतिव्रता स्त्री जन्मान्तरेषु अपि तमेव भर्तारं – पतिं प्राप्नोति, तथैव नरस्य मूलभूतः स्वभावः वा जन्मजन्मान्तरेषु अपि तथैव तिष्ठति । अर्थात् मानवः यावन्त्यपि जन्मानि प्राप्नुयात् चेदपि तस्य मूलस्वभावः परिवर्तितो न भवतीति भावः ॥

**( ख ) सर्वः स्वार्थं समीहते ॥ ( 2.65 )**

**अन्वयः** – सर्वः स्वार्थं समीहते ।

**विमर्शः** – सर्वः – निखिलः जनः – मनुष्यः स्वार्थस्य अर्थात् स्वकीयस्य लाभस्य प्रयोजनस्य वा विचारं करोति । परार्थं परस्य लाभस्य प्रयोजनस्य वा विचारं न करोति । बसयाने प्रवेशार्थं सर्वः जनः प्रतीक्षारतो भवति । तत्र येन केन प्रकारेण मम प्रवेशः भवेत् सुखदं स्थानम् अहम् प्राप्नुयाम् इत्येव स इच्छति । एवमेव सर्वत्र सर्वः जनः स्वकीयं स्वार्थमेव काङ्क्षतीति भावः ॥

**( ग ) अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ ( 2.94 )**

**अन्वयः** – अयथाबलम् अर्थात् अपर्याप्तेन बलेन कृतः कस्यचित् कर्मणः प्रारम्भः सम्पत्तेः विनाशकारकः भवति । अतः यत् कर्म क्रियते तदर्थं मानवेन यथाबलं भाव्यम् । यथोचितं बलं संगृह्य तदनन्तरमेव कस्यचित् कार्यस्य प्रारंभः क्रियते चेत् तस्य कर्मणः फलं प्राप्तुं शक्यते, तेन फलेन च या पूर्वतो वर्तमाना या सम्पद् वर्तते तस्य वृद्धिर्भवति न तु क्षयः । अतः प्रत्येकं जनेन कार्यारम्भणात् पूर्वम् आवश्यकस्य बलस्य संग्रहः करणीय एवेति भावः ॥

**( घ ) क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ( 4.17 )**

**अन्वयः** – यत् (वस्तु) क्षणे क्षणे नवताम् उपैति, तत् एव रमणीयतायाः रूपम् (अस्ति) ।

**विमर्शः** – का नाम रमणीयता इति प्रश्ने इयमुक्तिः उत्तरम् । यद्वस्तु प्रतिक्षणं नावीन्यं भजते तदेव वस्तु रमणीयम् भवति । प्रतिदिनं सूर्योदयः भवति । परं यः खलु सूर्योदयस्य दर्शनं करोति सः प्रतिदिनं सूर्योदयस्य नवीनां नवीनाम् अनुभूतिं करोति । अर्थात् स एव सूर्यः प्रातःकाले पुनः पुनः उदयं गच्छन् तद्दर्शकानां कृते नवीनमिव प्रतीयते । एतदेवास्य सूर्यस्य रमणीयत्वमस्ति । एवमेव प्रतिदिनं क्रियमाणा प्रभोः भक्तिरपि भक्ताय नवीनं रूपं धृत्वा समक्षमायाति । अतः भक्तिरपि रमणीया वर्तते । अस्यायं भावः यत्-यद् यद् वस्तु क्षणे क्षणे नवं नवं रूपं धर्तुं समर्थं भवति, तत् तद् वस्तु रमणीयं भवितुमर्हति । अनेनैव प्रकारेण यदि मानवः अपि रमणीयो भवितुमर्हति तदा तेनापि क्षणे क्षणे नवीनं रूपं धर्तव्यं भवतीति भावः ॥

**( ङ ) परिभवोऽरिभवो हि सुदुःसहः ॥ ( 6.45 )**

**अन्वयः** – अरिभवः परिभवः हि सुदुःसहः (भवति) ।

**विमर्शः** – अत्र अपरिभवः परिभवः चेति शब्दद्वयं समानमिव प्रतिभाति । परन्तु व्याकरणदृशा विचारयामः चेत् अरिभवः पदं अरि-इत्यस्य भव-इत्यस्य च सामासिकं रूपमस्ति । अरिणा भवः अरिभवः इति तृतीयातत्पुरुषः समासः । अर्थात् यः पराभवः अरिणा भवति, सः पराभवः निश्चयेन सुदुःसहो भवति । पिता स्वकीयः आत्मीयः वर्तते । सः पुत्रस्य अरिः अर्थात् शत्रुः नास्ति । अतः कदाचित् तेन पराजयो भवति, तदा स सह्यो भवति । परं यः खलु अस्माकम् अरिः वर्तते, कदाचित् तेन पराजयो भवति, चेत् सः पराजयः असह्यः भवति । अतः जीवने अरिभवः पराजयः न स्यादेतदर्थं जनेन सदा प्रयत्नपरेण भाव्यमिति भावः ॥

## टिप्पणी

**समासपदानि** – जगन्निवासः – जगतां निवासः – ष.तत्पु. ।वसुदेवसद्मनि – वसुदेवस्य सद्म, तस्मिन्– ष.तत्पु. ।हिरण्यगर्भाङ्गभुवम् – हिरण्यस्य गर्भः हिरण्यगर्भः – ष.तत्पु. । अङ्गात् भवतीति अङ्गभूः – उपपदसमासः। हिरण्यगर्भस्य अङ्गभूः – ष.तत्पु. ॥

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) शिशुपालवधस्य कथानकस्य स्रोतः ............ वर्तते । (भागवतम्, शिवपुराणम्, महाभारतम्)

(2) माघस्य स्थितिकालः ............ वर्तते । (675–750, 500–550, 700)

(3) माघे ............. गुणाः सन्ति। (नव, सप्त, त्रयः)

(4) जगन्निवासः – इत्यत्र ............. समासः । (कर्मधारयः, बहुव्रीहिः, षष्ठीतत्पुरुषः)

(5) मुनिम् इत्यनेन ............. मुनिः सूचितः। (व्यासः, नारदः, कश्यपः)

(6) अवतरन्तं मुनिं ............ ददर्श । (माघः, शिवः, हरिः)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) नारदागमनं कस्मिन् सर्गे वर्णितमस्ति?

(2) स्वल्पतरां कथामाश्रित्य कः महाकाव्यं रचितवान्?

(3) आकाशात् अवतरन्तं कं कः ददर्श?

(4) भवान्तरेषु किं किम् अभ्येति?

(5) अपस्पशा नाम किम्?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) माघे ये गुणाः सन्ति ते के?

(2) माघस्य घण्टामाघत्वेन प्रसिद्धिः कथं जाता?

(3) श्रीशब्दं मल्लिनाथः केन रूपेण व्याख्याति?

(4) मङ्गलपद्ये योजितं शब्दालङ्कारं निरूपयत?

(5) कीदृशी शब्दविद्या न भाति?

**4. संक्षेपतः परिचयं कारयत ।**

(1) अर्थगौरवम् ।

(2) घण्टामाघः ।

(3) बृहत्त्रयी ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) मल्लिनाथस्य टीका ।

(2) सर्वः स्वार्थं समीहते ।

(3) रमणीयता ।

### छात्रप्रवृत्तिः

भागवतपुराणस्य शिशुपालवधकथा पठनीया ।

### शिक्षकप्रवृत्तिः

भागवतान्तर्गता राजसूययज्ञकथा छात्रेभ्यः कथनीया ।

# ५ मेघदूतम्

**प्रस्तावना** – महाकविना कालिदासेन रचितं मेघदूतं नाम प्रसिद्धं गीतिकाव्यमस्ति । संस्कृतसाहित्यस्येदं परममुज्ज्वलं रत्नमस्ति । अस्मिन् एकविंशत्युत्तरं शतं पद्यानि सन्ति । एषु पद्येषु महाकविना कालिदासेन एकस्य विरहिणः यक्षस्य मनोव्यथायाः मार्मिकं चित्रणं कृतमस्ति । अस्य पूर्वमेघः उत्तरमेघश्चेति द्वौ विभागौ स्तः । पूर्वमेघे रामगिरितः अलकापर्यन्तस्य गमनमार्गः प्रमुखतया वर्णितोऽस्ति । उत्तरे च मेघे अलकानगरी, यक्षस्य स्वीयं भवनम्, तत्र स्थितायाः स्वीयायाः पत्न्याः विरहदशायाः वर्णनम्, अन्ते च स्वीयाये प्रियायै यक्षस्य यः सन्देशः मेघेन पापणीयोऽस्ति, तस्य वर्णनं वर्तते ।

संस्कृतसाहित्यस्य गीतिकाव्येषु मेघदूतस्य स्थानं अग्रगण्यमस्ति । यादृशी रमणीया सुकुमारी कल्पना अस्मिन् काव्ये प्रवर्तते, तदनुरूपमेवास्य भाषा शैली च वर्तते । शैली अत्यन्ता मनोरमा अस्ति । भाषा महती प्राञ्जला परिमार्जिता प्रवाहपूर्णा चास्ति । शब्दानां चयने कविना विशेषं कौशलं प्रदर्शितमस्ति ।

अथ च मेघदूतस्य शैली कालिदासस्य स्वाभाविकतायाः प्रसादगुणतायाः च उत्कृष्टमुदाहरणमस्ति । मेघदूतस्य सर्वाणि पद्यानि रमणीयानि स्वरसौष्ठवेन च युक्तानि सन्ति ।

अमोघराघवस्य कर्ता दिवाकरः कथयति–

**रम्या श्लेषवती प्रसादमधुरा श्रृङ्गारसंगोज्ज्वला**
**चाटूक्तैरखिलप्रियैरहरहस्सम्मोहयन्ती मनः ।**
**लीलान्यस्तपदप्रचाररचना सद्वर्णसंशोभिता**
**भाति श्रीमति कालिदासकविता कान्तेव कान्ते रता ॥**

कवेः दिवाकरस्येतानि वचनानि कालिदासस्य मेघदूते अक्षरशः घटन्ते ।

केषाञ्चित् विदुषामेषा धारणा वर्तते यत् कालिदासेन अन्याः कृतयः न विरचिताः स्युः, केवलमेका मेघदूतनामिका कृतिरियं रचिता स्यात्, तदाप्ययं महाकवित्वेन प्रसिद्धः स्यादेव । सन्देशकाव्यस्य अभिनवा मौलिकी कल्पना कालिदासेनैव कृतेति कालिदासः महाकविः अस्तीति निश्चयेन कथ्यते ॥

---

**कविपरिचयः**

महाकवि कालिदासः संस्कृतसाहित्यस्य सुप्रसिद्धः कविः वर्तते । अयं महाकविः उज्जैन्यां स्वीयं जीवनं यापितत्वान् इति मत्त्वाद्यत्वे प्रतिवर्षम् उज्जैन्यां कालिदास–महोत्सवः सर्वदकारेण आयोज्यते । अनेन तस्य राज्ञः विक्रमस्य राज्यसभायाम् स्थानमपि निश्चितं भवति । एवं सः राज्याश्रयवान् कविः आसीदिति सूच्यते ।

अनेन महाकविना महाकाव्यम् नाटकानि गीतिकाव्यानि चेति त्रिविधम् साहित्यं रचितमस्ति । अस्य महाकाव्येषु रघुवंशम् गीतिकाव्ययोः च मेघदूतम् प्रसिद्धतरम् अस्ति । एतयोरूभयोरूपरि मल्लिनाथेन रीती विरचिता अस्ति टीका यस्याः । साहाय्येन भाविकः जनः काव्यरसास्वादम् सरलतया अनुभवति । महाकवेर उपमालंकारप्रीतिरप्यनुपमा प्रसिद्धा च । अतः एव उच्वते उपमा कालिदासस्य ॥

**मेघदूतस्य कथावस्तु–**

कुबेरस्य वर्षभोग्येण शापेन रामगिरिं परिव्राजितो यक्षः । सः समागते प्रावृट्काले गिरिशिखरं मेघाच्छन्नं पश्यति। तेन चास्य कान्तास्मृतिः जायते । तस्माद् विह्वलश्चेतनाचेतनेषु प्रकृतिकृपणः सन् प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी मेघद्वारा प्रियायै

सन्देशं हारयिष्यंस्तं सम्पूज्य नवैः पुष्पैः कथयितुमुपक्रमते । प्रथमं स मार्गनिर्देशनं करोति येन मार्गेण मेघेन गन्तव्यम्। तत्क्रमे क्रमेण माल-आम्रकूट-नर्मदा-दशार्ण-विदिशा-वेत्रवती-नीलगिरि-निर्विन्ध्या-सिन्धु-अवन्ति- विशाला-उज्जयिनी-शिप्रा-गम्भीरा-देवगिरि-चर्मण्वती-दशपुर-ब्रह्मावर्त-कुरुक्षेत्र-सरस्वती-कनखल-गङ्गानदी-हिमालय-क्रौञ्चरन्ध्र-कैलाश-मानसरोवर-अलकाश्च निर्दिष्टाः ।

उत्तरभागे यक्षः अलकां वर्णयति । तत्र स्थितं स्वगेहं परिचाययति । अथ च स्वप्रेयस्याः परिचयनिमित्तकलक्षणान्यपि मेघाय कथयति, तदनन्तरं च स्वीयं सन्देशम् । सन्देशे स प्रथमं स्वीयां विरहजनितावस्थां निर्वर्णयति । तदनु स प्रियायै कथयति यत् त्वया नैवोद्विग्नया भवितव्यम् । चतुर्मासानन्तरमावयोः संयोगोऽवश्यम्भावी इति । अन्ते च विद्युता मेघस्य विप्रयोगः कदापि न भवेदिति कामयमानं यक्षं वर्णयित्वा कविना काव्यस्यास्य समाप्तिः कृता ॥

**मेघदूतस्य प्रथमं पद्यम्**

अस्मिन् मेघदूते मङ्गलाचरणरूपेण किमपि पृथक् पद्यं नास्ति । अतोऽत्र तस्य प्रथमं पद्यं प्रस्तूयते-

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ 1 ॥**

**पदच्छेदः** - कश्चित् (1.1) कान्ताविरहगुरुणा (3.1) स्वाधिकारात् (5.1) प्रमत्तः (1.1) शापेन (3.1) अस्तङ्गमितमहिमा (1.1) वर्षभोग्येण (3.1) भर्तुः (6.1) यक्षः (1.1) चक्रे (कृ धातु, परोक्ष भूतकाल (3.1) जनक-तनया-स्नान-पुण्योदकेषु (7.3) स्निग्धच्छायातरुषु (7.3) वसतिम् (2.1) रामगिर्याश्रमेषु (7.3) ॥

**अन्वयः** - स्वाधिकारात् प्रमत्तः भर्तुः कान्ताविरहगुरुणा वर्षभोग्येण शापेन अस्तङ्गमितमहिमा, कश्चित् यक्षः जनकतनया-स्नान-पुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे ॥

**टीका - मल्लिनाथकृता संजीवनी टीका (संक्षिप्ता)**

**कश्चिदिति ॥** स्वाधिकारात्स्वनियोगात् प्रमत्तोऽनवहितः । अत एवापराधाद्धेतोः । कान्ताविरहेण गुरुणा दुर्भरेण । दुस्तरेणेत्यर्थः। वर्षभोग्येण संवत्सरभोग्येण । भर्तुः स्वामिनः शापेन । अस्तङ्गमितो महिमा सामर्थ्यं यस्य सोऽस्तंगमितमहिमा । अस्तमिति मकारान्तमव्ययम् । कश्चिदनिर्दिष्टनामा यक्षो देवयोनिविशेषः । जनकतनयायाः सीतायाः स्नानैरवयाहनैः पुण्यानि पवित्राण्युदकानि येषु तेषु । पावनेष्वित्यर्थः । छायाप्रधानास्तरवश्छायातरवः । स्निग्धाः सान्द्राश्छायातरवो नमेरुवृक्षा येषु तेषु । वसतियोग्येष्वित्यर्थः । रामगिरेश्चित्रकूटस्याश्रमेषु वसतिम् । चक्रे कृतवान् ।

अत्र रसो विप्रलम्भाख्यः शृङ्गारः । तत्राप्युन्मादावस्था । अत एवैकत्रानवस्थानं सूचितमाश्रमेष्विति बहुवचनेन । सीतां प्रति रामस्य हनुमत्संदेशं मनसि निधाय मेघसंदेशं कविः कृतवानित्याहुः । अत्र काव्ये सर्वत्र मन्दाक्रान्तावृत्तम्। तदुक्तम् - 'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत् ।' - इति ॥

**सूक्तयः**

**(क) कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ (1.5)**

**अन्वयः** - कामार्ताः हि (जनाः) चेतनाचेतनेषु प्रकृतिकृपणाः (भवन्ति) ।

**विमर्शः** कामार्ताः कामेन आर्ताः पीडिताः अर्थात् कामयुक्ताः कामिजनाः चेतनेषु नाम सजीवेषु प्राणिषु अचेतनेषु नाम निर्जीवेषु च पदार्थेषु भेदं न कर्तुं शक्नुवन्ति । तेन एतादृशाः जनाः चेतनाचेतनयोः मध्ये प्रथमं तु भेदमेव न कुर्वन्ति, भेदाभावे च ते चेतने अचेतनवद् अचेतने च चेतनवद् व्यवहारं कुर्वन्ति । एवमाचरतस्तान् महाकविना कालिदासेन प्रकृतिकृपणाः कथिताः सन्ति ॥

**( ख ) याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।।( 1.6 )**

**अन्वयः** अधिगुणे मोघा याच्ञा (अपि) वरम् (भवति, परं) अधमे लब्धकामा याच्ञा (अपि) न वरं भवति ।

**विमर्शः** – अधिगुणे अर्थात् गुणवति जने कृता याच्ञा – याचना, यदि मोघा अर्थात् निरर्थका भवति, तदापि सा वरम् अस्ति । गुणवति जने याचनाकरणं वरमस्तीत्यभिप्रायः । परन्तु अधमे जने कृता याचना यदि लब्धकामा स्यात् तदापि सा वरं नास्ति । अधमे गुणविहीने जने याच्ञाकरणं वरं नास्तीत्यभिप्रायः ।

गुणवान् जनः कदाचित् केनापि अकथनीयेन कारणेन याचनापूर्तिं कर्तुं समर्थो न भवति, तथापि तस्मिन् गुणवति जने एव याचना करणीया । यतोहि सः याचमानं जनं यत्र कुत्रापि प्रकाशितं न करोति । परन्तु यः खलु गुणहीनोऽधमः जनो भवति, सः यद्यपि याचनायाः पूर्तिं करोति, तथापि सः याचकस्य स्वमानं न परिरक्षति । याचनापूर्तिं कृत्वा स्वीयं महिमागानं कारयितुं सः याचमानं जनं यत्र कुत्रापि प्रकाशितं करोति । अतः अधमे लब्धकामा याच्ञा अपि वरं नास्तीति कविना निर्दिष्टमत्र ॥

**( ग ) रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।।( 1.20 )**

**अन्वयः** – सर्वः रिक्तः लघुः भवति, पूर्णता हि गौरवाय (भवति) ।

**विमर्शः** – रिक्तः जनो भवेत्, वस्तु वा भवेत्, सर्वं रिक्तं खलु सर्वदा (गुणेन कर्मणा वा) लघु भवति । परं यदि जनः वस्तु वा यदि पूर्णतां प्राप्नोति, चेत् गौरवाय भवति । पूर्णताप्राप्तस्य जनस्य वस्तुनो वा गौरवमेव भवति ।

गुणेन पूर्णो जनः घटो वा सर्वेषां मानभाग्भवति । तेन च तस्य गौरवं जायते इति संक्षेपतोऽभिप्रायः ॥

**( घ ) आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।।( 1.57 )**

**अन्वयः** – उत्तमानां सम्पदः आपन्नार्तिप्रशमनफलाः हि (भवन्ति) ॥

**विमर्शः** – उत्तमानां गुणयुक्तानां जनानां याः सम्पत्तयो भवन्ति, ताः सर्वाः अपि न केवलं स्वार्थस्य प्रशमनाय भवन्ति, अपितु आपत्सु पतितानां दुःखितानां जनानां क्लेशस्य प्रशमनाय भवन्ति । अस्मिन् जगति ये खलु उत्तमाः जनाः सन्ति, ते सर्वदा स्वीयां सम्पत्तिं शरणागतजनानां दुःखस्य प्रशमनाय व्ययीकुर्वन्ति । समाजे प्रवर्तमानायाः परिस्थितेः स्वानुभवोऽत्र कविना स्वीयेन मुखेन प्रस्तुतोऽस्तीति दिक् ॥

**( ङ ) के वा नस्युः परिभवपदं निष्फलारम्भयत्नाः ।।( 1.58 )**

**अन्वयः** – निष्फलारम्भयत्नाः के परिभवपदं वा न स्युः ।

**विमर्शः** – निष्फलम् अर्थात् निरर्थकं यदि यत्नः प्रारभ्यते चेदन्ते परिभवमेव प्राप्नोति जनः । अतः प्रत्येकं यत्नः यथा सफलतां प्राप्नोति, तथा तस्य यत्नस्य प्रारंभः करणीयः । तेन जयः प्राप्तुं शक्यते ।

अथ चास्यायमप्याशयः यत् बुद्धिमता जनेन सर्वदा निष्प्रयोजनं किमपि कार्यं न करणीयम् । तादृशकर्मकरणे वा यत्नोऽपि न विधेयः । अन्यथा कृतेन यत्नेनापि जनः परिभवपदं प्राप्नोति ।

## टिप्पणी

**समासपदानि** – स्वाधिकारात् – स्वस्य अधिकारः, तस्मात् – ष.तत्पु. । कान्ताविरहगुरुणा – कान्तायाः विरहः – ष.तत्पु. । कान्ताविरहेण गुरुः – कान्ताविरहगुरुः, तेन – तृ.तत्पु. । वर्षभोग्येण – वर्षं भोग्यः – द्वि. तत्पु. । अस्तङ्गमितमहिमा – अस्तं गतः महिमा यस्य सः – बहु. । जनकतनया-स्नान-पुण्योदकेषु-जनकस्य तनया – ष.तत्पु. । जनकतनयायाः स्नानम् – ष.तत्पु. । जनकतनयास्नानेन पुण्यम् उदकं यस्य, तेषु – बहु. । स्निग्धाः सान्द्राः छायातरवः मनेरुवृक्षाः येषु तेषु-बहु ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) कालिदासकविता कान्तेव कान्ते रता - एतत् वचनं ............. मते अस्ति । (दिवाकरस्य, मल्लिनाथस्य, वल्लभदेवस्य)

(2) अलकानगर्याः वर्णनम् ........... अस्ति । (समस्ते मेघदूते, उत्तरमेघे, पूर्वमेघे)

(3) यक्षस्य शापस्य ............ मर्यादा आसीत् । (वर्षम्, चत्वारः मासाः, वर्षाकालः)

(4) अस्तङ्गमितमहिमा - पदे ........... लिङ्गम् अस्ति । (नपुंसकलिङ्गम्, पुंल्लिङ्गम्, स्त्रीलिङ्गम्)

(5) मेघदूते सर्वत्र .............. छन्दसः प्रयोगोऽस्ति । (मन्दाक्रान्तायाः, स्रग्धरायाः, मालिन्याः)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) मेघदूतस्य काव्यप्रकारः कः ?

(2) मेघदूतस्य नायकः कः ?

(3) यक्षः कुत्र वसतिं चक्रे ?

(4) यक्षेण प्राप्तः शापः कीदृशो वर्णितः ?

(5) वर्षभोग्येण - इत्यत्र समासः केन सूत्रेण भवति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) मेघदूतस्य प्रथमे पद्ये यक्षः कीदृशो वर्णितः ?

(2) रामगिर्याश्रमस्य कति विशेषणानि कविना प्रयुक्तानि ? तानि कानि सन्ति ?

(3) छायातरवः इत्यस्मिन् पदे कः समासः ?

(4) प्रथमपद्ये कस्य रसस्य योजना अस्ति ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) रामगिरि-आश्रमः

(2) मोघा याच्ञा ।

(3) दूतकाव्यम् ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) मन्दाक्रान्ता छन्दः ।

(2) पूर्वमेघः ।

(3) पूर्णता गौरवाय ।

**छात्रप्रवृत्तिः**

अन्यस्य कस्यचित् दूतकाव्यस्य परिचयः करणीयः ।

**शिक्षकप्रवृत्तिः**

गीतिकाव्यविषये छात्राः प्रबोधयितव्याः ।

●

# ६ चम्पूरामायणम्

**प्रस्तावना** – चम्पूरामायणम् इत्येतत् भोजराजेन विरचितं सुप्रसिद्धमेकं चम्पूकाव्यं वर्तते । इदं तु विदितचरमेवास्ति यत् चम्पूकाव्ये गद्यं पद्यं च सङ्गतं भवति । यद्यपि संस्कृतसाहित्ये वैदिकसाहित्ये च पद्यानामेव प्राचुर्यं विद्यते, तथापि वेदकालतः एव गद्यप्रबन्धानामपि परम्परा प्रचलिता दृश्यते । केषुचित् याजुषमन्त्रेषु, उपनिषत्सु च छन्दोवृत्तिरहितानि गद्यसदृशानि गहनतत्त्वाख्यानानि द्रष्टुं शक्यन्ते । भागवतादिषु पुराणेषु पद्यैः सह गद्यप्रयोगाः अपि मिलन्ति । पद्यशैल्यां विरचिते महाभारते च 'नहुषोपाख्यानादीनि' आख्यानानि गद्यशैल्यां निरूपितानि सन्ति । न केवलं काव्यसाहित्ये, व्याकरणादिशास्त्रीयग्रन्थेष्वपि गद्य-पद्यमयं वाक्यसमूहं दृष्टिपथमायाति । पतञ्जलिप्रभृतिभिः शास्त्रकारैरपि यथाप्रसङ्गं महाभाष्यादिषु गद्यपद्योभयात्मकानि काव्यानि समुदाह्रियन्ते ।

एवं गद्यपद्यमयी रचना तु प्राचीनकालादेव प्रचलिता आसीत् । परन्त्वेतादृशानां गद्यपद्यमिश्ररचनानां विशेषतया काव्यानां 'चम्पूः' इत्यभिधानं प्रायः सप्तमशतके शास्त्रकारैः व्यवस्थापितमिति प्रतिभाति । सम्प्रति तु विद्वद्भिरेतत् सुविदितम्। तच्च 'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इति सामान्यतः चम्पूकाव्यलक्षणं प्रथितमस्ति लक्षणग्रन्थेषु । अथ चास्य चम्पूशब्दस्य व्युत्पतिरपि ध्यातव्या । सा चेत्थं प्रदीयते – चम्पयति योजयति गद्यपद्ये इति चम्पूः । अथवा चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयतीति चम्पूः ।

इदं चम्पूरामायणं चम्पूकाव्यत्वात् गद्यपद्यात्मकं वर्तते । वैदर्भीशैलीमाश्रित्य काव्यमिदं विरचितम् । वर्णनाचातुर्ये निपुणोऽयं कविः हितमिततया अलङ्कारान् प्रयुङ्क्ते । अस्मिन् चम्पूकाव्ये शब्दालङ्काराणां योजना, अनुप्रासस्य प्रयोगाः, संक्षिप्ततया विषयनिरूपणं चेत्यादि अनेकविधं वैशिष्ट्यं निहितमस्ति । यद्यपि संस्कृतसाहित्ये एतादृशानि चम्पूकाव्यानि सङ्ख्यादृष्ट्या नातिबहूनि सन्ति । तथापि वस्तुदृष्ट्या सुपरिचितानि, निबन्धदृष्ट्या बहुमूल्यानि च सन्ति। एष्वेकतमं चम्पूरामायणनाम्ना प्रसिद्धमिदं काव्यम् ।

---

**कविपरिचयः**

चम्पूरामायणस्य विरचयिता भोजराजः विदर्भानां राजा आसीत् । एषः परमारवंशीयः महाराजः, महाकविः, महावैय्याकरणः, महान् आलङ्कारिकश्चेति बहुविधं व्यक्तित्वं धारयति स्म । अयं भोजराजः प्रथममुज्जयिन्याम् उवास इति इतिहासवेत्तारः ब्रुवन्ति। ततः कारणान्तरेण सः राजधानीं धारानगरं प्रति स्थानान्तरितं कारितवान् । अस्मिन् विषये ऐतिहासिकैः बहूनां साक्ष्यानां संग्रहः कृतोऽस्ति ।

अयं धारानगरे सरस्वतीदेव्याः सुन्दरं भव्यं च मन्दिरमेकं निर्मापितवान् । भोपालनगरात् नैर्ऋत्यां दिशि विद्यमानः 'भोजसरोवरः' अस्य वास्तुशिल्पप्रबुद्धतायाः साक्षित्वेन वर्तते । पञ्चदशशतकपर्यन्तमपि एष सरोवरः तादृश एव दृष्टिगोचरं भवति ।

राजा भोजः स्वयं कविः आसीत् । सः कवीनां पोषकः अपि आसीदित्यपि भोजप्रबन्धादिभिः ग्रन्थैरवगन्तुं शक्यते। बल्लालसेनविरचिते 'भोजचरिते' भोजराजस्य कथा विस्तरशो वर्णिता । यद्यपि बल्लालसेनस्य ग्रन्थः यथार्थमितिहासं न निरूपयति, तथापि भोजराजस्य वैदुष्यविषये तु सः वास्तविकीं परिचितिं ददात्येव ।

**भोजस्य कृतयः**

अनेन भोजेन अनेके शास्त्रग्रन्थाः नैकानि च काव्यानि विरचितानि सन्ति । तेष्वन्यतममिदं 'चम्पूरामायणम्'। अन्ये चैते सन्ति – सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः (अलङ्कारशास्त्रीयः ग्रन्थः), शब्दानुशासनम् (भोजव्याकरणनामकः व्याकरणशास्त्रीयः ग्रन्थः), सङ्गीतप्रकाशः (सङ्गीतशास्त्रस्य ग्रन्थः), समराङ्गणसूत्रधारः (वास्तुशास्त्रीयम् पुस्तकम्), शिवदत्तस्तोत्रम्, राजमार्तण्डः (व्याख्यानम्), रघुवंशव्याख्यानम्, राजवार्तिकम् (व्याख्यानम्) चैतानि नैकानि भोजराजेन विरचितानि पुस्तकानि सन्ति ॥

**चम्पूरामायणस्य कथावस्तु**

चम्पूरामायणं बालकाण्डतः प्रारभ्यते । अत्र प्रथमं मङ्गलाचरणमस्ति । तत्र कविना महाविष्णुस्तुतिः कृतास्ति । तदनन्तरं चम्पूरामायणमिदं प्रारभ्यते । वाल्मीकिरामायणमस्य काव्यस्य आधारभूतमस्तीत्यतः तदनुरूपमेवात्र विषयवस्तु प्रवर्तते । अस्मिन् काव्ये कविना भोजराजेनैकवारं वाल्मीकेः पद्यानि यथावत् स्वीकृतानि सन्ति । प्रतिकाण्डम् आदिमपद्यानि रामायणस्य तत्तत् काण्डारम्भपदैरेव आरभ्यते ।

एतत् काव्यमधुना सुन्दरकाण्डपर्यन्तमात्रं लभ्यते । भोजराजेन तावन्मात्रं विलिखितं स्याद् अथवा दुर्भाग्यवशादस्माभिः तावदेवोपलब्धमिति संभाव्यते। अर्वाचीनैः लक्ष्मणसूरि–वेङ्कटाध्वरि–राजचूडामणि–दीक्षितप्रभृतिभिः कविभिः भोजराजशैलीमनुकुर्वद्भिः अस्य चम्पूरामायणस्य युद्धकाण्डं विरच्य कृतिरेषा पूर्णतां नीतेति विदुषां मतमस्ति॥

**चम्पूरामायणस्य मङ्गलाचरणम्**

'मङ्गलादीनि मङ्गलान्तानि च काव्यानि श्रूयन्ते' इति न्यायेन कविः 'चम्पूरामायणे' गणेशस्तुतिपरकमिदं मङ्गलमाचरति । यथा–

**लक्ष्मीं तनोतु नितरामितरानपेक्ष-**
**मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।**
**हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं,**
**विघ्नाद्रिभेदशतधारधुरंधरं नः ॥ 1॥**

**पदच्छेदः** – लक्ष्मीम् (2.1) तनोतु (तन् लोट्लकारः, अन्यपुरुषः, एकवचनम्) नितराम् (अ.) इतरानपेक्षम् (1.1) अङ्घ्रिद्वयम् (1.1) निगमशाखिशिखाप्रवालम् (1.1) हैरम्बम् (1.1) अम्बुरुह–डम्बर–चौर्य–निघ्नम् (1.1) विघ्नाद्रिभेदशतधारधुरंधरम् (1.1) नः (6.3) ॥

**अन्वयः** – निगमशाखिशिखाप्रवालम् अम्बुरुह–डम्बर–चौर्य–निघ्नं विघ्नाद्रि–भेद–शतधार–धुरंधर हैरम्बम् अङ्घ्रिद्वयं नितराम् इतरानपेक्षं नः लक्ष्मीं तनोतु ॥

**पदार्थः** निगमशाखिशिखाप्रवालम् – निगमः नाम वेदः, त एव शाखिनः वृक्षाः तेषां शिखा अर्थात् उपनिषद्, तासां प्रवालं नाम नवपल्लवम्, हैरम्बम् अम्बुरुह–डम्बर–चौर्य–निघ्नम्–अम्बुरुहम् नाम कमलम्, तस्य डम्बरः – सौभाग्यातिशयसंरम्भः, तस्य चौर्य – अपहरणे, निघ्नम् आयत्तम्, विघ्नाद्रि–भेद–शतधार–धुरंधरं विघ्नं नाम बाधः अन्तरायो वा, स एव अद्रिः – विघ्नाद्रिः, तस्य भेदे विदारणे शतधारधुरंधरं वज्रायुधसमानसारम्, हैरम्बम् – वैनायकम्, अङ्घ्रिद्वयम् – चरणयुग्मम्, इतरानपेक्षम् – इतरेषु न विद्यते अपेक्षा यस्मिन् कर्मणि तद्यथा, नितराम् – अतिशयेन, नः – अस्माकं, लक्ष्मीम् – सम्पत्तिं, तनोतु – सम्पादयतु ॥

**टीका** –

**लक्ष्मीमिति ।** आदौ लक्ष्मीशब्दप्रयोगाद्वर्णगणादिशुद्धेरभ्युच्छ्रयः । निगमा वेदास्त एव शाखिनो वृक्षाः । तेषां शिखा उपनिषदः। ता एव शिखा अग्राणीति श्लिष्टरूपकम्। मौलयश्च प्रतीयन्ते । तासां प्रवालं नवपल्लवम्। वेदान्तवेद्यमित्यर्थः । अम्बुनि रोहितीत्यम्बुरुहं पद्मं तस्य यो डम्बरः सौभाग्यातिशयसंरम्भस्तस्य चौर्येऽपहरणे । निघ्नमायत्तम् । अम्बुरुहसौभाग्यापहारीत्यर्थः। डम्बरेत्यत्र दम्यन्ते भीरवोऽनेनेति डम्बरः । विहन्यन्त एभिरिति विघ्नाः प्रत्यूहाः । त एवाद्रयः पर्वतास्तेषां भेदे विदारणे शतधारधुरंधरं वज्रायुधसमानसारम् । अशेषविघ्नविनाशकमित्यर्थः। धूरेव धुरा । तां धारयतीति धुरंधरम् । हेरम्बस्येदं हैरम्बं वैनायकम् । अङ्घ्रिद्वयं चरणयुग्मम्। इतरेषु न विद्यतेऽपेक्षा यस्मिन्कर्मणि तद्यथा भवति तथेतरानपेक्षम् । भजनीयान्तरनिरपेक्षमित्यर्थः । इदं क्रियाविशेषणम्। नितरामतिशयेन । नोऽस्माकं लक्ष्मीमशेषाभिलषितार्थसंपत्तिं तनोतु करोतु । संपादयत्वित्यर्थः । एतदादिश्लोकपञ्चकं वसन्ततिलकावृत्तम्– 'उक्ता वसन्ततिलका तभजा जगौ गः' इति केदारलक्षणात् ॥

**उच्चैर्गतिर्जगति सिद्‌ध्यति धर्मतश्चेत्**

**तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।**

**तेषां प्रकाशनदशा च महीसुरैश्चेत्**

**तानन्तरेण निपतेत् क्व नु मत्प्रणामः ॥ 2 ॥**

**पदच्छेदः** – उच्चैः (अ.) गतिः (1.1) जगति (7.1) सिद्‌ध्यति (सिद्ध लट्‌लकारः, अन्यपुरुषः, एकवचनम्) धर्मतः (अ.) चेत् (अ.) तस्य (6.1) प्रमा (1.1) च (अ.) वचनैः (3.3) कृतकेतरैः (3.3) चेत् (अ.) तेषाम् (6.3) प्रकाशनदशा (1.1) च (अ.) महीसुरैः (3.3) चेत् (अ.) तान् (2.3) अनन्तरेण (अ.) निपतेत् (नि पत् विधिलिङ् लकारः, अन्यपुरुषः, एकवचनम्) क्व (अ.) नु (अ.) मत्प्रणामः (1.1) ॥

**अन्वयः** – जगति उच्चैः गतिः सिद्‌ध्यति धर्मतः चेत्, तस्य प्रमा कृतकेतरैः वचनैः च (सिद्‌ध्यति) चेत्, तेषाम् प्रकाशनदशा च महीसुरैः चेत्, तान् अन्तरेण मत्प्रणामः क्व नु निपतेत् ॥

**पदार्थः** – जगति – संसारे, उच्चैः – उन्नता, गतिः – गमनम्, धर्मतः – ज्योतिष्टोमादिधर्मात्, सिद्‌ध्यति – निष्पन्नः भवति, चेत्, तस्य – धर्मस्य, प्रमा – यथार्थानुभवः, कृतकेतरैः – अकृत्रिमैः, वचनैः – वाक्यैः च (सिद्‌ध्यति) चेत्, तेषाम् – अकृत्रिमवाक्यानां, प्रकाशनदशा – स्फुटीकरणप्रकारः च महीसुरैः – ब्राह्मणैः, (सिद्‌ध्यति), चेत् तान् – वेदविदां ब्राह्मणानाम्, अन्तरेण – विना, मत्प्रणामः – मदीयः नमस्कारः, क्व कस्मिन्, नु निपतेत् – प्रवर्तेत ॥

**उच्चैरिति ।** जगति । जगत्स्वित्यर्थः । उच्चैरुन्नता गतिर्गन्तव्यदेशः । स्वर्गाद्युन्नतस्थानमित्यर्थः । धर्मतो ज्योतिष्टोमादिधर्मात् । सिद्धयति चेन्निष्पन्ना भवति यदि । सिद्धयतीति पदं सर्वत्र संबध्यते। तस्य धर्मस्य प्रमा यथार्थानुभवश्च । स्वर्गादिफलसाधनत्वज्ञानमिति यावत् । कृतकेतरैरकृत्रिमैर्वचनैः। तेषामकृत्रिमवचनानां प्रकाशनदशा पाठतोऽर्थतश्च स्फुटीकरणप्रकारश्च । महीसुरैः । ब्राह्मणैरित्यर्थः । तानन्तरेण तान्महीसुरान्विना। मत्प्रणामो मत्कृतनमस्कारः क्व नु कुत्र वा निपतेत्प्रवर्तेत । अत्रोत्तरोत्तरस्य पूर्वं पूर्वं प्रति विशेषणत्वादेकालल्यलंकारः । इति ॥

## टिप्पणी

**समासपदानि** – निगमशाखिशिखाप्रवालम् – निगमाः एव शाखिनः वृक्षाः ते – कर्मधारयः, निगमशाखिनां शिखा–ष.तत्पु. निगमशाखिशिखानाम् प्रवालम् – ष.तत्पु. ॥ अम्बुरुह–डम्बर–चौर्य–निघ्नम् – अम्बुरुहस्य डम्बरः – ष.तत्पु., अम्बुरुहडम्बरस्य चौर्यम् – ष.तत्पु., अम्बुरुहडम्बरचौर्ये निघ्नम् – स. तत्पु. ॥ विघ्नाद्रि–भेद–शतधार–धुरंधरम्– विघ्नः एव अद्रिः – कर्मधारयः, विघ्नाद्रेः भेदः – ष. तत्पु., विघ्नाद्रिभेदे शतधारधुरंधरम्– स. तत्पु. ॥ अङ्घ्रिद्वयम् – अङ्घ्रीणां द्वयम् – ष.तत्पु. ॥ चरणयुग्मम् – चरणयोः युग्मम् – ष.तत्पु. ॥ 1 ॥ कृतकेतरैः – कृतकेभ्यः इतरैः – पं. तत्पु. ॥ प्रकाशनदशा – प्रकाशनस्य दशा – ष.तत्पु., महीसुरैः – महीनां सुरैः– ष.तत्पु. ॥ मत्प्रणामः – मम प्रणामः – ष.तत्पु. ॥ 2 ॥

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) चम्पूरामायणस्य शैली ............ वर्तते । (गौडी, वैदर्भी, पद्यात्मिका)

(2) भोजप्रबन्धः ............. कृतिर्वर्तते । (बल्लालसेनस्य, भोजराजस्य, कालिदासस्य)

(3) चम्पूरामायणस्य मङ्गलाचरणे ............. क्रियाविशेषणं प्रयुक्तमस्ति । (शीघ्रम्, इतरानपेक्षम्, निगमशाखिशिखाप्रवालम्)

(4) डम्बरशब्दस्य ............. अर्थः । (सौभाग्यातिशयसंरम्भः, सौभाग्यम्, सौभाग्यस्य समारम्भः)

(5) महीसुराः ............. भवन्ति । (क्षत्रियाः, गुरवः, ब्राह्मणाः)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) भोजविरचितः श्रृङ्गारप्रकाशः कस्य शास्त्रस्य ग्रन्थः ?

(2) मङ्गलाचरणे भोजेन कस्य स्तुतिः कृता ?

(3) हैरम्बशब्दस्य कोऽर्थः ?

(4) निगमशाखिशिखाप्रवालम् – पदस्य विग्रहः करणीयः ?

(5) चम्पूरामायणमङ्गलश्लोकयोः कस्मिन् श्लोके एकावल्यलङ्कारः अस्ति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) चम्पूशब्दस्य व्युत्पतिः केन प्रकारेण प्रदीयते ?

(2) भोजस्य कृतयः कति सन्ति ? काः च ताः ?

(3) चम्पूरामायणस्य कथावस्तु किमस्ति ?

(4) डम्बरशब्दस्य का व्युत्पत्तिः टीकाकारेण प्रदत्ता ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) राजा भोजः ।

(2) चम्पूकाव्यस्वरूपम् ।

(3) एकावलि-अलङ्कारः ।

(4) आशीरलङ्कारः ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) वसन्ततिलका-वृत्तम् ।

(2) काव्यादौ लक्ष्मीशब्दप्रयोगः ।

(3) धर्मस्य प्रमा ।

**छात्रप्रवृत्तिः**

रामचरितमानसस्य मङ्गलाचरणश्लोकानां पाठो विधेयः ।

**शिक्षकप्रवृत्तिः**

विविधानां रामकथानां छात्रेभ्यः नामतः विवरणं प्रदातव्यम् ॥

●

# ७ दशकुमारचरितम्

**प्रस्तावना** – महाकवेः दण्डिनः सुप्रसिद्धा कृतिः दशकुमारचरितम् । इयं कृतिः गद्यकाव्यमस्ति । संस्कृतसाहित्ये यानि गद्यकाव्यानि सन्ति तेषु अग्रगण्यमिदं गद्यकाव्यम् । अस्मिन् दशकुमाराणां मुख्यत्वेन वर्णनमस्तीति कृत्वा अस्य दशकुमारचरितमिति नामकरणं कृतमस्ति ।

गद्यं कवीनां निकषं वदन्तीति जनश्रुतिः । तदनुसारं गद्यकाव्यप्रणयनं क्लिष्टं भवति । एतादृशं क्लिष्टकाव्यं यः रचयति सः कविरपि तादृशं कविसामर्थ्यं दधाति एव । अत एव दण्डिविषये कथ्यते–

**जाते जगति वाल्मीकौ कविरित्यभिधाभवत् । कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥**

अस्यायमाशयः – संस्कृतकाव्यजगति सत्सु अपि नैकेषु कविषु वस्तुतः त्रयः एव कवयः सन्ति । वाल्मीकिः व्यासः दण्डी च । एवं वदता केनचित् कविजनेन दण्डिनः काव्यकरणासामर्थ्यमेव परीक्षितमस्ति । अथ च – केनचित् 'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः' इति वदता दण्डिनः कवित्वमहिमैव आकारितोऽस्ति ।

दशकुमारचरितमाश्रित्यैवास्य महती महनीयतेति नात्र विप्रतिपत्तिर्विदुषाम् । गद्यकाव्यस्यैतस्य गौरवं पदलालित्यञ्च प्रेक्षं प्रेक्षं प्रेक्षावतां प्राप्यन्ते प्रचुर–प्रशस्तिपूर्णानि पद्यानि । पदलालित्ये या गतिः कवेरस्य न केनापि अपाक्रियते । अस्य पदलालित्यं शब्दसौष्ठवत्वं चावर्जयति सचेतसां चेतांसि, गुणोऽयं गरिमाणं तनुते काव्यस्य । अत एव सर्वस्वीकृताभिप्रायः– उपमा कालिदासस्य भारवेरर्थगौरवम् । दण्डिनः पदलालित्यम् – इति ।

अस्य खलु कवेः दशकुमारचरितं नाम गद्यकाव्यम्, काव्यादर्शः नाम काव्यशास्त्रीयः प्रबन्धः, अवन्तिसुन्दरी कथा चेति। अत एव राजशेखरेण प्रयुक्ता पङ्क्तिरेषा – **त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः । त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः** ॥ इति ॥

---

**कविपरिचयः**

महाकवेः दण्डिनः जीवनविषये यद्यपि किमपि विशिष्टं तथ्यात्मकं विवरणं न प्राप्यते, तथापि परम्परातः यत्किञ्चित् विवरणमुपलब्धमस्ति, तदनुसारं विद्वांसः दण्डिनः व्यक्तित्वं जीवनं चेत्थमाकारयन्ति । अयं महाकविः विक्रमसंवत्सरस्य सप्तम्यां शताब्द्यां समजनि ।

प्रो. विल्सन अस्य महाकवेः कालं एकादश–शताब्द्यां स्वीकरोति । दण्डिनं राज्ञः भोजस्य राज्यसभायाः सदस्यत्वेन स्वीकृत्य तेनेदं कथितमस्ति । परन्तु दण्डिनः कालस्तु तत्पूर्वमेव स्वीक्रियते, अतः भोजकालेन सह दण्डिनः कालप्रस्थापना कदापि स्वीकार्या भवितुं नार्हति ।

महाकवेः दण्डिनः प्रपितामहः आसीत् श्रीदामोदरः । तस्य विष्णुवर्धनेन नृपेण सह स्नेहमयी मैत्री आसीदित्यप्यनुमीयते। अत्र प्रमाणमस्तीदं वचनम् – स मेधावी कविर्विद्वान् भारविप्रभवां गिराम् । अनुरुध्याकरोन्मैत्रीं नरेन्द्रे विष्णुवर्धने।

दण्डिनः जन्मस्थलं तु काञ्जीवरं नाम्ना प्रसिद्धं नगरमस्ति, यत् खलु दक्षिणे दिग्विभागे स्थितमस्ति ॥

**दशकुमारचरितस्य कथावस्तु**

दशकुमारचरिते द्वे पीठिके स्तः । (1) पूर्वपीठिका (2) उत्तरपीठिका च । पूर्वपीठिकायां पञ्च उच्छ्वासाः निरूपिताः सन्ति, उत्तरपीठिकायां च अष्टौ उच्छ्वासाः वर्णिताः सन्ति ।

मगधदेशस्य पुष्पावतीनामिकायां नगर्यां राजहंसनामा कश्चित् नृपः राज्यशासनं करोति स्म ।अस्य राज्ञः धर्मपालः पद्मोद्भवः सितवर्मा चेति त्रयः मन्त्रिणः आसन् । एषु मन्त्रिषु धर्मपालस्य त्रयः, पद्मोद्भवस्य द्वौ सितवर्मणश्च द्वौ इति सम्मिल्य सप्त मन्त्रिपुत्राः आसन् । गच्छता कालेन राजहंसस्य एकः पुत्रः समुत्पन्नः । तस्य नाम राजवाहनः आसीत्।

एकदा वामदेवनामकेन ऋषिणा राजवाहनः दिग्विजयाय प्रयाणं कुर्यादिति राजहंसः प्रेरितः । ऋषिप्रेरितः पिता राजहंसः अन्यैः नवकुमारैः सह स्वीयं पुत्रं राजवाहनं दिग्विजयाय प्रेषितवान् ।

पूर्वमेते सङ्गत्यैव यात्रारताः आसन् ।परन्तु अल्पीयसा कालेनैवैते परस्परं विभक्ताः जाताः ।बहुकालानन्तरं पुनस्ते विभिन्नासु दिशासु परिभ्रमणं कृत्वा विविधान् नवनवान् अनुभवान् कृत्वा प्रत्यागताः । यात्रातः प्रतिनिवृत्ताः एते स्वीयान् स्वीयान् अनुभवान् घटिताः घटनाः परस्परं श्रावयन्ति ।यतो हि कुमाराः दश आसन् अतः दशकुमारचरितेऽस्मिन् कथाः अपि दश एव सन्ति । दशभिः कुमारैः कथितायाः कथायाः क्रमः एतादृशो वर्तते - प्रथमा सोमदत्तस्य कथा । द्वितीया पुष्पोद्भवस्य कथा । तृतीया राजवाहनस्य पराक्रमस्य कथा । चतुर्थी प्रहारवर्मणः पुत्रस्य अपहारवर्मणः कथा। पञ्चमी अपहारवर्मणः भ्रातुः उपहारवर्मणः कथा । षष्ठी अर्थपालस्य कथा । सप्तमी प्रमतेः कथा । अष्टमी मित्रस्य कथा । अस्यां कथायां धूमिनी-गोमिनी-निम्बवती-नितम्बवतीनां कथाः अपि समागच्छन्ति । नवमी मन्त्रगुप्तस्य कथा। अन्ते दशमी कथा विश्रुतस्य वर्तते ॥

**दशकुमारचरितस्य मङ्गलाचरणम्**

अथ दशकुमारचरितम् ॥ तत्र पूर्वपीठिका ॥ तत्रायं प्रथमोच्छ्वासः, प्रथमं पद्यम्-

**ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नाल दण्डः ।**

**क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।**

**ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः**

**श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥ 1॥**

**पदच्छेदः** - ब्रह्माण्डच्छत्रदण्डः (1.1) शतधृतिभवनाम्भोरुहः (1.1) नालदण्डः (1.1) क्षोणीनौकूपदण्डः (1.1) क्षरदमरसरित्पट्टिकाकेतुदण्डः (1.1) ज्योतिश्चक्राक्षदण्डः (1.1) त्रिभुवनविजयस्तम्भदण्डः (1.1) अङ्घ्रिदण्डः (1.1) श्रेयः (1.1) त्रैविक्रमः (1.1) ते (4.1) वितरतु (वि तृ लोट्लकारः, अन्यपुरुषः एकवचनम्) विबुधद्वेषिणाम् (6.3) कालदण्डः (1.1) ॥

**अन्वयः** - ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहः नालदण्डः क्षोणीनौकूपदण्डः क्षरदमर-सरित्पट्टिकाकेतुदण्डः ज्योतिश्चक्राक्षदण्डः त्रिभुवनविजयस्तम्भदण्डः अङ्घ्रिदण्डः, विबुधद्वेषिणां कालदण्डः त्रैविक्रमः ते श्रेयः वितरतु॥

**पदार्थः** - ब्रह्माण्डच्छत्रदण्डः - ब्रह्माण्डछत्रस्य दण्डः अर्थात् आधारयष्टिः, शतधृतिभवनाम्भोरुहः - शतधृतिः ब्रह्मा, तस्य भुवनम् - उत्पत्तिस्थानम्, तत्र संभूतस्य अम्भोरुहः अर्थात् कमलस्य, नालदण्डः क्षोणीनौकूपदण्डः- क्षोणी अर्थात् पृथ्वी, नौः नौका, तस्याः कूपस्य दण्डः यष्टिः क्षरदमर-सरित्पट्टिका-केतुदण्डः - क्षरन्ती या अमराणा-देवानां या सरित् नदी, सैव पट्टिका - तस्याः केतुदण्डः ध्वजदण्डः, ज्योतिश्चक्राक्षदण्डः - ज्योतिश्चक्रस्य अक्षदण्डः अर्थात् केन्द्रवर्ती दण्डः, त्रिभुवनविजयस्तम्भदण्डः - त्रयाणां भुवनानां विजयस्य स्तम्भदण्डः अर्थात् यूपस्य दण्डः, अङ्घ्रिदण्डः - अङ्घ्रिः पादः, स एव दण्डरूपः, सन् विबुधद्वेषिणाम् - देवेभ्यो ये द्वेषं कुर्वन्ति, तेषां कालदण्डः - कृतान्तः, त्रैविक्रमः ते - तव श्रेयः कल्याणं वितरतु - वितनोतु ॥

**टीका ( श्रीमत्कवीन्द्राचार्यसरस्वती-विरचिता-पदचन्दिकाभिधा दशकुमारचरितव्याख्या )**

**ब्रह्माण्डेति** । ब्रह्माण्डमेव छत्रे तस्य दण्डः आधारयष्टिः । ब्रह्माण्डं भुवनम् । शतधृतिर्ब्रह्मा । तस्य भवनमुत्पत्तिस्थानं वासस्थानं वा तद्भूतस्याम्भोरुहोऽम्भसि रोहतीति व्युत्पत्या कमलस्य । हान्तोऽयं शब्दः । क्षोणी पृथ्वीतद्रूपा या नौस्तरिस्तस्याः कूपदण्डो गुणवृक्षकः । 'डोलकाठी' इति भाषायाम् । क्षरन्ती प्रस्रवन्ती या अमरसरिद्वियद्गङ्गा सैव पट्टिका तस्याः केतुदण्डः । ज्योतिश्चक्रं ज्योतिःसमूहस्तस्याक्षदण्डो नाभिक्षेपं काष्ठम् । त्रयाणां भुवनानां समाहारस्त्रिभुवनं तस्य विजयस्तद्दर्शकः स्तम्भदण्डः । अङ्घ्रिश्चरणो दण्ड इवेत्युपमितसमासः । श्रेयोनिःश्रेयसं सुकृतं पुण्यं वा । अतिशयेन प्रशस्यम् । त्रैविक्रमस्त्रिविक्रमस्यायम् । वितरतु ददातु । विबुधद्वेषिणां दनुजानाम् । कालदण्डः कृतान्तः । मृत्युरिति यावत् । अस्तीति । निकषवदाचरति ।

## टिप्पणी

**समासपदानि** - ब्रह्माण्डच्छत्रदण्डः - ब्रह्माण्डमेव छत्रम् कर्मधारयः, तस्य दण्डः ष.तत्पु. । शतधृतिभवनाम्भोरुहः - शतधृतेः भवनम् - ष.तत्पु., शतधृतिभवनस्य अम्भः - ष.तत्पु., तत्र रोहतीति - उपपदतत्पु. । नालदण्डः - नालस्य दण्डः - ष.तत्पु. । क्षोणीनौकूपदण्डः - क्षोणी रूपा नौः - कर्मधारयः, तस्य कूपस्य दण्डः - ष.तत्पु. । क्षरदमरसरित्पट्टिकाकेतुदण्डः - अमराणा सरित् - अमरसरित् - ष.तत्पु., क्षरन्ती चासौ अमरसरित् च - कर्मधारयः, सैव पट्टिका - क्षरदमर-सरित्पट्टिका - कर्मधारयः, तस्याः केतुदण्डः - ष.तत्पु. । ध्वजदण्डः - ध्वजस्य दण्डः - ष.तत्पु. । ज्योतिश्चक्राक्षदण्डः - ज्योतिषां चक्रम् - ष.तत्पु., तस्य अक्षदण्डः - ष.तत्पु. । त्रिभुवनविजयस्तम्भदण्डः - त्रिभुवनस्य विजयः - ष.तत्पु., तस्य स्तम्भः - ष.तत्पु., तस्य दण्डः - ष. तत्पु. । अङ्घ्रिदण्डः - अङ्घ्रिः एव दण्डः - कर्मधारयः । विबुधद्वेषिणाम् - विबुधानां द्वेषिणः - ष. तत्पु. । कालदण्डः - कालरूपी दण्डः - कर्मधारयः ॥

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) कवीनां निकषं ................ अस्ति । (काव्यम्, पद्यम्, गद्यम्)

(2) दण्डिनः अपरा कृतिः ............. वर्तते । (काव्यादर्शः, दशरूपकम्, काव्यमीमांसा)

(3) दण्डिनः जन्मस्थलं .............. अस्ति । (उज्जयिनी, काञ्जीवरम्, काशी)

(4) राजवाहनस्य पिता ............... आसीत् । (राजहंसः, धर्मपालः, पद्मोद्भवः)

(5) शतधृतिः ............. अस्ति । (विष्णुः, शिवः, ब्रह्मा)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) राजशेखरेण दण्डिनः कति प्रबन्धाः कथिताः ?

(2) राजवाहनस्य पराक्रमकथा कस्मिन् उच्छ्वासे वर्तते ?

(3) कालदण्डस्य कोऽर्थः ?

(4) विबुधद्वेषिणः के सन्ति ?

(5) दशकुमारचरितस्य मङ्गलपद्ये स्मृता अमरसरित् का अस्ति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) दशकुमारचरितस्य मङ्गलाचरणपद्ये प्रयुक्ताः दण्डाः वर्ण्यन्ताम् ।

(2) दण्डिनः पदलालित्यम् उदाहरणमुखेन प्रस्थापयन्तु ?

(3) कस्य कुमारस्य कथा कस्मिन् उच्छ्वासे ग्रथिता ?

(4) ब्रह्माण्डच्छत्रदण्डः - इत्यत्र यः समासः, तं विवृणुत।

**4. संक्षेपतः परिचयं कारयत ।**

(1) त्रयो दण्डिप्रबन्धाः ।

(2) पदलालित्यम् ।

(3) राजवाहनः ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) गद्यं कवीनां निकषं वदन्ति ।

(2) दशकुमारचरितम् ।

(3) दशकुमारचरितस्य मङ्गलाचरणपद्यस्य भावार्थः ।

**छात्रप्रवृत्ति**

महाकवेः दण्डिनः काव्यादर्शविषये सामान्यबोधः करणीयः ॥

**शिक्षकप्रवृत्तिः**

दशकुमारचरितेषु कस्यचिदेकस्य चरितम् छात्रेभ्यः श्रावणीयम् ॥

●

# ८ शिवराजविजयः

**प्रस्तावना** – महाकविना श्रीमदम्बिकादत्तव्यासेन शिवराजविजयः नामकः अयमैतिहासिकः उपन्यासः रचितोऽस्ति।

अस्योपन्यासस्य निर्माणहेतुं प्रदिशन्नसौ कथयति – साम्प्रतं तु समयमहिम्ना भारतीय–वर्तमानभाषासु बहुधा गद्यकाव्यानि विरच्यन्ते । बङ्ग–गुर्जरादिभाषासूपन्यासैरेव व्याप्ता विपणयः । हिन्दीभाषापि च प्रत्यहमतिशयमासादयति गद्यसोपानेष्वेव पदाधाने। परं न केवलं प्राकृतिकगिरां गुरवो गीर्वाणगिरि व्युत्पतिगरीयांस उपलभ्यन्ते, न वा कांश्चिद् धन्य–धन्यान् विहाय संस्कृतसाहित्यव्युत्पन्ना एव, इतरभाषानुरक्ता विशेषतोऽविलोक्यन्ते । अत एव भारताभिजन–भाषा–कवयः प्रायः स्वभ्रमान् साक्षात् संस्कृतसाहाय्येन शोधयितुं न पारयन्ति, न वा भाषाकविसमादृतान् नवान् नवान् मनोरमान् चमत्कारविशेषाधायकान् पथोऽनुसर्तुं संस्कृतसाहित्यवैभवेषु च निधीन् वर्द्धयितुं संस्कृतज्ञा एव प्रायशः पारयन्ति । कदाचिद् वृन्दारकवृन्दवाण्यां गद्यकाव्य–प्रचार–दौर्बल्यस्येदमेव प्रधानं कारणं स्यात्। महदिदमुपहासास्पदं विडम्बनं यत् मण्डूक इव महापारावार–पारमासादयितुं यतमानस्तादृशं कविकौशलनिकषायितं गद्यकाव्यं मादृक्षः क्षोदीयान् जनः रिरचयिषुः संवृत्त इति ।

अस्य रचना खिष्टस्य 1888 तमे संवत्सरे प्रारब्धा । पञ्चदशवर्षपर्यन्तं सा प्रचलिता । प्रथमं तु अस्य प्रकाशनं संस्कृतचन्द्रिका नाम्ना प्रसिद्धायां संस्कृतपत्रिकायां षष्ठे सप्तमे च वर्षे प्रत्यङ्कं जातम् । स्वीयायाः नवीनायाः शैल्याः कारणात्, प्रेरकस्य विषयवस्तुनः कारणाच्चायमुपन्यासः एतावान् प्रसिद्धोऽभवत्, यदस्य बहुत्र बहूनि संस्करणानि प्रकाशितानि।

अयमुपन्यासः त्रिषु विरामेषु विभक्तोऽस्ति । प्रतिविरामं चत्वारः निश्वासाः सन्ति । एवं सम्मिल्य अस्मिन्नुपन्यासे द्वादश निश्वासाः सन्ति । अस्योपरि संस्कृतटीका अपि रचिता, हिन्दीभाषायामस्यानुवादोऽपि सम्पन्नः समुपलभ्यते ॥

---

**कविपरिचयः**

आधुनिके काले ये केचन सुप्रसिद्धाः कवयः सन्ति, तेष्वेकः व्यासोपाह्वः श्रीअम्बिकादत्तः । अयं खिष्टस्य 1858 तमे वर्षे जनिं लेभे । 1990 तमे च वर्षे दिवञ्जगाम । अस्मिन् द्विचत्वारिंशद्वर्षपरिमिते जीवने कविनानेन संस्कृतभाषायां सप्तविंशतिः ग्रन्थाः हिन्दीभाषायां च चतुष्षष्टिः ग्रन्थाः विरचिताः । एष्वेकतमः शिवराजविजयः ।

**कथावस्तु–**

उपन्यासस्यास्य प्रारम्भः एकस्मिन् आश्रमे भवति । अस्मिन् आश्रमे प्रवर्तिते प्रातःकाले कश्चिदेको बटुकः पुष्पचयनाय प्रस्थितोऽत्र वर्णितः । अयमेव प्रसङ्गोऽस्योपन्यासस्य मङ्गलाचरणमस्ति । तदनन्तरं वीरेण शिवराजेन समाचरितः भातृभूमेः मुक्तेः सङ्ग्रामः विस्तरतः सुचारु वर्णितः । यद्यपि कथावस्तु इदम्पूर्णतः ऐतिहासिकमस्ति तथापि मध्ये–मध्ये कविना कानिचित् पात्राणि, काश्चन घटनाः, किञ्चित् विवरणं चेति कविना कल्पितमप्यस्ति ।

बीजापुरस्य राजसभायां प्रेषितस्य अफजलखानस्य वधः, यशवन्तसिंहेन सह साक्षात्कारः, रोशनआराप्रणयः, शाइस्ताखानस्योपरि आक्रमणं, जयपुरनरेशस्य जयसिंहस्य सङ्गमः सन्धिश्च, देहलीराजसभायां शिवराजस्य उपस्थितिः, औरंगजेबद्वारा शिवराजस्य कारागारबन्धनम्, ततः छद्मना निष्क्रमणं, सततं प्रयत्य सतारानगरी राजधानीत्वेन संघोष्य सुखेन महाराष्ट्रस्य शासनम् चेति प्रधानवस्तु अत्र वर्णितमस्ति ।

**मङ्गलाचरणम्**

(क) विष्णोर्माया भगवती यया सम्मोहितं जगत् ॥ (भागवतम् 10.1.25)

हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते ॥ (भागवतम् 10.7.31)

**पदच्छेदः** – विष्णोः (6.1) माया (1.1) भगवती (1.1) यया (3.1) सम्मोहितम् (1.1) जगत् (1.1)॥

हिंस्रः (1.1) स्वपापेन (3.1) विहिंसितः (1.1) खलः (1.1) साधुः (1.1) समत्वेन (3.1) भयात् (5.1) विमुच्यते (वि मुच् लट्कलकारः अन्यपुरुषः, एकवचनम्)॥

**अन्वयः** – विष्णोः (एका) भगवती माया (अस्ति) यया (इदम्) जगत् सम्मोहितम् (वर्तते) ॥

हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयात् विमुच्यते ॥

**प्रथमविरामपाठांश :**

(क) अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः । एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः, कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य । अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्करीति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते । धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामिति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रबटुः ॥

**टीका ( श्रीरामजीपाण्डेयविरचिता वैजयन्तीटीका )**

कथाभागं प्रारभमाणो भगवदादित्यप्रकाशात्मकवस्तुनिर्देशरूपमिति । मङ्गलं समाचरति- अरुण एष इति । पूर्वस्यामिति- 'दिशि' इति विशेष्यम् । मरीचीनां मालाऽस्यास्तीति मरीचिमाली-तस्य, सूर्यस्य । अरुणः = ईषल्लोहितः 'ज्योतिषां रविरंशुमान्' इति भगवद्विभूतिसमूहपातित्वेन भगवत्त्वं सर्वथा स्फुटम् । अथाऽऽदित्यं विशिनष्टि एष भगवानिति । 'दिनस्य' इत्यन्तं मालारूपकालङ्कारो वैदर्भी रीतिः प्रसादाख्यश्च गुणः । मणिः = रत्नम् । यथा हीरकादिरन्धकारं वारयति प्रकाशयति च पदार्थसार्थं तथाऽयमपि । बाह्याभ्यन्तरतमोऽपवार्य प्रकाशयति सकलानर्थानिति मणित्वेन रूपणम् । खे नभसि चरन्ति गच्छन्तीति खेचराः = भगणाः, तेषां चक्रस्य = समूहस्य, चक्रवर्ती = सम्राट् । आखण्डलदिशः = इन्द्रसम्बन्धिन्याः प्राच्या नायिकायमानायाः । कुण्डलम् = कर्णाभरणविशेषः। वर्त्तुलत्वमारोपबीजम् । ब्रह्माण्डमेव भाण्डम् = सदनम्, तस्य दीपकः । पुण्डरीकाणाम् = कमलानाम्, पटलस्य = समूहस्य । प्रेयान् = अतिशयेन प्रियः। कोकानाम् = चक्रवाकाणाम्, लोकस्य = समुदायस्य । शोकस्य विमोकः = मोक्षः । रूपकम् । कोकमिथुनानां रात्रिविरहः कविसमयख्यातः । रोलम्बानाम् = भ्रमराणाम्, कदम्बस्य = समूहस्य । अवलम्बः = आश्रयः । सर्वश्चासौ व्यवहारः = ऐहिकामुष्मिकलक्षणो व्यापारः, तस्य, सूत्रधारः = प्रवर्त्तयिता । दिनस्य, इनः = स्वामी । अथ स्वभावोक्त्याऽलङ्करोति तमेव भगवन्तमयमेवेति । अहश्च रात्रिश्चाहोरात्रस्तम् । द्वादशसु भागेषु = मेषादिमासरूपेषु। विभनक्ति = विभजते । षण्णामृतूनाम् = वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराणाम् । कारणम् = हेतुः । अयनम् = सूर्यमार्गः । युगानाम् = कृतत्रेताद्वापरकलीनाम् । भेदाः = विभागाः । एनेनैव सूर्येणैव। कल्पभेदाः। परमेष्ठिनः = विधातुः । परार्द्धसङ्ख्या = अन्तिमा परार्धनाम्ना ख्याता सङ्ख्या । चर्करीति = पुनः पुनः करोति । वन्दिनः = स्तुतिपाठकाः । वेदाः = ऋग्यजुःसामाथर्वाभिधाः । ब्रह्मणि निष्ठा येषां ते, वेदपारगा इत्यर्थः । उपतिष्ठन्ते = उपासते । भास्वन्तम् -सूर्यम् । ह्रस्वा कुटी कुटीरः । गुरुसेवने पटुः = कुशलः । विप्रश्चासौ विप्रस्य वा बटुर्विप्रबटुः = ब्राह्मणब्रह्मचारी ।

## टिप्पणी

**समासपदानि** - टीकानुसारं द्रष्टव्यानि ।

### स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) शिवराजविजयस्य काव्यप्रकारः अस्ति ? (कथा, आख्यायिका, उपन्यासः)

(2) शिवराजविजयस्य कर्ता कः अस्ति ? (अम्बिकादत्तव्यासः, भोजराज, रामचन्द्रः)

(3) शिवराजविजये सम्मिल्य कति निश्वासाः सन्ति ? (12, 16, 3)

(4) शिवराजविजयस्य प्रारंभे कविना कस्य पुराणस्य वचने उद्धृते स्तः ? (शिवपुराणस्य, भागवतस्य, विष्णुपुराणस्य)

(5) मरीचिमाली अस्ति ? (भगवान्, सूर्यः, ब्रह्मा)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) शिवराजविजयस्य कथा कस्मिन् काले प्रारब्धा भवति ?

(2) ब्रह्माण्डभाण्डस्य दीपकः कः ?

(3) विष्णोः माया किं करोति ?

(4) कः वत्सरं द्वादशसु भागेषु विभनक्ति ?

(5) शोकविमोकः - कोऽस्ति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) शिवराजविजयस्य कथावस्तु संक्षेपतो लिखत ?

(2) चर्कर्ति बर्भति जर्हर्ति च जगत् - इत्यस्य किं तात्पर्यम् ?

(3) ब्रह्माण्डभाण्डम् - इत्यस्मिन् पदे कः समासः ?

(4) भगवान् मरीचिमाली किं किं करोति ?

(5) भास्वति प्रणतिहेतुः कः ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) भागवतपुराणम् ।

(2) अम्बिकादत्तव्यासः ।

(3) सूर्यवर्णनम् ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) भगवती शब्दस्य अर्थः ।

(2) शिवराजविजयनिर्माणहेतुः ।

(3) सूर्ये ब्रह्मदृष्टिः ।

**छात्रप्रवृत्तिः**

मातृभाषायाम् लिखितम् शिवराजस्य जीवनवृतम/पठनीयम् ।

**शिक्षकप्रवृत्तिः**

आधुनिकगद्यविद्यायाः उपन्यासनामिकायाः परिचयः छात्रेभ्यः कारणीयः॥

# ९ हर्षचरितम्

**प्रस्तावना** – संस्कृतगद्यकाव्यजगति सुप्रसिद्धः महाकविः बाणः । अयं बाणभट्टनाम्ना अपि प्रसिद्धोऽस्ति । अस्य द्वे कृती प्रसिद्धे स्तः (1) हर्षचरितम् (2) कादम्बरी ।

महाकविः बाणभट्टः गद्यकाव्यजगतः सम्राट् वर्तते । बाणभट्टस्य कविताकामिनीविषये कवित्वसामर्थ्यविषये च गोवर्धनाचार्यस्य प्रशंसावचनमिदमस्ति – जाता शिखण्डिनी प्राक् यथा शिखण्डी तथाऽवगच्छामि । प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति ॥

धर्मदासनामकः कविः स्वीये विदग्धमण्डननामके ग्रन्थे स्वयमेव प्रश्नं कृत्वा तस्योत्तरूपेणैवमाह–

"रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति । सा किं तरुणी नहि नहि वाणी बाणस्य मधुरशीलस्य ॥" महाकविः जयदेवः ब्रूते – हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः इति । अथ च बाणोच्छिष्टं जगत्सर्वम्, कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते – इत्यादयः बह्व्यः उक्तिनट्यः सहृदयानां वदनरङ्गे नरीनृत्यन्ति ।

हर्षचरितं हि अष्टसूच्छ्वासेषु विभक्ता आख्यायिका । तत्र प्रथमद्वितीयोच्छ्वासयोः वंशवर्णनम्, तृतीये राज्ञः हर्षस्य पूर्वजपुरुषस्य पुष्पभूतेर्वर्णनम्, चतुर्थे प्रभाकरवर्धनस्य शौर्यगाथा, राज्यवर्धन–हर्षवर्धनयोर्जन्मकथा, राज्यश्रियो जन्म, तस्याः ग्रहवर्मणा सह विवाहश्च वर्णितः । पञ्चमे राज्यवर्धनस्य हुणविजयार्थं प्रस्थानं प्रभाकरवर्धनस्य निधनञ्च वर्णितमस्ति। षष्ठे राज्यवर्धनस्य प्रत्यागमनम्, मालवनरेशेन कृतः ग्रहवर्मणो वधः, राज्यश्रियः निरोधः, राज्यवर्धनेन मालवराजपराजयः, गौडसेनेन शशाङ्केन राज्यवर्धनस्यच्छलेन कृतो वधः, सप्तमे हर्षस्य गौडनरेशवधाय प्रस्थानम्, राज्यश्रिया विन्ध्याटव्यां पलायनम्, तदन्वेषणाय हर्षस्य प्रयासश्च वर्णितोऽस्ति । अष्टमे राज्यश्रियः अन्वेषणं तया सह हर्षस्य प्रत्यागमनञ्चेति घटनाद्वयम् ग्रथितमस्ति ।

कथावस्तुपरिशीलनेन ग्रन्थस्यास्यापूर्णता स्पष्टरूपेण द्योतते । एवं हि कथ्यते यत् हर्षनिधनानन्तरं कविरेतदन्तरकथानिबन्धने मन्दादरोऽभूदिति ॥

---

**कविपरिचयः**

वात्स्यायनमहर्षेः वंशे लब्धजन्मा अयं महाकविः हर्षवर्धनस्य आस्थाने कविरासीदित्यवगम्यते । श्रीहर्षवर्धनसार्वभौमस्य कालः ख्रि. श. 606 – 648 इति तु प्रसिद्ध एवास्ति । अतः बाणस्यापि कालः सप्तमशतकस्यादिभागः इति निर्णेतुं शक्यते। वस्तुतः संस्कृतप्राचीनकविषु बाण एवैतादृशो यस्य स्थितिकालः परिवारजनानां च परिचयः सुस्पष्टः ।

एवं हि कथ्यते यत् श्रीहर्षः 663 तमे वैक्रमाब्दे राज्येऽभिषिक्तो बभूव । ततः 705 तमे वैक्रमाब्दे स तनुं तत्याज। अस्य सभापण्डिततत्वेन बाणः यदा प्रस्थापितः तदासौ पञ्चविंशतिवर्षवयस्कः आसीत् । स च 670 तमे वैक्रमाब्दे प्रविष्टः इति मन्यते। एवमस्य जन्म प्रायः 645 तमे वैक्रमाब्दे बभूवेति निश्चितं भवति ।

वात्स्यायनवंशजः 'चित्रभानुः' पिता माता च 'राजदेवी' आसीत् । शैशवे एवास्य मातृवियोगोऽभवत् । तदनन्तरं पिता एव जननीव बालस्य रक्षणं पोषणं च चकार । समुचिते वयसि विधिवत् उपनयनादिसंस्कारान् विधाय जनकः समुचितं शिक्षणं च प्रददौ । चतुर्दशे वयसि पितापि दिवंगतः । एतेन खिन्नः बाणः स्वस्य यौवनारम्भे किंकर्तव्यतामूढः स्वीयं ग्रामं गृहं प्रियान् मित्राणि च त्यक्त्वा एकाकी सन् नानादेशान् बभ्राम । एवं भ्रमता बाणेन शूद्रस्त्रीसञ्जातौ चन्द्रसेनमातृषेणौ, भाषाकविः ईशानः, वारबाण–वीसबाण–नामानौ विद्वांसौ, वर्णकविः वेणीभारतः जाङ्गलिकः (विषवैद्यः) मयूरः, भिषक्पुत्रः मन्दारकः इत्यादयः बहवः नूतनाः सुहृदः सम्प्राप्ताः ।

बहुकालं यावत् देशाटनं कृत्वा पुनः सः स्वीयं ग्रामं प्रीतिकूटं प्रत्याजगाम । अत्रासौ संगोष्ठीषु कालयापनं कुर्वन् आसीत्।

बाणस्य स्वग्रामागमनं पाण्डित्यं च जनैः श्रुत्वा एकदा हर्षस्य आस्थानपण्डितमण्डल्यां बाणस्य प्रवेशं कल्पयामास। ततः किञ्चित्कालानन्तरं बाणः हर्षस्य आप्तमित्रम् अभवत् । बाणः स्वस्याश्रयदातुः हर्षस्य जीवनचरितत्वेन हर्षचरितनामकं ग्रन्थमिमं गद्यरूपेण न्यबध्नात् ।

हर्षानुजः कृष्णो बाणं नैकट्येन जानाति स्म । किन्तु श्रीहर्षस्तु प्रथमं तं नाङ्गीचकार । ततः पश्चाज्ज्ञातयथार्थस्तं सभाध्यक्षं न्ययोजयत् । हर्षनिधनानन्तरमपि बाणो जीवित एवाऽसीत् । तेन स्वीयं शेषजीवनं स्वकीये प्रीतिकूटग्रामे एव व्यत्यापयत्।

संस्कृतकाव्यरसिकः को वास्ति अस्मिन् जगति यो न जानाति बाणभट्टस्य शुभनाम । बाणोच्छिष्टं जगत् सर्वम् इति प्रशस्तिपरा उक्तिरेव सूचयति प्रतिभासामर्थ्यं बाणकवेः । अनेन कथासाहित्ये प्रवर्तितो नवः मार्गः । तस्य वर्णनानैपुण्यं नितान्तमेव श्लाघ्यमस्ति । स ह्यलङ्कृतकृत्रिमपद्धतिमनुसरति बहुशः । स्वयमेव स उद्घोषयति यत्-

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः । विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ॥ इति ॥

अत्र वर्णितं निखिलमपि दुर्लभमेकत्र दृष्टिपथमायाति बाणकृतिषु । वस्तुतः तस्य काव्ये नैकविधं वैशिष्ट्यमस्ति। तस्य कथा रसेन शय्यां स्वयमभ्युपागताऽभिनवा वधूरिव मनोहारिणी हृद्या च विद्यते । बाणस्य बुद्धिः सर्वतोगामिनी नवनवोन्मेषशालिनी च । स न केवलं वर्णनानिपुणः अपि तु सूक्ष्मदर्शी दक्षश्चित्रकारश्च । घटनायाः सजीवोपस्थापनं तु तस्य वामहस्तविलास एव । विषयानुसारमेव तस्य शैली नृत्यति दीर्घसमासवती स्वल्पसमासा समासरहिताऽपि । वर्णनापरायणोऽपि स कदापि काव्यौचित्यं नैवोल्लङ्घयति ।

यद्यपि बाणस्य कृतौ क्लिष्टता, अलङ्कारभारः, समूहबद्धविशेषणदुरूहवाक्यानि, असाधारणपदावली, अप्रचलितप्रयोगश्चेति प्रभृतिदोषा अपि प्रदर्श्यन्ते, तथापि यद्ययं दोषः स युगस्यैव न तु कवेः । तदा तादृश्येव रचना प्रशस्याऽसीत् ।

**हर्षचरितस्य मङ्गलाचरणम् ॥**

**नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे । त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥ 1.1 ॥**

**पदच्छेदः** - नमः (अ.) तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे (4.1) त्रैलोक्यनगरारम्भमूलस्तम्भाय (4.1) शम्भवे (4.1) ॥

**अन्वयः** - तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे नमः ॥

**पदार्थः** - तुङ्गमुच्छ्रितं द्युलक्षणं यच्छिरः तच्चुम्बिचन्द्र एव चामरं तेन चारवे, त्रैलोक्यमेव नानाभङ्गिशोभित्वान्नगरं तदारम्भे मूलस्तम्भः, तस्मै नमः अर्थात् नमस्कारः अयमित्युच्यते ॥ 1 ॥

**हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् । कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥ 1.2 ॥**

**पदच्छेदः** - हरकण्ठग्रहानन्दमीलिताक्षीम् (2.1) नमामि (नम् लट्लकारः, उत्तमपुरुषस्य एकवचनम्) उमाम् (2.1) कालकूटविषस्पर्शजातमूर्च्छागमाम् (2.1) इव (अ.) ॥

**अन्वयः** - हरकण्ठग्रहानन्दमीलिताक्षीम् कालकूटविषस्पर्शजातमूर्च्छागमाम् इव उमाम् नमामि ॥

**पदार्थः** - हरस्य कण्ठस्य ग्रहेण संजातस्य आनन्दस्य कारणात् मीलिते अक्षिणी यस्याः सा, ताम्, कालकूटविषयस्य स्पर्शात् जातायाः मूर्च्छायाः आगमः प्रारम्भः यस्याः सा, ताम् इव उमां पार्वतीं नमामि-नमनं करोमि, प्रणामं करोमि ॥

**टीका** - संप्रत्युत्कृष्टकवित्वाभिमानेन तादृशमेव कविवरं स्तौति -

**नमः सर्वविदे तस्मै व्यासाय कविवेधसे । चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥ 1.3 ॥**

**पदच्छेदः** - नमः (अ.) सर्वविदे (4.1) तस्मै (4.1) व्यासाय (4.1) कविवेधसे (4.1) चक्रे (कृ परोक्षे लिट्लकारः, अन्यपुरुष-एकवचनम्) पुण्यम् (2.1) सरस्वत्या (3.1) यः (1.1) वर्षम् (1.1) इव (अ.) भारतम् (2.1) ॥

**अन्वयः** - तस्मै सर्वविदे कविवेधसे व्यासाय नमः । यः पुण्यं भारतं सरस्वत्या वर्षमिव चक्रे ॥

**पदार्थः** – सर्वविदे – सर्वाः विद्याः वेत्ति यस्तस्मै, कविरेव वेधाः, तेषां कवीनां वेधाः अर्थात् कविबुद्धीनां श्रेष्ठः यः तस्मै व्यासाय तन्नामकाय मुनये नमः । यः व्यासः खलु पुण्यं पावनं भारतं तन्नामकं देशं सरस्वत्याः वाण्याः वर्षं वृष्टिमिव चक्रे – कृतवान् ॥

**( क ) सतां हि प्रियंवदता कुलविद्या ॥ ( प्रथमः उच्छासः )**

**अन्वयः** – प्रियंवदता हि सतां कुलविद्या ( भवति) ।

**संदर्भः** – हर्षचरितस्य प्रथमोच्छ्वासे यदा सावित्री पार्श्वश्चरं दधीचिविषये पृच्छति, तदा पार्श्वश्चरमेतत् वाक्यं सावित्रीम् सम्बोध्य ब्रवीति ।

**विमर्शः** – जगति ये सज्जनाः सन्ति, ते प्रायः प्रियं वदन्ति । तस्मादियं धारणा प्रवर्तते सुज्ञेषु यत् यः खलु प्रियं वदति, सः सज्जनो भवतीति । सज्जनाः कथं प्रियं वदन्तीति प्रश्ने तस्योत्तरमत्र कविना प्रस्तुतम् – प्रियंवदता सताम् अर्थात् सज्जनानां कुलेन प्राप्ता विद्या भवति । अस्यायमाशयः – ये खलु सज्जनाः सन्ति ते यस्मिन् कुले जन्म धारयति, तस्मिन् कुले प्रियंवदता नाम विद्या जन्मना सहैव जातकेभ्यः प्राप्यते । अतः बाणेन कविना अस्मिन् वाक्ये कथितमस्ति यत् प्रियंवदता सतां कुलविद्या भवतीति ॥

**( ख ) अक्षीणः खलु दाक्षिण्यकोशो महताम् ।**

**अन्वयः** – महताम् ( जनानाम्) खलु दाक्षिण्यकोशः अक्षीणः ( भवति) ।

**संदर्भः** – इदं वाक्यं राज्ञः शर्यातस्य आज्ञाकारी विकुक्षिनाम भृत्यः वदति ॥ प्रथमे उच्छ्वासे ।

**विमर्शः** – महतां महात्मनां दाक्षिण्यकोशः अर्थात् उदारतायाः भण्डारः कदापि क्षीणो न भवति । यथा खलु विपुलस्य धनस्य भण्डारः प्रतिदिनमुपयुज्यते, चेत् कालान्तरे सः क्षीणतां प्रयाति, तथा महात्मनां उदारताकोशः प्रतिदिनं प्रतिक्षणं च उपयुज्यमानोऽपि न कदाचित् क्षीणो भवति ।

यः भण्डारः उपयोगेन क्षीणो भवति, तस्योपयोगविषये कदाचित् क्रियमाणं कार्पण्यम् उचितं भवितुमर्हति, परन्तु यः भण्डारः उपयोगेन कदाचिदपि क्षीणो न भवति, तस्य प्रभूतोपयोगविषये कदाचिदपि कार्पण्यम् उचितं नास्ति । महन्तः जनाः एतत् जानन्ति, अतः ते स्वीयस्य दाक्षिण्यकोशस्य भृशम् उपयोगं कुर्वन्ति । महतामेतादृशमाचारं दृष्टिसमक्षं प्रस्थाप्य भृत्यादि–सामान्यजनानामयमभिप्रायः यत् महतां दाक्षिण्यकोशः अक्षीणो भवतीति ॥

**( ग ) न किञ्चिन्न कारयत्यसाधारणा स्वामिभक्तिः ॥ ( प्रथमः उच्छ्वासः )**

**अन्वयः** – असाधारणा स्वामिभक्तिः किञ्चित् न कारयति (इति) न ॥

**संदर्भः** – सावित्र्याः प्रति मालत्याः वचनमिदं प्रथमोच्छ्वासे हर्षचरिते ॥

**विमर्शः** – स्वामिभक्तिः द्विधा भवति – साधारणा असाधारणा चेति । या साधारणा स्वामिभक्तिरस्ति सा स्वामिभक्तेन तान्येव कार्याणि कारयति, यानि प्रायः सामान्यानि भवन्ति । अथवा एतादृशः स्वामिभक्तः तादृशानि कार्याणि करोति, येषु कार्येषु स्वीयाः विपदः आत्महानेर्वा संभावना न भवति । परं यस्य स्वामिभक्तस्य स्वीये स्वामिनि असाधारणा स्वामिभक्तिर्भवति, सः असाधारणभक्तिमान् भक्तः स्वामिनः सर्वाणि कार्याणि साधयति । येषु कार्येषु स्वीयाः विपदः आत्महानेर्वा संभावना भवति, तानि कार्याण्यपि सः मुदा करोति। अतः एवं हि दृश्यते लोके असाधारणस्वामिभक्तिवशात् स्वामिभक्तः तादृशमेकमपि कर्म नास्ति यत् स्वामिभक्तिः न करोति। वस्तुतः असाधारणा स्वामिभक्तिः कञ्चित् कर्म नास्ति यत् सा न कारयति । अर्थात् असाधारणा स्वामिभक्तिः स्वामिनः सर्वाणि कार्याणि साधयत्येव ।

**( घ ) सलिलानीव गतानुगतिकानि लोलानि खलु भवन्त्यविवेकिनां मनांसि ॥**

**अन्वयः** – अविवेकिनां (जनानां) खलु मनांसि सलिलानीव गतानुगतिकानि लोलानि भवन्ति ।

**संदर्भः** – वाक्यमिदं बाणं प्रति मेखलकः ब्रवीति । (हर्षचरितस्य द्वितीयोच्छ्वासे)

**विमर्शः** – अस्मिन् वाक्ये अविवेकिजनानां मनसः वर्णनमस्ति । अस्मिन् वर्णने मनः सलिलेन उपमितं वर्तते । सलिलानि यथा गतानुगतिकानि लोलानि च भवन्ति, तथा ये खलु अविवेकिनः भवन्ति, तेषां मनांसि अपि गतानुगतिकानि लोलानि च भवन्ति ।

अत्र किं नाम गतानुगतिकम् इति प्रश्ने तस्योत्तरम् – गतस्य पदार्थस्य अनुगमनं कृत्वा यस्य पदार्थस्य गतिर्भवति, सः पदार्थः गतानुगतिकः कथ्यते । नद्यादिषु यत् सलिलम् वहति, तत् सर्वमपि गतानुगतिकम् भवति । अथ च किं नाम लोलमिति पृष्ठे सत्युत्तरमस्ति – इतः ततः गतिकरणं लोलः । यथा खलु नद्यन्तर्गतानि जलानि कदाचित् इतः वहन्ति कदाचित् च ततः वहन्ति । एवं सलिलस्य यथा गतानुगतिकत्वं लोलत्वं च वर्तते, तथैव अविवेकिजनानां मनांसि अपि गतानुगतिकानि लोलानि च भवन्तीति सारः ।

**( ङ ) क्षमा हि मूलं सर्वतपसास् ।**

**अन्वयः** – सर्वतपसां मूलं क्षमा हि (भवति) ।

**संदर्भः** – पितामहः ब्रह्मा दुर्वाससं प्रति वाक्यमिदं वदति । प्रथमोच्छ्वासे ॥

**विमर्शः** – बहुविधानि तपांसि भवन्ति । तेषां सर्वविधानां तपसां मूलं यदि किमपि वर्तते तत् क्षमा अस्ति । सर्वेषां तपसां क्षमामूलरूपमस्ति । नास्ति मूलम् कुतः शाखा इति न्यायेन तपसां मूलं क्षमा एव नास्ति चेत् अन्यानि शाखारूपाणि तपांसि कुतः भवितुमर्हतीति भावः । वस्तुतस्त्वत्र क्रोधवते दुर्वाससे ब्रह्मा क्षमायाः महत्त्वम् उपदिशति । क्षमापूर्वकं ते जीवनं भवेदिति सात्विकीमपेक्षां सेवते इतिदिक् ॥

## टिप्पणी

**समासपदानि** – तत्तत् पद्यस्य टीकातः एव ज्ञातव्यानि ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) हर्षचरितस्य काव्यप्रकारः ............. वर्तते । (कथा, आख्यायिका, उपन्यासः)

(2) गोवर्धनाचार्यः कविं बाणं ............. रूपेण वर्णयति । (कविरूपेण, वाणीरूपेण, ब्रह्मरूपेण)

(3) हर्षचरितस्य प्रथमे पद्ये ............ नमः करोति । (ब्रह्मणे, शम्भवे, उमायै)

(4) हर्षमते कविवेधः ............. अस्ति । (व्यासः, ब्रह्मा, विष्णुः)

(5) सतां कुलविद्या ............... वर्तते । (राजनीतिः, प्रियंवदता, वेदविद्या)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) पञ्चबाणस्तु बाणः – कः कथयति ?

(2) हुणविजयार्थ कः प्रस्थितः ?

(3) बाणस्य वंशः कः ?

(4) मूलस्तम्भः कदा भवति ?

(5) हर्षेण व्यासस्य कानि कानि विशेषणानि प्रयुक्तानि सन्ति ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) कविहर्षस्य जीवनवृत्तान्तं लिखत ।

(2) हर्षचरितस्य प्रथमपद्ये शम्भोः विशेषणम् किम्?

(3) तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे – इति विशेषणपदं विवृणुत ।

(4) वर्षमिव भारतम् – इत्यस्य तात्पर्यं लिखत ।

**4. संक्षेपतः परिचयं कारयत ।**

(1) महाकविः बाणः ।

(2) हर्षचरितस्य कथावस्तु ।

(3) हर्षचरितस्य प्रथमं पद्यम् ।

**5. सूक्तिविवेचनं कुरुत ।**

(1) सतां हि प्रयंवदता कुलविद्या ।

(2) अक्षीणः खलु दाक्षिण्यकोशो महताम्।

(3) क्षमा हि मूलं सर्वतपसाम् ॥

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) आख्यायिका ।

(2) कृत्स्नमेकत्र दुर्लभम् ।

(3) त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे नमः ॥

**छात्रप्रवृत्ति**

हर्षस्य वंशपरिचयः ज्ञातव्यः ।

**शिक्षकप्रवृत्तिः**

बाणस्य वंशपरिचयः छात्रेभ्यः पाठनीयः ॥

●

# १० कादम्बरी

**प्रस्तावना** – संस्कृतकाव्यं मुख्यतया द्विविधम् अस्ति – दृश्यं श्रव्यं च । तत्र दृश्यं नाम रूपकाणि नाटकादीनि। श्रव्यं पुनः त्रिविधं गद्यं पद्यं चम्पूः चेति । तत्र गद्यं कथावस्तुदृष्ट्या द्विविधं कथा आख्यायिका च । यत्र प्रसिद्धा कथा उपवर्ण्यते सा आख्यायिका, यथा हर्षचरितम् । यत्र च काल्पनिकी कथा निरूप्यते सा कथा, यथा कादम्बरी। श्रव्ये पद्यस्य पुनः अनेके भेदाः महाकाव्यादयः भवन्ति ते नात्र विविच्यन्ते ।

गद्यकाव्येषु महाकविबाणभट्टविरचिता कादम्बरी अनुपमं स्थानम् अलङ्करोति ।कादम्बर्याः मूलं तु गुणाढ्यस्य बृहत्कथा अस्ति किन्तु बाणभट्टेन परिवर्तनेन सह अतुल्या सरसा इयं कादम्बरी सहृदयहृदयचषके सम्पूरिता । अस्याः निरूपणशैलीम् अवलोक्यैव केनचिदुक्तम् – 'कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते' इति ।कादम्बरी पूर्वार्द्धः उत्तरार्द्धः इति विभागद्वये वर्तते। पूर्वार्द्धं महाकविः बाणभट्ट : व्यरचयत्, उत्तरार्द्धं च बाणपुत्रः पुलिन्दभट्टः समपूरयत् । अतः उच्यते तिलकमञ्जर्याम्–

**केवलोऽपि स्फुरन् बाणः करोति विमदान् कवीन् ।**
**किं पुनः कृतसन्धानः ( क्लृप्तसन्धानः ) पुलिन्दकृतसन्निधिः ॥**

अस्मिन् पाठे कादम्बरीकर्तुः परिचयः, मङ्गलश्लोकाः, कादम्बर्याः कथासारः इति सर्वं प्रस्तूयते ।

**बाणभट्टस्य जीवनपरिचयः**

महाकविः बाणभट्टः भगवत्याः शारदायाः वरदपुत्रः आसीत् । तस्योपरि लक्ष्मीसरस्वत्योः उभयोः महती कृपा समभावेन विद्यमाना आसीत् । राजसभायां कविसमाजे च तस्य समादरः भवति स्म । इत्यत्र न कोऽपि संशयः । महाकविचूडामणिः अयं हर्षचरिते स्वजीवनं विस्तरेण वर्णितवान् । सः परिचयः न केवलं जीवनचरितज्ञानाय अपि तु साहित्यिकदृष्ट्या अपि अनुपमः अस्ति ।

बाणभट्टः शोणनदस्य तटे प्रीतिकूटनामनगरे निवसति स्म । हर्षचरितानुसारं तस्य वंशपरम्परा इत्थम्–



एतत् दृष्ट्वा ज्ञायते यत् बाणभट्टस्य पिता चित्रभानुः माता राजदेवी च आसीत् । बाल्ये एव अस्य माता दिवङ्गता । बाणभट्टः चतुर्दशवर्षीयः आसीत् तदा तस्य पिता चित्रभानुः अपि परलोकं जगाम । ततः बाणभट्टः मित्रैः सह ग्रामाद् ग्रामम् अटन् कालान्तरेण स्वनगरं प्रत्याजगाम । स्वमित्रेषु विविधाः कलाज्ञातारः आसन् । ताम्बूलिकः, चौरः, आरक्षकः, सैनिकः, भिक्षुकः, संन्यासी, लम्पटः, पण्डितः, मूर्खः इत्यादय सर्वेऽपि तस्य सखायः आसन् । अतः बाणभट्टः अनेकासु कलासु विद्वान् आसीत् ।

स्वपाण्डित्यप्रकर्षेण सः स्थानेश्वरराजधान्यां महाराजहर्षवर्धनस्य सभायां सर्वोत्कृष्टं पदं प्राप्तवान् । पदप्राप्तेः पूर्वं केनचित् दुष्टेन राजा उक्तः यत् बाणः अतिदुष्टः अस्ति इति । राज्ञा आहूतः बाणभट्टः सभां प्राविशत् । तदा केनचिदुक्तम् यत् 'महान् अयं भुजङ्गः' इति । बाणभट्टः झटिति पप्रच्छ 'का मे भुजङ्गता ?' श्लेषपूर्णायाः उक्तेः द्वौ अर्थौ भवतः । प्रथमः अर्थः प्रश्नः यत् 'मदीया भुजङ्गता का ?' इति । द्वितीयः अर्थः भवति 'कामे = मदने भुजङ्गता = वक्रता अस्ति, मयि न' इति । अनेन एव चमत्कृतः राजा स्वसभायां बाणभट्टाय उत्कृष्टं स्थानं प्रादात् ।

**बाणभट्टस्य कालः**

सुबन्धोः अनन्तरं बाणभट्टस्य सम्भवः जातः । किञ्च हर्षचरिते बाणभट्टः व्यास-भास-कालिदासादीन् प्रणनाम अतः सः तेषाम् अनन्तरं जातः इति स्पष्टम् । बाणभट्टः सम्राजः हर्षवर्धनस्य सभापण्डितः आसीत् । हर्षवर्धनः सप्तमशताब्द्यां जातः । अतः बाणोऽपि तत्समकालीनः प्रतीयते । अस्मिन् विषये विवादः मतान्तरं वा प्रायः नास्त्येव । हर्षवर्धनस्य कालः प्रायः 604 ख्रीष्टाब्दात् 647 ख्रीष्टाब्दं यावत् मन्यते अतः बाणभट्टस्य कालः अपि अयमेव भवेत्।

**बाणभट्टस्य कृतयः**

बाणभट्टस्य नाम्ना चतस्रः कृतयः अभिधीयन्ते । तत्र गद्यकाव्ये नाटके च स्तः । गद्यकाव्ये द्वे (1) हर्षचरितम् (2) कादम्बरी तथा नाटके द्वे (1) पार्वतीपरिणयम् (2) मुकुटताडितकम् इति । हर्षचरितम् आख्यायिकाप्रकारकं गद्यकाव्यम् अस्ति यस्मिन् आदौ कविना स्वकीयः परिचयः विस्तरेण प्रदत्तः अस्ति । कादम्बरी कथाप्रकारकं गद्यकाव्यम् अस्ति यत्र बाणभट्टस्य कल्पनाविश्वं विलसति । पार्वतीपरिणयम् उपलब्धम् अस्ति किन्तु तत्र बाणभट्टस्य शैली न अवलोक्यते अतः तस्य रचयितृविषये संशयः अस्ति । मुकुटताडिकतकम् उपलब्धं नास्ति ।

**मङ्गलाचरणम्**

**रजोजुषे जन्मनि सत्त्ववृत्तये**
**स्थितौ प्रजानां प्रलये तमःस्पृशे ।**
**अजाय सर्गस्थितिनाशहेतवे**
**त्रयीमयाय त्रिगुणात्मने नमः ॥ 1॥**

**पदच्छेदः** - रजोजुषे (4.1) जन्मनि (7.1) सत्ववृत्तये (4.1) स्थितौ (7.1) प्रजानाम् (6.3) प्रलये (7.1) तमःस्पृशे (4.1) अजाय (4.1) सर्गस्थितिनाशहेतवे (4.1) त्रयीमयाय (4.1) त्रिगुणात्मने (4.1) नमः (अ.) ।

**अन्वयः** - प्रजानां जन्मनि रजोजुषे, स्थितौ सत्त्ववृत्तये, प्रलये तमःस्पृशे सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने अजाय नमः ।

**पदार्थः** - प्रजानाम् - जनानाम्, जन्मनि - उत्पत्तौ, रजोजुषे - रजोगुणयुक्ताय, स्थितौ - मर्यादायाम्, सत्त्ववृत्तये - सत्त्वगुणयुक्ताय, प्रलये - संहारे, तमःस्पृशे - तमोगुणयुक्ताय, अत एव सर्गस्थितिनाशहेतवे - सर्जनपालनसंहारकारणाय, त्रयीमयाय - त्रिदेवरूपाय अथवा त्रिवेदरूपाय, त्रिगुणात्मने - रजःसत्त्वतमोनित्याय - ईश्वराय नमः ।

**टीका** - रजोजुष इति । अजाय स्वयंभुवे नम इत्यन्वयः । किंभूताय । प्रजानां जन्मनि सृष्टिकाले रजोजुषे रजोगुणयुक्ताय। पुनः किंविशिष्टाय । प्रजानां स्थितौ स्थितिकाले सत्त्ववृत्तये सत्त्वस्य वृत्तिर्यस्मिन् । सत्त्वगुणयुतायेत्यर्थः। पुनः किंलक्षणाय ।

प्रजानां प्रलये विनाशकाले तमःस्पृशे तमोगुणयुक्ताय । पुनः किंविशिष्टाय। सर्गस्थितिनाशहेतवे प्रजानामित्यस्य सर्वत्रानुषङ्गः । तेन प्रजानां सर्गः स्थितिश्च नाशश्च तेषां हेतवे कारणीभूताय । पुनः किंलक्षणाय। त्रयीमयाय । त्रयी ब्रह्मविष्णुमहेशानाम्। वेदानां वा त्रयी । तन्मयाय तत्स्वरूपाय। पुनः किंविशिष्टाय । त्रिगुणात्मने ब्रह्मविष्णुमहेशात्मकत्वेन तत्तद्गुणयोगात्त्रिगुणात्मकाय। सत्त्वरजस्तमोगुणस्वरूपायेत्यर्थः। तादृशाय पितामहाय नम इति प्राचीनव्याख्या ॥ प्रकारान्तरेण चेयं व्याख्या – अजाय कूटस्थनित्याय परब्रह्मणे नम इत्यन्वयः। किंभूताय । प्रजानां सर्गस्थितिनाशहेतवे। प्रजानामित्यनित्यमात्रपदार्थोपलक्षकम्। तेनानित्यपदार्थानां सर्गस्थितिनाशकारणायेत्यर्थः । अनित्यपदार्थानां सृष्टिस्थितिनाशहेतुत्वं च श्रुतिसिद्धम् । 'जगत्कारणं ब्रह्म' इति श्रुतेः । पुनः किंभूताय । त्रयीमयाय । त्रयी वेदानं त्रयी तत्स्वरुपाय । 'वेद एव परं ब्रह्म' इत्युक्तवान् । यद्वा । त्रयी ब्रह्मविष्णुमहेशानां त्रयी तत्स्वरूपाय । अतएव त्रिगुणात्मकाय। भेदाभेदविवक्षयेत्यर्थः । तेन परब्रह्मण एवायं नमस्कार इति किं बहुना ॥ 1॥

**जयन्ति बाणासुरमौलिलालिता**

**दशास्यचूडामणिचक्रचुम्बिनः ।**

**सुरासुराधीशशिखान्तशायिनो**

**भवच्छिदस्त्र्यम्बक पादपांसवः ॥ 2 ॥**

**पदच्छेदः** – जयन्ति (लट् प्र.पु.ब.व.) बाणासुरमौलिलालिताः (1.3) दशास्यचूडामणिचक्रचुम्बिनः (1.3) सुरासुराधीशशिखान्तशायिनः (1.3) भवच्छिदः (1.3) त्र्यम्बकपादपांसवः (1.3) ।

**अन्वयः** – बाणासुरमौलिलालिताः दशास्यचूडामणिचक्रचुम्बिनः सुरासुराधीशशिखान्तशायिनः भवच्छिदः त्र्यम्बकपादपांसवः जयन्ति ।

**पदार्थः** – बाणासुरमौलिलालिताः – बाणासुरस्य मुकुटेन उपसेविताः, दशास्यचूडामणिचक्रचुम्बिनः – रावणस्य चूडामणेः चक्रं चुम्बन्ति इति, स्पृशन्ति इति भावः, सुरासुराधीशशिखान्तशायिनः – देवानां दैत्यानां च स्वामिनः, तेषां शिखासु स्थानं प्राप्ताः, भवच्छिदः – संसारदुःखनाशकाः, त्र्यम्बकपादपांसवः – शिवस्य चरणरेणवः, जयन्ति – सर्वोत्कर्षेण वर्तन्ते ।

**टीका** – जयन्तीति । त्र्यम्बकस्य शिवस्य पादपांसवश्चरणरेणवो जयन्ति । सर्वोत्कर्षेण वर्तन्त इत्यर्थः । कथंभूताः। बाणासुरेति। बाणो बाणनामासुरस्तस्य मौलिना मुकुटेन वा लालिताः परिचिताः । पुनः किंविशिष्टाः । दशास्येति । दशास्यो रावणस्तस्य चूडामणयः शिरोमणयस्तेषां चक्रं समूहं चुम्बन्ति स्पृशन्तीत्येवंशीलाः । पुनः किंविशिष्टाः सुरेति । सुराश्चासुराश्च तेषामधीशाः स्वामिनस्तेषां शिखाश्चूडास्तासामन्तः प्रान्तस्तत्र शेरत इत्येवंशीलाः । पुनः किंविशिष्टाः । भवच्छिदः । संसारविच्छेदिन इत्यर्थः । अत्र पूर्वविशेषणत्रयेण परमेश्वरचरणरजसः परमैश्वर्य भवच्छिद इत्यनेन च संसारिणां संसारदुःखनिवारकत्वमुक्तमिति ॥ 2 ॥

**सुभाषितं हारि विशत्यधो गलान्**

**न दुर्जनस्यार्करिपोरिवामृतम् ।**

**तदेव धत्ते हृदयेन सज्जनो**

**हरिर्महारत्नमिवातिनिर्मलम् ॥ 3 ॥**

**पदच्छेदः** – सुभाषितम् (1.1) हारि (1.1) विशति (लट् प्र.पु.ए.व.) अधः (अ.) गलात् (5.1) न (अ.) दुर्जनस्य (6.1) अर्करिपोः (6.1) इव (अ.) अमृतम् (1.1) तत् (2.1) एव (अ.) धत्ते (लट् प्र.पु.ए.व.) हृदयेन (3.1) सज्जनः (1.1) हरिः (1.1) महारत्नम् (2.1) इव (अ.) अतिनिर्मलम् (2.1) ।

**अन्वयः** – सुभाषितं हारि (अपि) दुर्जनस्य गलात् अर्करिपोः अमृतम् इव अधो न विशति । तत् एव सज्जनो हरिः अतिनिर्मलं महारत्नम् इव हृदयेन धत्ते ।

**पदार्थः** – सुभाषितम् – मनोहरं वचनम्, हारि – आकर्षकम् अपि दुर्जनस्य – खलस्य, गलात् – कण्ठात्, अर्करिपोः – राहोः, अमृतम् इव – पीयूषम् इव, अधः – अधोभागं, न विशति – न गच्छति । तत् एव – सुभाषितम्, सज्जनः – साधुजनः, हरिः – भगवान् विष्णुः, अतिनिर्मलम् – अतिशयस्वच्छम्, महारत्नम् – कौस्तुभमणिम् इव, हृदयेन – मनसा, वक्षःस्थलेन, धत्ते – दधाति ।

**टीका** – सुभाषितमिति । सुभाषितं सुकाव्यादि हारि मनोहार्यपि दुर्जनस्य खलस्य गलात् कण्ठान्निगरणादधो न विशति न गच्छति । हृदयशून्यत्वादिति भावः । कस्येव । अर्करिपोः पीयमानममृतं यथा न हृदयं विशति पूर्वोक्तहेतोरेव । तदेव सुभाषितं सज्जनो गुणग्राहको हृदयेन स्वान्तेन धत्ते धारयति । सहृदयत्वान्न कदाचिद्विस्मरतीति भावः । यथा हरिः विष्णुनारायणो हृदयेन वक्षःस्थलेनातिनिर्मलं स्वच्छं महारत्नं कौस्तुभं दधाति ॥ 7 ॥

**कादम्बर्याः कथासारः**

विदिशानामनगर्यां शूद्रको नाम राजा शासनं करोति स्म । एकदा तस्य सभायाम् एका चाण्डालकन्यका पञ्जरस्थं शुकमादाय आजगाम । तं शुकं पृच्छति तदा शुकः स्ववृत्तान्तं राज्ञे कथयति– राजन् ! अहं वैशम्पायननामधेयः अस्मि। जन्मनः अनन्तरं मम माता दिवङ्गता । एकदा वने व्याधगणः समागतः । तेषु वर्तमानेन एकेन व्याधेन मे पिता व्यापादितः। अहं पितुः पक्षस्थः वृक्षादधः पतितः । जलस्य अन्वेषणेन श्रान्तः मध्येमार्गम् अहं मूर्च्छितः । तदा जाबालिमुनेः पुत्रः हारितः मां जलं पाययित्वा आश्रमं नीतवान् । मां दृष्ट्वैव जाबालिमुनिः मदीयं वृत्तान्तं वर्णयन् आह–

उज्जयिन्यां तारापीडनामा प्रतापवान् राजा शास्ति स्म । तस्य भार्या विलासवती आसीत् । विद्वान् पण्डितः ब्राह्मणः शुकनासः तस्य मन्त्री आसीत् । राज्ञः सन्ततेः अभावात् सर्वेऽपि दुःखिताः आसन् । ईश्वरकृपया राज्ञः मन्त्रिणश्च गृहे पुत्रः जातः । राजपुत्रस्य नाम चन्द्रापीडः मन्त्रिपुत्रस्य नाम वैशम्पायनः इति आसीत् । द्वावपि सममेव वर्धमानौ आस्ताम्। राज्ञा तौ द्वौ पाठशालां प्रति प्रेषितौ । द्वादशवर्षाभ्यन्तरे एव सर्वविद्याकुशलौ भूत्वा तौ प्रत्याजग्मतुः । तदा शुकनासः चन्द्रापीडाय राजनीतेः महत्त्वपूर्णम् उपदेशं प्रदत्तवान् । तारापीडः स्वपुत्रं युवराजपदे अभिषिच्य तस्मै इन्द्रायुधनामकम् अश्वं दत्तवान् । चन्द्रापीडस्य सेवायै पत्रलेखा नाम्नी काचित् ताम्बूलकरण्डवाहिनी नियुक्ता ।

चन्द्रापीडः वैशम्पायनेन सह दिग्विजयाय प्रस्थानं चकार । त्रीणि वर्षाणि यावत् दिशः विजयमानः सः अग्रे ववृधे। एकदा मृगयां क्रीडन् चन्द्रापीडः शिबिरात् सुदूरं निर्गतः । तत्र वने तेन अद्भुतं किन्नरयुगलं दृष्टम् । तस्य अनुसरणं कुर्वाणः चन्द्रापीडः अच्छोदसरसः तीरं सम्प्राप्तः । तत्समीपस्थे शिवालये चन्द्रापीडेन एका अतीव सुन्दरी गन्धर्वकन्या दृष्टा । चन्द्रापीडः तस्याः विषये पृष्टवान् तदा सा आत्मनः वृत्तान्तं कथयामास–

''अहं हंसस्य गौर्याः च पुत्री महाश्वेता अस्मि । पुण्डरीकनाम्ना ऋषिकुमारेण सह प्रीतिप्रसङ्गः जातः । तस्य मित्रं कपिञ्जलः पुण्डरीकम् उपदिदेश किन्तु न कोऽपि उपदेशप्रभावः पुण्डरीके जातः । विरहकारणात् पुण्डरीकस्य मरणं जातम् । तस्य शवं नीत्वा आकाशमार्गे कश्चित् दिव्यपुरुषः प्रययौ । कपिञ्जलः स्वमित्रं नीयमानं दृष्ट्वा तत्पृष्ठतः अनुजगाम । अहं चितां सज्जीकृत्य मरणाय कृतनिश्चया आसम् । तदा आकाशवाण्या उक्तं यत् युवयोः पुनर्मेलनं भविष्यति अतः आत्मदाहं मा कुरु । पुण्डरीकस्य प्रतीक्षायां मया अत्र उषित्वा व्रताचरणं क्रियते ।'' इत्थम् उक्त्वा महाश्वेता रुरोद ।

महाश्वेतायाः कथनेन चन्द्रापीडेन अन्यदपि ज्ञातं यत् तस्याः सखी कादम्बरी अपि कौमार्यव्रतम् अनुपाल्यमाना वर्तते । चन्द्रापीडः महाश्वेतया सह हेमकूटपर्वते कादम्बरीसमीपं जगाम । तत्र चन्द्रापीडेन सह कादम्बर्याः अपि प्रणयः सञ्जातः कादम्बरीं मिलित्वा चन्द्रापीडः पुनः स्वशिबिरं प्रति प्रतस्थे । तदा शीघ्रं राजधान्याम् आगमनाय पितुः पत्रं प्राप्य चन्द्रापीडः सेनापतिं मेघनादं पत्रलेखया सह तत्र संस्थाप्य राजधानीं समागतः । पितरं मातरं शुकनासं च अभिवाद्य स्वनिवासं प्रति यातः । कतिपयदिवसानन्तरं मेघनादेन सह आगता पत्रलेखा चन्द्रापीडाय कादम्बर्याः विरहावस्थां वर्णयामास। अत्रैव कादम्बर्याः पूर्वार्द्धः समाप्तिं गच्छति ।

उत्तरार्द्धः पुलिन्दभट्टेन विरचितः अस्ति । चन्द्रापीडः यदा राजधानीं गतः तदा तेन वैशम्पायनः शिबिरे एव स्थापितः

आसीत् । चन्द्रापीडः कादम्बरीविषयकं सन्देशं श्रुत्वा प्रत्यागच्छति तदा वैशम्पायनं न पश्यति । दुःखितः चन्द्रापीडः तम् वैशम्पायनम् अन्विषति तदा महाश्वेता रहस्योद्‌घाटनं करोति यत् भवन्मित्रं मां दृष्ट्वा कामुकाः चेष्टाः करोति स्म, अतः सः मया शप्तः यत् त्वं शुकः भव इति । इदं श्रुत्वैव चन्द्रापीडः दुःखातिशयेन मृत्युं प्राप्तः । तदा एव कादम्बरी महाश्वेतां द्रष्टुं तत्रायाति । सा मृतं चन्द्रापीडं दृष्ट्वा विलापम् अकरोत् । तदा आकाशवाण्या उक्तं यत् चन्द्रापीडः शापकारणात् मृतः । तस्य शरीरं रक्षन्तु । शापनिवारणे सति युवयोः मेलनं भविष्यति इति ।

तदानीमेव महति आश्चर्ये पत्रलेखा इन्द्रायुधम् अश्वं नीत्वा अच्छोदसरः प्रविष्टा । इन्द्रायुधात् कपिञ्जलः स्वकीयं रूपं स्वीकृत्य निर्गतः । कपिञ्जलेन उक्तं यत् सः शापवशात् अश्वः जातः इति । तेन एव सर्वं रहस्यम् उद्‌घाटितं यत् चन्द्रापीडः चन्द्रमसः अवतारः अस्ति, वैशम्पायनः पुण्डरीकस्य अवतारः अस्ति, अहं कपिञ्जलः इन्द्रायुधः जातः आसम् इति ।

इत्थं जाबालिमुनेः कथनेन शुकः स्वस्य पूर्वजन्म सस्मार । सः उड्डीय महाश्वेतां द्रष्टुं तं प्रदेशं गन्तुं प्रतस्थे । मार्गे एव चाण्डालकन्यया सः शुकः गृहीतः । सा एव शूद्रकाय इमं शुकम् अर्पितवती । अस्मिन् समये सर्वेषां शापानाम् निवृत्तिः जाता शूद्रकः चन्द्रापीडः जातः शुकः मन्त्रीपुत्रः वैशम्पायनः जातः । द्वयोः प्रियतमया सह विवाहः अभवत्। अत्र कादम्बरी पूर्णा भवति ।

## टिप्पणी

**( क ) समासपदानि –**

(1) सर्गस्थितिनाशहेतवे – सर्गश्च स्थितिश्च नाशश्च सर्गस्थितिनाशाः, तेषां हेतुः (ष.तत्पु.) तस्मै सर्गस्थितिनाशहेतवे।

(2) बाणासुरमौलिलालिताः – बाणासुरस्य मौलिः (ष.तत्पु.) तेन लालिताः (तृ. तत्पु.) बाणासुरमौलिलालिताः।

(3) सुरासुराधीशशिखान्तशायिनः – सुराश्च असुराश्च (द्वन्द्व) तेषाम( ) अधीशाः (ष.तत्पु.) तेषां शिखाः (ष.तत्पु.) तेषाम् अन्तः शेरते, तच्छीलाः (उप.) ।

**( ख ) पदविशेषः**

(1) रजो जुषते इति रजोजुट्, तस्मै रजोजुषे । जुषते – सेवते, रजोगुणं सेवते सः रजोजुट् कथ्यते ।

**( ग ) छन्दः**

(1) त्रिषु पद्येषु वंशस्थच्छन्दः अस्ति । तल्लक्षणं यथा – ‘जतौ तु वंशस्थमुदीरितं जरौ’ इति ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) कादम्बरी ............... अस्ति । (नाटकम्, गद्यकाव्यम्, महाकाव्यम्)

(2) बाणभट्टस्य पितुर्नाम .............. अस्ति । (अर्थपतिः, कुबेरः, चित्रभानुः)

(3) दुर्जनस्य गलात् अधः .............. न गच्छति । (सुभाषितम्, जलम्, विषम्)

(4) तारापीडस्य मन्त्री ................ आसीत्। (इन्द्रायुधः, शूद्रकः, शुकनासः)

(5) हंसस्य पुत्री ............. अस्ति । (कादम्बरी, महाश्वेता, विलासवती)

(6) प्रदत्तेषु पद्येषु ............ छन्दः अस्ति । (वंशस्थम्, अनुष्टुप्, मालिनी)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) बाणभट्टः कस्मिन् नगरे निवसति स्म ?

(2) बाणभट्टस्य कालः कः मन्यते ?

(3) उज्जयिन्यां कः राजा शासनं करोति स्म ?

(4) ताम्बूलकरण्डवाहिन्याः नाम किम् ?

(5) कादम्बर्याः उत्तरार्द्धं कः विरचितवान् ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) मङ्गलाचरणे निरूपितस्य त्रिगुणात्मनः भगवतः स्वरूपं लिखत ।

(2) गद्यकाव्यस्य महत्त्वं लिखत् ।

(3) त्र्यम्बकपादपांसवः कीदृशाः सन्ति ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) अजाय (पदपरिचयः) ।

(2) त्रिगुणात्मने (पदपरिचयः) ।

(3) बाणासुरमौलिलालिताः (समासविग्रहः) ।

(4) रजोजुषे (पदपरिचयः) ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) बाणभट्टः ।

(2) शुकनासः ।

(3) चन्द्रापीडः ।

(4) वैशम्पायनः ।

**छात्रप्रवृत्तिः**

काव्यप्रकाराणाम् आलेखः निर्मातव्यः ।

**शिक्षकप्रवृत्तिः**

कादम्बर्याः गद्यांशस्य पाठनं कृत्वा गद्यलेखनशैली छात्रेभ्यः दर्शनीया ॥

●

# ११ अभिज्ञानशाकुन्तलम्

**प्रस्तावना:** – महाकविः कालिदासः मालविकाग्निमित्रस्य विक्रमोर्वशीयस्य अभिज्ञानशाकुन्तलस्य चेति रूपकत्रयस्य रचयिता अस्ति । रूपकाणां वस्तुनः नेतुः रसस्य च वैविध्यानुसारं ये दशप्रकाराः स्वीकृताः सन्ति, तेषु एतानि रूपकाणि नाटकनामके प्रकारे समाविष्टानि भवन्ति । संपूर्णेऽपि संस्कृतसाहित्ये एषु त्रिषु नाटकेषु शाकुन्तलस्यातिशयः महिमा । अस्य विषये एकोक्तिः सुप्रसिद्धा अस्ति, यत् – काव्येषु नाटकं रम्यं, नाटकेषु शकुन्तला । तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥ इति ॥

महाकविः कालिदासः महाभारतस्थस्य शाकुन्तलोपाख्यानस्य कथावस्तु आंशिकरूपेण परिवर्त्य नाटकमिदं रचितवान्। कथावस्तुनः परिवर्तने अस्य खलु कालिदासस्य यादृशी कारयितृप्रतिभा प्रवर्तते तादृशी अन्यस्य कस्यचित् कवेः नास्ति। वस्तुतः अयं महाकविः यथा महाकाव्यरचनायां नैपुण्यं भजते तथा नाटकरचनायामपि नैपुण्यं भजते ।

अस्य शाकुन्तलनाटकस्य नायकः राजा दुष्यन्तः, नायिका च कण्वमुनेः पालिता पुत्री शकुन्तला वर्तते । एतयोः पारस्परिकस्य प्रेम्णः कथा कालिदासेन सप्तसु अङ्केषु ग्रथिता अस्ति । प्रत्येकस्मिन् अङ्के यत् विषयवस्तु वर्तते तस्य निर्देशः तस्य तस्य अङ्कस्य नामकरणं कृत्वा कथितमस्ति । तद्यथा – आखेटको नाम प्रथमाङ्कः, आख्यानगुप्तिः नाम द्वितीयाङ्कः, शृङ्गारभोगः नाम तृतीयाङ्कः, शकुन्तलाप्रस्थानं नाम चतुर्थाङ्कः, शकुन्तलाप्रत्याख्यानं नाम पञ्चमाङ्कः, शकुन्तलाविरहो नाम षष्ठाङ्कः, शकुन्तलासंवर्धनं नाम सप्तमाङ्कः अस्ति ॥

---

**नाटकलक्षणम्**

काव्यं मुख्यतया द्विविधं दृश्यं श्रव्यं च । तत्र दृश्यं रूपकम् उच्यते । रूपकस्य दशभेदाः सन्ति । उपरूपकाणाम् अष्टादश भेदाः सन्ति । रूपकेषु प्रमुखं भवति नाटकम् । यथा आह धनञ्जयः दशरूपके–

**प्रकृतित्वादथान्येषां भूयो रसपरिग्रहात् ।**
**सम्पूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते ॥ 3.1॥**

अर्थात् नाटकम् अन्यरूपकाणां प्रकृतिः – मूलम् अस्ति । नाटके सर्वरसानां समावेशो भवितुं शक्नोति । नाटकं सर्वलक्षणसम्पन्नं भवति, अतः नाटकस्य लक्षणेषु किञ्चित् किञ्चित् परिवर्तनं कृत्वा अन्यरूपकाणां लक्षणानि निर्धारितानि भवन्ति। अनेन ज्ञायते यत् नाटकं रूपकेषु महत्वपूर्णम् अस्ति । उक्तं च – 'काव्येषु नाटकं रम्यम्' इति । अस्य नाटकस्य सामान्यलक्षणानि यानि प्रधानानि सन्ति, तानि अत्र निरूप्यन्ते ।

नाटकस्य कथावस्तु इतिहासप्रसिद्धं स्यात् । मुखप्रतिमुखादिभिः पञ्चसन्धिभिः युक्तं, विलास–सुख–दुःखादिप्रसङ्गयुक्तं नाटकं भवेत् । नाटके न्यूनातिन्यूनं पञ्च, अधिकाधिकं दश अङ्काः भवेयुः । नाटके प्रख्यातवंशे उत्पन्नः प्रतापी धीरोदात्तः नायकः भवेत् । नाटके मुख्यः रसः वीरः शृङ्गारः वा भवेत्, अन्ये रसाः गौणतया निरूपणीयाः । निर्वहणसन्धौ (अन्तभागे, समाप्त्यवसरे) अद्भुतः रसः भवेत् । नाटके कथावस्तु गोपुच्छवत् निरूपणीयम् । यथा अग्रे सूक्ष्मम्, मध्ये विस्तीर्णम्, उपसंहारे च सूक्ष्मम् इति । इत्थं नाटकस्य प्रधानलक्षणानि सन्ति । एतैः लक्षणैः युक्तं रूपकं नाटकम् उच्यते । पञ्चाङ्कं नाटकम् अवरं, सप्ताङ्कं मध्यमं तथा दशाङ्कं नाटकं महानाटकम् उच्यते।

**कथासारः**

अभिज्ञानशाकुन्तलं महाकविकालिदासेन विरचितम् उत्तमं नाटकम् अस्ति । अस्मिन् नाटके सप्त अङ्काः वर्तन्ते। प्रथमे अङ्के नायकः दुष्यन्तः मृगयां कुर्वन् कण्वाश्रमं गच्छति । तत्र सः नायिकां शकुन्तलां पश्यति । शकुन्तलायाः परिचयज्ञानस्य व्याजेन

दुष्यन्तः तस्याः उत्पत्तिमूलं श्रृणोति । शकुन्तला विश्वामित्रस्य मेनकायाश्च पुत्री अस्ति इति ज्ञात्वा तां विवाहयोग्यां मत्वा मनसि प्रणयं धरति । द्वितीयाङ्के विदूषकेन सह वार्तालापेन दुष्यन्तस्य मनोगतः भावः प्रकटीभवति। राजमातुः आदेशात् राजा दुष्यन्तः विदूषकं पुत्रत्वेन नगरं प्रेषयति, स्वयं च आश्रमरक्षणाय तत्रैव तिष्ठति । तृतीये अङ्के शकुन्तलायाः प्रेमपत्रं (मदनलेखं) विलोक्य दुष्यन्तं प्रति तस्याः अपि भावः स्पष्टीभवति । दुष्यन्तशकुन्तलयोः प्रेमालापचेष्टादीनां वर्णनम् अत्र वर्तते ।

चतुर्थः अङ्कः शाकुन्तलस्य हृदयं कथ्यते । अस्मिन् अङ्के शकुन्तलायाः पतिगृहगमनं मुख्यतया वर्णितम् अस्ति। तपोवनं त्यक्त्वा शकुन्तला पतिगृहं याति तदा प्रकृतिः अपि करुणामयी भवति । अस्मिन्नेवावसरे कण्वः शकुन्तलायै पतिगृहे योग्याचरणाय उपदेशं प्रयच्छति । स च उपदेशः जगतः सर्वासां कन्यकानां कृते अत्यन्तं महत्त्वपूर्णः वर्तते । अस्मिन् अङ्के शकुन्तला दुर्वाससा शापं प्राप्नोति यत् दुष्यन्तः तां विस्मरिष्यति, आभरणदर्शनेन च अभिज्ञास्यति इति । अस्यैव शापस्य प्रभावः पञ्चमे अङ्के दृश्यते। अभिमुखम् आगतां शकुन्तलां दुष्यन्तः तिरस्करोति । शकुन्तला गर्भवती अस्ति। अतः दुष्यन्तस्य पुरोहितः सोमरातः तां स्वगृहं नयति । तदानीमेव आकाशमार्गात ज्योतिःपुञ्जः आगत्य शकुन्तलां अन्तर्धापयति। षष्ठाङ्कस्य पूर्वं वर्णितेन धीवरप्रसङ्गात राजा दुष्यन्तः अङ्गुलीयकं दृष्ट्वा शकुन्तलां स्मरति । सम्पूर्णेऽपि अङ्के दुष्यन्तः शकुन्तलात्यागशोकेन दुःखितः वर्णितोऽस्ति । अङ्कान्ते इन्द्रस्य सारथिः मातलिः इन्द्रसन्देशं दातुं दुष्यन्तं प्रति आयाति । दुष्यन्तः इन्द्रस्य साहाय्यार्थं स्वर्गं गच्छति । सप्तमे अङ्के स्वर्गात् मरीचेः आश्रमम् आगच्छति दुष्यन्तः । अत्र सिंहशावकेन सह क्रीडन्तं बालकं विलोक्य दुष्यन्तः मृदुवचोभिः वार्तालापं करोति। अस्मिन् अङ्के दुष्यन्तस्य मेलनं शकुन्तलया सह भवति, तत्र कारणीभूतः अयं बालकः अस्ति । बालकस्य हस्ते राजचिह्नं दृष्ट्वा, तस्य वंशमूल श्रुत्वा, ततश्च शकुन्तलायाः अयं पुत्रः इति ज्ञात्वा राजा सहर्षं शकुन्तलायाः स्वीकारं करोति । ऋषीणाम् आशीर्वादैः इदं नाटकं सुखान्तं पूर्णं भवति ।

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ 1॥**

**पदच्छेदः** – या (1.1), सृष्टिः (1.1), स्रष्टुः (6.1), आद्या (1.1), वहति (लट् प्र.पु.ए.व.), विधिहुतम् (2.1), या (1.1), हविः (1.1), या (1.1), च (अ.), होत्री (1.1), ये (1.2), द्वे (1.2), कालम् (2.1), विधत्तः (लट् प्र.पु.द्विव.), श्रुतिविषयगुणा (1.1), या (1.1), स्थिता (1.1), व्याप्य(अ.), विश्वम् (2.1), याम् (2.1), आहुः (लिट् प्र.पु.ब.व.), सर्वबीजप्रकृति (1.1), इति (अ.), यया (3.1), प्राणिनः (1.3) प्राणवन्तः (1.3), प्रत्यक्षाभिः (3.3), प्रपन्नः (1.1), तनुभिः (3.3), अवतु (लोट् प्र.पु.ए.व.), वः (2.3), ताभिः (3.3), अष्टाभिः (3.3), ईशः (1.1) ॥

**अन्वयः** – या स्रष्टुः आद्या सृष्टिः, या विधिहुतं हविः (देवान्) वहति, या च होत्री, ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या विश्वं व्याप्य स्थिता, यां सर्वबीजप्रकृतिः इति आहुः यया प्राणिनः प्राणवन्तः (सन्ति) ताभिः प्रत्यक्षाभि अष्टाभिः तनुभिः प्रपन्नः ईशः वः अवतु ॥ 1॥

**पदार्थः** – या – जलरूपा तनुः, स्रष्टुः – विधातुः, आद्या – प्रथमा, सृष्टिः रचना, या – अग्निरूपा तनुः, विधिहुतम् – विधिना शास्त्रानुकूलं हुतं वह्नौ क्षिप्तम्, हविः –हव्यं घृतादिकम्, वहति – देवान् प्रापयति, या – तनुः, होत्री – हवनकर्त्री यजमानरूपा अस्ति । ये द्वे – सूर्यचन्द्ररूपे तनू, कालम् – अहोरात्ररूपं समयविभागम्, विधत्तः – कुरुतः । श्रुति – विषयगुणा – श्रुतैः कर्णस्य विषयः शब्दो गुणो यस्याः सा, शब्दगुणेत्यर्थः, या – आकाशरूपा तनुः, विश्वम् – निखिलं जगत्, व्याप्यं – व्याप्तं कृत्वा, स्थिता – वर्तमाना वर्तते । याम् – पृथ्वीरूपां तनुम्, सर्वबीजप्रकृतिः – सर्वेषां समस्तानां बीजानां धान्यादिशस्यानां प्रकृतिः कारणम्, इति आहुः – इति वदन्ति, विद्वांसः इति शेषः । यया – वायुरूपमूर्त्या, प्राणिनः – जीवधारिणः, प्राणवन्तः

– प्राणयुक्ताः, सन्तीति शेषः । ताभिः – पूर्वोक्ताभिः, प्रत्यक्षाभिः – दृष्टिगोचराभिः, अष्टाभिः – अष्टसंख्याभिः (जलवह्नि – यजमान – सूर्यचन्द्र – गगन – धरणि – पवमानाख्याभिः) तनुभिः – मूर्तिभिः, प्रपन्नः – समन्वितः, ईशः – ईश्वरः, भगवान् शङ्करः । वः – युष्मान् (सामाजिकान्), अवतु – रक्षतु, अभीष्टसिद्धिं वितरतु॥ 1॥

**टीका** – या सृष्टिरिति । ईशः परमैश्वर्यवान् महादेवस्ताभिस्तनुभिर्मूर्तिभिर्वो युष्मान् अवतु रक्षतु । ताभिः काभिः ? या सृष्टिः स्रष्टुः स्थावरजङ्गमात्मकजगद्विधातुराद्या प्रथमा सृष्टिः । प्रथमतो या ब्रह्मणा विहितेति भावः । सा तनुर्जलरूपा। या हविर्हवनीयद्रव्यं घृतादिकं वहति । हविः कीदृशम्? विधिहुतं, वेदविधानेनाग्नौ क्षिप्तम् । साऽग्निरूपा । या होत्री यजमानरूपा । ये द्वे तनू कालं दिवारात्रिरूपं समयं विधत्तः कुरुतः । ते चन्द्रार्करूपे । एतेन दिक्कालात्मकव्यावृत्तिः । या जगद् व्याप्य, स्थावरजङ्गमात्मकं जगदाक्रम्य स्थिता वर्तमाना । सा कीदृशी ? श्रुतेः कर्णस्य विषयो गोचरो गुणः शब्दो यस्याः सा तथा । साऽऽकाशरूपा । यां तनुं सर्ब्बेषां सर्वेषां बीजानां व्रीह्यादीनां प्रकृतिरुत्पत्तिस्थानम् इति कृत्वा आहुः । पुराविदः पण्डिताः वदन्तीत्यर्थः । सा पृथिवीरूपा । निदाने प्रकृतिः स्त्रियामिति व्याडिः । यया मूर्त्या प्राणिनो मनुष्यादयः प्राणवन्तः सा वायुरूपा । तनुभिः कीदृशीभिः ? प्रत्यक्षाभिः । योग्ययोगीन्द्रज्ञानग्राह्याभिरित्यर्थः । ईशः कीदृशः ? आभिः अष्टाभिः मूर्तिभिः प्रपन्नः युक्तः ॥

## टिप्पणी

**(क) समासपदानि –**

(1) विधिहुतम् । विधिना हुतम् (तृ. तत्पु.)

(2) सर्वबीजप्रकृतिः । सर्वाणि च इमानि बीजानि सर्वबीजानि (कर्म.) तेषां प्रकृतिः (ष. तत्पु.)

**(ख) पदविशेषः**

(1) स्रष्टा । ब्रह्मा, विधिः, जगत्कर्ता स्रष्टा उच्यते । सृजति इति स्रष्टा ।

**(ग) अष्टमूर्तिः शिवः**

शिवस्य अष्टमूर्तिविषये पुराणेषु अपि निरूपणं प्राप्यते । ताः अष्टौ मूर्तयः यथा जलम्, अग्निः, यजमानः, सूर्यः, चन्द्रः, आकाशम्, पृथिवी, वायुः इति । एताभिः मूर्तिभिः युक्तः ईश्वरः सर्वान् रक्षतु इति भावः ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) रूपकस्य ............. भेदाः सन्ति । (नव, दश द्वादश)

(2) नाटकस्य कथावस्तु ............. भवति । (इतिहासप्रसिद्धम्, कविकल्पितम्, वेदोक्तम्)

(3) शाकुन्तलनाटकस्य हृदयम् ............. कथ्यते । (प्रथमाङ्कः, चतुर्थाङ्कः, सप्तमाङ्कः)

(4) दुष्यन्तः मृगयां कुर्वन् ................. प्राप्नोति । (वसिष्ठाश्रमम्, कण्वाश्रमम्, चम्पारण्यम्)

(5) काव्येषु ............. रम्यं भवति । (गद्यम्, पद्यम्, नाटकम्)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) शाकुन्तलस्य नायकः कः? स च कीदृशः?

(2) शकुन्तलायै शापं कः दत्तवान्?

(3) शकुन्तलायां मदनलेखस्य उल्लेखः कस्मिन्नङ्के?

(4) इन्द्रस्य सारथिः कः?

(5) सर्वबीजप्रकृतिः – इत्यत्र कः समासः?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) ईशः काभिः तनुभिः अवति?

(2) धनञ्जयेन रूपकेषु नाटकं प्रथमत्वेन कथम् उक्तम् ?

(3) नाटकस्य लक्षणं किम्?

(4) शाकुन्तलस्य चतुर्थाङ्कस्य विषयवस्तु किम्?

**4. संक्षेपतः परिचयं कारयत ।**

(1) कालिदासः ।

(2) शाकुन्तलम् ।

(3) नाटकम् ।

(4) शिवस्य अष्टौ मूर्तयः ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) तत्र श्लोकचतुष्टयम् ।

(2) कालिदासस्य काव्यशैली ।

(3) विधातुः आद्या सृष्टिः ।

**छात्रप्रवृत्तिः**

नाटकस्य रमणियतायाः कारणानि लिखत ।

**शिक्षकप्रवृत्तिः**

शाकुन्तलस्य चतुर्थाङ्कस्य श्लोकचतुष्टयम् छात्रेभ्यः लेखापयितव्यम् ॥

●

# १२ वेणीसंहारम्

**प्रस्तावना:** – संस्कृतकवीनाम् एका परिपाटि: दृश्यते । ते 'आत्मश्लाघा न कर्तव्या' इति नियमेनानेन बद्धा: स्वपरिचयविषये सर्वदा मौनमेव सेवन्ते । महाकवे: भट्टनारायणस्यापि तथैव स्थिति: वर्तते । कविरसौ स्वपरिचयविषये किमपि न प्रोक्तवान् न वा किमपि निरूपितवान् । अत: एतस्य जीवनवृत्तनिर्धारणाय अन्त:साक्षी बहि:साक्षी वा आश्रितव्यो भवति । महाकवि: वेणीसंहारे आत्मवृत्तमाधारीकृत्य प्रोक्तवान् तदिदं कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिरियं वेणीसंहारनाटकम् इति । अनेन ज्ञायते यत् कविरयं मृगराजलक्ष्मा आसीत् ।

भट्टनारायण: कान्यकुब्जस्य निवासी आसीत् इति विद्वद्भि: स्वीक्रियते । स: शाण्डिल्यगोत्रोत्पन्न: ब्राह्मण: आसीत्। एवं हि श्रूयते आदिशूरनृपेण यज्ञस्य सम्पादनाय पञ्चब्राह्मणा: आहूता: । तेषु तत्रस्थ: एक: भट्टनारायण: एवेति श्रूयते।

कुत्रचित् भट्टनारायणस्य आख्यानपौरोहित्यरूपेण बङ्गदेशेऽपि गमनं श्रूयते । क्षितीशवंशावल्यां बङ्गराजघटकेऽपि भट्टनारायणस्योल्लेख: प्राप्यते । विविधै: प्रमाणै: अनुमीयते यदसौ सप्तमशताब्द्या: उत्तरार्धे अष्टमशताब्द्या: पूर्वार्धे वा सञ्जात: ।

धूर्जटि: पातु युष्मान् एवं च हरिचरणयोरञ्जलिरयम् – इत्यनेन कथनेन एतस्य शिवे विष्णौ चेति उभयो: प्रीति: दृग्गोचरीभवति । भाग्यवादस्यासौ खण्डनकर्ता आसीत् ।

कविनानेन नैकेषां शास्त्राणामध्ययनमध्यापनञ्च कृतमिति तद्रचितानां ग्रन्थानां परिशीलनेन स्फुटं ज्ञायते । कवे: सांख्य-योगवैषयिकं ज्ञानमस्यां कृतौ यत्र तत्र प्रसङ्गत: सम्यगवगम्यते । छन्द:शास्त्रेऽप्यसौ पारङ्गत: आसीत् । एतत् तेनोपयुक्तानां छन्दसां प्रयोगेण अवगम्यते । वेणीसंहारे यथावसरं यानि सुभाषितानि दृष्टिपथमायान्ति, तानि दृष्टवैतस्य कवे: व्यावहारिकम् अनुभवजन्यं च तलस्पर्शि ज्ञानमासीदिति निश्चयत: कथयितुं शक्यते ॥

---

**कविपरिचय:**

भट्टनारायणस्य एकमेव नाटकं वेणीसंहारम् उपलभ्यते । वेणीसंहारे भट्टनारायण: स्वविषये केवलं 'कवि: मृगराजलक्ष्मा' इति लिखति । स्ववंशविषये देशकालादिविषये च तेन मौनं सेव्यते, अत: केवलम् अन्यै: बाह्यप्रमाणै: अस्य कवे: विषये किञ्चिदेव ज्ञातुं शक्यते । एतत्कथ्यते यत् भट्टनारायण: कान्यकुब्जीय: ब्राह्मण: आसीत् । बङ्गप्रदेशस्य राजा यज्ञार्थ कान्यकुब्जात् काँश्चन ब्राह्मणान् आहूतवान्, तेषु ब्राह्मणेषु भट्टनारायणोऽपि आसीत् । अस्य राज्ञ: नाम आदिशूर: आसीत् । भट्टनारायण: नाम्न: अग्रे भट्ट: इति योजयति तथा आत्मानं मृगराजलक्ष्मा इति कथयति अत: ज्ञायते यत् एष: पराक्रमी वीर: ब्राह्मण: स्यात् ।

आचार्य: वामन:, आनन्दवर्धन:, दण्डी च भट्टनारायणं स्मरन्ति स्वीयग्रन्थेषु, अत: भट्टनारायण: तेभ्य: पूर्ववर्ती स्यात् इति मन्यते । आनन्दवर्धनस्य काल: दशमी शताब्दी मन्यते । किञ्च सप्तमशताब्द्यां जातेन बाणभट्टेन श्रीहर्षेण वा भट्टनारायणस्य उल्लेख: न कृत: अत: भट्टनारायणस्य काल: अष्टमी शताब्दी स्यात् । दण्डिना अवन्तिसुन्दरीकथायां भट्टनारायणस्य तिस्र: कृतय: नाम विना उल्लिखिता:, किन्तु सम्प्रति एकमेव इदं वेणीसंहारनाटकं प्राप्यते ।

भट्टनारायणस्य रीति: गौडी, ओजोगुण: तथा रस: वीर: प्रिय: स्यादिति वेणीसंहारेण ज्ञायते । सर्वलक्षणसम्पन्नस्य अस्य नाटकस्य अनेकानि उदाहरणानि लक्षणग्रन्थकारै: निरूपितानि सन्ति तेनैव अस्य नाटकस्य वैशिष्ट्यं महत्त्वं च स्वत: सिद्ध्यति। भट्टनारायणस्य विषये एतदतिरिच्य अन्यत् किमपि न प्राप्यते ।

**कथासार:**

वेणीसंहारं श्रीभट्टनारायणेन विरचितम् उत्तमं नाटकं वर्तते । दशरूपकावलोकटीकाकार: धनिक: अस्य नाटकस्य अनेकानि पद्यानि उदाहरति । अस्मिन् नाटके षड् अङ्का: सन्ति । द्रौपद्या: वेण्या: – केशपाशस्य संहार: – बन्धनम् अत्र मुख्यकथा वर्तते

। प्रथमाङ्के युधिष्ठिरः कौरवेभ्यः सन्धिप्रस्तावं प्रेषयति इति ज्ञात्वा भीमः अतीव क्रुद्धो भवति । भानुमत्या दुर्योधनपत्न्या अपमानितां द्रौपदीं विलोक्य भीमः अत्यन्तं क्रुद्धो भूत्वा कौरवान् हत्वा द्रौपद्याः केशपाशसंयमनस्य प्रतिज्ञां करोति । सन्ध्यर्थं हस्तिनापुरगतं कृष्णं संयमितुं दुर्योधनः चेष्टते, एतदाकर्ण्य भीमक्रोधाग्नौ यथा धृतं क्षिप्तम् । द्वितीये अङ्के युद्धस्य घटनाः वर्णिताः सन्ति । भीष्मः शरशय्याधिरूढो भवति, अभिमन्युश्च वीरगतिं प्राप्नोति । अस्मिन् अङ्के भानुमती नकुलद्वारा सर्पशतनाशं स्वप्ने पश्यति । प्रातः सा स्वप्नात् भीता कौरवाणां कल्याणाय देवतार्चनं करोति । अत्र दुर्योधनः भानुमतीं सान्त्वयति तदानीं जयद्रथपत्नी दुःशला तत्र आगत्य अर्जुनस्य जयद्रथवधे प्रतिज्ञां श्रावयति ।

तृतीये अङ्के द्रोणाचार्यस्य वधस्य सूचना राक्षस-राक्षसीभ्यां प्रदीयते । अश्वत्थाम्नः शोकः, सेनापतिपदे नियुक्त्यै अश्वत्थामकर्णयोः वाग्युद्धं, दुःशासनस्य सङ्कटे पतनं चेति प्रसङ्गाः अत्र सन्ति । चतुर्थे अङ्के सूचना प्राप्यते यत् दुःशासनः तथा कर्णपुत्रः वृषसेनः वीरगतिं प्राप्तौ स्तः । पुत्रवधात् दुःखी कर्णः युद्धाय प्रतिष्ठते । दुर्योधनः धृतराष्ट्रेण गान्धार्या सह वार्तां कर्तुं सारथिना सह याति । पञ्चमे अङ्के त्रयाणां चर्चा भवति तदा कर्णवधस्य सूचना प्राप्यते । दुर्योधनः युद्धाय गन्तुमिच्छति तदा भीमार्जुनौ पुरतः आयातः । षष्ठाङ्कान्ते अश्वत्थामा सेनापतिपदम् अप्राप्य क्रुद्धः सन् गच्छति ।

**समीक्षा**

नाटकमिदं वीररसस्य परमोत्कृष्टमुदाहरणमस्ति । अस्य नाम्नि एवास्य औचित्यं प्रकाश्यते । द्रोपद्याः अनिबद्धायाः वेण्याः संयमनमेव संहारः एव अस्य प्रमुखविषयत्वात् वेणीसंहारेति शीर्षकम् । नाटकस्यास्य नायकः धीरोद्धतः भीमसेनः । नायिका च मुग्धा द्रौपदी वर्तते । प्रतिनायकत्वेन दुर्योधनः वर्णितोऽस्ति । नाटकेऽस्मिन् षडङ्काः सन्ति । सर्वेऽपि अङ्काः प्रतिपदं वीररसस्योद्दीपकाः सन्ति । सर्वेष्वपि अङ्केषु विभिन्नाः रसाः अपि यथावसरं कविना निबद्धाः । अथ चात्र पात्रचित्रणं तत्रापि कर्णभीमाश्वत्थामादीनां चित्रणम् अपूर्वमस्ति । भट्टनारायणस्य शैली प्रौढा, ओजोगुणनिरूपणपाण्डित्यं भाषाप्रभुत्वमपि आमोदपुरस्सरं पाठकानां हृदयमावर्जयति । तत्रापि कर्णस्योक्तिः देवायत्तं कुले जन्म मदायत्तं तु पौरुषम् - अस्मान् रञ्जयति।

भट्टनारायणस्य एका एव कृतिः वेणीसंहारः संस्कृतसाहित्याकाशे तथैव चकास्ति यथा नक्षत्रेषु चन्द्रमा ॥

**मङ्गलाचरणम्**

**निषिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः**
**करैरिन्दोरन्तश्छुरित इव सम्भिन्नमुकुलः ।**
**विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः**
**प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥ 1 ॥**

**पदच्छेदः** - निषिद्धैः (3.3) अपि (अ.) एभिः (3.3) लुलितमकरन्दः (1.1), मधुकरैः (3.3), करैः (3.3) इन्दोः (6.1) अन्तश्छुरितः (1.1) इव (अ.) सम्भिन्नमुकुलः (1.1) विधत्ताम् (वि धा लोट्लकारः, अन्यपुरुषः, एकवचनम्) सिद्धिम् (2.1) नः (6.3) नयनसुभगाम् (2.1) अस्य (6.1) सदसः (6.1) प्रकीर्णः (1.1) पुष्पाणाम् (6.3) हरिचरणयोः (6.2) अञ्जलिः (1.1) अयम् (1.1) ॥

**अन्वयः** - निषिद्धैः अपि एभिः मधुकरैः लुलितमकरन्दः इन्दोः करैः अन्तश्छुरितः इव सम्भिन्नमुकुलः हरिचरणयोः प्रकीर्णः अयं पुष्पाणाम् अञ्जलिः अस्य सदसः नयनसुभगां सिद्धिं नः विधत्ताम् ॥

**पदार्थः** - (मुहुः मुहुः) निषिद्धैः - निवारितैः, अपि एभिः - एतैः, मधुकरैः, अलिभिः- लुलितमकरन्दः - लुलितः - सञ्चालितः मकरन्दः - पुष्परसः यस्मादसौ, इन्दोः - विधोः, करैः - किरणैः, अन्तश्छुरितः इव - अन्तः - मध्ये, छुरितः - व्याप्तः इव, सम्भिन्नमुकुलः - सम्भिन्नाः प्रस्फुटिताः मुकुलाः - कुड्मलाः यत्र सः हरिचरणयोः हरेः विष्णोः चरणौ पादौ तयोः प्रकीर्णः - विस्तीर्णः समर्पितो वा । अयम् - एषः पुष्पाणाम् - कुसुमानाम्, अञ्जलिः - हस्तसम्पुटः, अस्य - एतस्य, सदसः

– सभायाः (सभास्थलोकस्येत्यर्थः), नयनसुभगाम् – नयनयोः – नेत्रयोः सुभगाम् – सुखदाम्, सिद्धिं – सफलताम् नः – अस्माकं विधत्ताम् – करोतु ॥

**भावार्थः** – पुनः पुनः निवारितैः अपि भ्रमरैः पीयमानपुष्परसः चन्द्रकिरणैः अन्तः गत्वा व्यापृतः इव यस्य कुड्मलाः प्रस्फुटिताः सन्ति सः हरिचरणयोः अर्पितः पुष्पाणाम् अञ्जलिः अस्याः सभायाः नेत्रयोः सुभगं फलं वितरतु इति भावः।

**टीका** – अयं पुष्पाणाम् – कुसुमानाम् अञ्जलिः नः – अस्माकं सिद्धिं विधत्ताम् – करोतु । अस्य सदसः – सभायाः नयनसुभगाम् नेत्रप्रीतिजननीम् (तथा च सदस्यानामपि नेत्रानुरागं विदधात्विति भावः । कीदृशोऽञ्जलिः) हरिचरणयोः – कृष्णपदद्वये प्रकीर्णः विस्तीर्णः । इष्टदेवतापूजोपकरणीभूत इति भावः । अत एव तद्द्वारा देवता प्रीता स्यात्तथा च निर्विघ्नस्वेष्टलाभ इति मङ्गलाचरणफलम् । अत्राञ्जलिपदेन लक्षणयाञ्जलिस्थपुष्पाणि लक्ष्यन्ते । पुनः कीदृशः । एभिः मधुकरैः लुलितमकरन्दः – पुरोवर्तिभ्रमरैः पीतरसः । कीदृशैः ? निषिद्धैः अपि निवारितैरपि । पुनः कीदृशः ? संभिन्नमुकुलः – प्रफुल्लकलिकाकः ।

अपि च

**कालिन्द्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं**
**गच्छन्तीमनुगच्छतोऽश्रुकलुषां कंसद्विषो राधिकाम् ।**
**तत्पादप्रतिमानिवेशितपदस्योद्भूतरोमोद्गते–**
**रक्षुण्णोऽनुनयः प्रसन्नदयितादृष्टस्य पुष्णातु वः ॥ 2 ॥**

**पदच्छेदः** – कालिन्द्याः (6.1) पुलिनेषु (7.3) केलिकुपिताम् (2.1) उत्सृज्य (अ.) रासे (7.1) रसम् (2.1) गच्छन्तीम् (2.1) अनुगच्छतः (6.1) अश्रुकलुषाम् (6.3) कंसद्विषः (6.1) राधिकाम् (2.1) तत्पादप्रतिमानिवेशितपदस्य (6.1) उद्भूतरोमोद्गते (6.1) अक्षुण्णः (1.1) अनुनयः (1.1) प्रसन्नदयितादृष्टस्य (6.1) पुष्णातु (पुष् लोट्लकारः, अन्यपुरुषः, एकवचनम्) वः (2.3) ॥

**अन्वयः** – कंसद्विषः अनुनयः वः पुष्णातु । कीदृशः ? अक्षुण्णः । अक्षुण्णः प्रसन्नदयितादृष्टस्य केलिकुपिताम् राधिकाम् कालिन्द्याः पुलिनेषु अनुगच्छतः रसम् उत्सृज्य गच्छन्तीम् अश्रुकलुषाम् (अत एव) तत्पादप्रतिमानिवेशितपदस्य उद्भूतरोमोद्गतेः ॥

**पदार्थः** – (टीका) – कंसद्विषः कृष्णस्य अनुनयः वः युष्मान् पुष्णातु – पुष्टान् करोतु । कीदृशः ? अक्षुण्णः – अखण्डितः । अत्र हेतुमाह – प्रसन्नदयितादृष्टस्य – सप्रसादराधावलोकितस्येत्यर्थः । कीदृशस्य – केलिकुपिताम् – कौतुक एव क्रोधवतीं राधिकां कालिन्द्याः – यमुनायाः पुलिनेषु – तोयोत्थितदेशेषु अनुगच्छतः – अनुप्रयातस्य । कीदृशीम् ? रासे गोपक्रीडायां रसम् अनुरागम् उत्सृज्य त्यक्त्वा गच्छन्तीम् अत एव अश्रुकलुषाम् रुदतीम् । तथा च रासानुरागिणी प्रणयकुपिता रुदती चेति राधायाः अवस्थात्रयम् सूचितम् । इदमालोक्य भगवतापि तदनुगमः कृत इत्याशयः । अत एव तत्पादप्रतिमासु तच्चरणपद्धतिषु निवेशितपदस्य दत्तपादस्य । चात्यन्तानुरागवशाद् उद्भूतरोमोद्गतेः जातरोमाञ्चस्य । अत एव प्रसादो राधयापि कृतः ॥

अपि च

**दृष्टः सप्रेम देव्या किमिदमिति भयात्संभ्रमाच्चासुरीभिः**
**शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितेन ।**
**आकृष्यास्त्रं सगर्वैरुपशमितवधूसंभ्रमैर्दैत्यवीरैः**
**सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु युष्मान् ॥ 3 ॥**

**पदच्छेदः** – दृष्टः (1.1) सप्रेम (अ) देव्याः (6.1) किम् (अ.) इदम् (1.1) इति (अ.) भयात् (5.1) संभ्रमात् (5.1) च (अ.) आसुरीभिः (3.3) शान्तान्तः (1.1) तत्त्वसारैः (3.3) सकरुणम् (अ) ऋषिभिः (3.3) विष्णुना (3.1) सस्मितेन

(3.1) आकृष्य (अ.) अस्त्रम् (2.1) सगर्वैः (3.3) उपशमितवधूसंभ्रमैः (3.3) दैत्यवीरैः (3.3) सानन्दम् (अ) देवताभिः (3.3) मयपुरदहने (7.1) धूर्जटिः (1.1) पातु (पा लोट्लकारः, अन्यपुरुषः, एकवचनम्) युष्मान् (2.3) ॥

**अन्वयः** – धूर्जटिः युष्मान् पातु । कीदृशः ? मयपुरदहने सप्रेम देव्याः दृष्टः । आसुरीभिः किम् इदम् इति भयात् संभ्रमात् च दृष्टः । ऋषिभिः सकरुणम् दृष्टः शान्तान्तः सस्मितेन विष्णुना दृष्टः । सगर्वैः दैत्यवीरैः दृष्टः । अस्त्रम् आकृष्य उपशमितवधूसंभ्रमैः देवताभिः सानन्दं च दृष्टः ॥

**पदार्थः** – (टीका) – धूर्जटिः – शिवः युष्मान् पातु – रक्षतु । कीदृशः ? मयपुरदहने – त्रिपुरदाहे सप्रेम – प्रीतिसहित यथा स्यात् तथा देव्याः – भवान्या दृष्टः । धन्याहं यद्वल्लभेनायमतिबलो महासुरो निषूदित इति प्रीतिमत्या भगवत्या दृष्ट इति भावः । तदैव आसुरीभिः – असुरवधूभिः किम् इदम् आपतितम् इति कृत्वा भयात् – त्रासात् संभ्रमात् – उद्वेगात् च दृष्टः ।। ऋषिभिः – वशिष्ठादिभिः सकरुणम् – दयान्वितं यथा स्यात्तथा दृष्टः । अत्रोपपत्तिमाह – शान्तान्तः शान्तमुपशमाभ यन्तरं तेन तत्त्वमनारोपितरूपं सारो बलं येषां तैः । शान्तमानसे रिपुनाशेऽपि करुणा युज्यते एव । सस्मितेन – हास्यवता विष्णुना नारायणेन दृष्टः । सगर्वैः – अहङ्कारान्वितैः दैत्यवीरैः दृष्टः । गर्वे हेतुमाह – अस्त्रम् आकृष्य कोदण्डादिकमुद्यम्य उपशमितवधूसंभ्रमैः शान्तनिजकान्तोद्वेगैः । देवताभिः इन्द्रादिभिः सानन्दः सहर्षः च दृष्टः । अत्र प्रबलारातिवध एवानन्दहेतुः । सर्वत्र मयपुरदहन इत्यन्वीयते ॥

**सूक्तयः**

**( क ) अकुशलदर्शना अपि स्वप्नाः प्रशंसया कुशलपरिणामा भवन्ति ।**

**अन्वयः** – (ये) अकुशलदर्शनाः अपि स्वप्नाः (भवन्ति, ते) प्रशंसया कुशलपरिणामाः भवन्ति ।

**संदर्भः** – इदं वाक्यं भानुमती सखीं चोद्दिश्य चेटी वदति । वेणीसंहारे द्वितीये अङ्के ॥

**विमर्शः** – ये खलु शयनकाले अनुभूताः अकुशलदर्शनाः अर्थात् अशुभघटनायाः सूचकाः स्वप्नाः भवन्ति, तेऽपि प्रशंसया अर्थात् देवानां स्तुत्या कुशलपरिणामाः अर्थात् शुभस्य परिणामस्य दायकाः भवन्ति । यदा मानवः शेते तदा सः स्वप्नमपि पश्यति । स्वप्नाः अनेकप्रकारकाः भवन्ति । तेषु केचन शुभस्य परिणामस्य दायकाः भवन्ति, केचन अशुभस्य परिणामस्य दायकाः भवन्तीति स्वप्नज्ञानां मतमस्ति । अस्यां स्थितौ कविरत्र स्तुतिकरणेन कुशलपरिणामो भवति । अतः स्वप्ने अकुशलदर्शने सत्यपि देवप्रशंसयासः कुशलपरिणामः भवितुमर्हतीति सूचिमत्र ॥

**( ख ) दैवायतं कुले जन्म महायत्तं तु पौरुषम् ॥**

**अन्वयः** – कुले (यत्) जन्म (भवति), (तत्) दैवायतं भवति, मदायतं तु पौरुषम् (भवति) ।

**संदर्भः** – इदं वाक्यम् अश्वत्थामानं प्रति कर्णः सक्रोधं वदति । वेणीसंहारे तृतीये अङ्के ॥

**विमर्शः** – इदं महादानिना कर्णेनोक्तं सुप्रसिद्धं वचनमस्ति । कर्णः कथयति यत् – (खस्मिन्) कुले जन्म स्यात् इति तु दैवायतं भवति । तत्र मानवाधीनं न किमपि भवति । परन्तु यस्मिन् कस्मिन् कुले जन्म लब्ध्वा, तदन्तरं शिक्षादिकं प्राप्य यत् पौरुषमर्जयति, तत्पौरुषं तु जनस्य स्वीयायत्तं भवतीति विचार्य कर्णेनात्र पौरुषमदायत्तमस्तीति कथितमस्ति ।

**अस्यायमाशयः** – प्रत्येकं मानवेन एतत् ध्यातव्यमस्ति यत् यस्मिंश्चित् कस्मिंश्चित् कुले यत् जन्म भवति, तज्जन्म तु दैवायत्तमस्ति । तस्मिन् विषये मदीयः कश्चिदधिकारः नास्ति । परं पुरुषार्थं कृत्वा यत् पौरुषार्जनमस्ति, तत् मदाधीनमस्ति । अतः यन्मदाधीनमस्ति तदेव योग्यतायाः निश्चयार्थं निर्णयार्थं वा ध्यातव्यम्, न तु कुलम् ॥

**( ग ) अनुल्लङ्घनीयः सदाचारः । न युक्तमनभिवाद्य गुरुन् गन्तुम् ॥**

**अन्वयः** – (यः) सदाचारः (भवति सः) अनुल्लङ्घनीयः (भवति) । गुरुन् अनभिवाद्य गन्तुं युक्तं नास्ति ।

**संदर्भः** – इदं वाक्यं अर्जुनं प्रति भीमः वदति । वेणीसंहारे द्वितीये अङ्के ॥

**विमर्शः** – सदाचारः नाम शिष्टाचारः । अर्थात् समाजे ये शिष्टाः भवन्ति, तैः क्रियमाणः आचारः शिष्टाचारः कथ्यते । एतादृशः सदाचारः सर्वदा, सर्वास्ववस्थास्वनुल्लङ्घनीयो भवति । एतादृशस्य सदाचारस्य कदाप्युल्लङ्घनं न कर्तव्यमिति भावः ।

ये गुरुवः सन्ति तेभ्यः सर्वदा प्रणीतिः वाच्या – इति अस्माकमाचारः । एषा प्रणतिः सामान्यतः दिवसस्य प्रथममिलनावसरे यदा गुरुणां समक्षमुपस्थतिः भवति, तदा तच्छिष्यैः क्रियते । तदनन्तरम् आदिनं यदा यदा कश्चित् प्रसंगः आयाति, तदा तदाप्येष आचारः पालनीयो भवति ।

अत्र संजयः धृतराष्ट्रश्च पुत्रशोकपीडितौ स्थितौ स्तः । तयोः यदार्जुनः भीमश्चाभिमुखं भवति, तदा अर्जुनः भीमं कथयति यत् न युक्तं पुत्रशोकपीडितौ पितरौ पुनरस्मद्दर्शनेनोद्वेजयितुम् । एवं विचार्य सः भीमं ततोऽग्रे गन्तुं सूचयति । तदा भीमः वाक्यमिदं कथयति । यद् यदा गुरोः पार्श्वतः गमनस्य प्रसङ्ग आयाति, तदा गुरून् अनभिवाद्य गन्तुं कदाचिदपि युक्तं नाम उचितं कर्म नास्तीति ॥

**( घ ) न युक्तं बन्धुव्यसनं विस्तरेणावेदयितुम् ॥**

**अन्वयः** – यद् बन्धुव्यसनं भवति, तत् विस्तरेण आवेदयितुम् युक्तं न (अस्ति) ।

**संदर्भः** – अस्य वाक्यस्य वक्ता मुनिवेशधारी चार्वाक नाम राक्षसः अस्ति । सः युधिष्ठिरं प्रति वाक्यमिदं वदति । वेणीसंहारे षष्ठे अङ्के ॥

**विमर्शः** – बन्धोः बन्धूनां वा यद् व्यसनं दुःखं वा भवति, तत् विस्तरपूर्वकम् आवेदयितुं युक्तम्, अर्थाद् योग्यं न भवति । स्वीयस्य बन्धुजनस्य यत् समागतं दुःखं व्यसनं वा भवति, तद् कदाचित् कुत्रचिद् आवेदनीयं भवति, चेत् विस्तरेण नावेदनीयमपितु संक्षेपतः आवेदनीयम् । एतदेव युक्तमस्तीति भावः ॥

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) अञ्जलिशब्दः ............. लिङ्गे प्रयुज्यते । (पुं., स्त्री, नपुं.)

(2) भट्टनारायणस्य उपाधिः ................ अस्ति । (कुलगुरुः, मृगराजलक्ष्मा, दीपशिखा)

(3) वेणीसंहारे मुख्यः रसः ................. अस्ति । (हास्यः, शान्तः, वीरः)

(4) जयद्रथस्य पत्न्याः ................ नाम वर्तते । (दुःशला, द्रौपदी, भानुमती)

(5) द्रोणाचार्यस्य वधस्य सूचना ............... अङ्के प्रदीयते । (द्वितीये, तृतीये, पञ्चमे)

(6) कृष्णः ................ हस्तिनापुरं गतवान् । (सन्ध्यर्थम्, युद्धार्थम्, शिक्षार्थम्)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) कस्य चरणयोः भट्टनारायणः पुष्पाञ्जलिं समर्पयति ?

(2) कंसद्विषः कीदृशोऽनुनयः अस्मान् पातु ?

(3) भट्टनारायणः कं वादं खण्डयति ?

(4) वेणीसंहारस्य मङ्गलपद्ये मयपुरदहने पातु – इति प्रार्थना कमुद्दिश्य कृता ?

(5) लुलितमकरन्दः – इत्यत्र कः समासः ?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) हरिचरणयोः कीदृशः अञ्जलिः समर्पितः ?

(2) कीदृशः धूर्जटिः केन केन दृष्टः ?

(3) तत्पादप्रतिमानिवेशितपदस्य - इत्यस्य पदस्य कोऽर्थ ?

(4) के के आचार्याः भट्टनारायणं स्मरन्ति ?

(5) वेणीसंहारस्य तृतीयाङ्के किं कथावस्तु वर्तते ?

**4. संक्षेपतः परिचयं कारयत ।**

(1) मधुकरः ।

(2) सम्भिन्नमुकुलः ।

(3) विधत्ताम् ।

(4) प्रकीर्णः ।

**5. शक्तिविवंचनं कुरुत।**

(1) अकुशलदर्शना अपि स्वप्नाः प्रशंसया कुशलपरिणामा भवन्ति ।

(2) देवायत्तं कुले जन्म।

(3) न युक्तं बन्धुव्यसनं विस्तरेणविदमितुम्।

**6. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) भट्टनारायणः ।

(2) धूर्जटिः ।

(3) कंसद्विषः अनुनयः ।

**छात्रप्रवृत्तिः**

अभिमन्योः बलिदानस्य कथा पठनीया ।

**शिक्षकप्रवृत्तिः**

मान-अपमानयोः समता यथा स्यात् तथोपदेशः करणीयः ॥

●

# १३ उत्तररामचरितम्

**प्रस्तावना** – महाकविभवभूतिः 'श्रीकण्ठपदलाञ्छनः' तथा 'पदवाक्यप्रमाणज्ञः' इत्युपाधिभ्यां विभूषितः अस्ति । भवभूतिः काश्यपगोत्रोत्पन्नः उदुम्बरः ब्राह्मणः आसीत् । भवभूतेः जन्मस्थानं ग्वालियर-समीपस्थं पवाया वा पोलवाया इति नगरं मन्यते किन्तु निश्चयेन किमपि वक्तुं न शक्यते । भवभूतेः पितुर्नाम नीलकण्ठः मातुश्च नाम जतुकर्णी (जातुकर्णी वा) आसीत् । भवभूतेः गुरोर्नाम ज्ञाननिधिः आसीत् । भवभूतिः मीमांसा-न्याय-व्याकरणेषु प्रकाण्डः पण्डितः आसीत् अतः सः आत्मानं 'पदवाक्यप्रमाणज्ञः' इति निरूपयति ।

एका दन्तकथा अस्ति यत् भवभूतिः उत्तररामचरितं विरच्य कालिदासाय दर्शयितुं जगाम । कालिदासः एकस्मिन् पद्ये 'रात्रिरेवं व्यरंसीत्' इत्यत्र बिन्दुमात्रं परिवर्तनं कृत्वा 'रात्रिरेव व्यरंसीत्' इति पाठम् अकरोत् । किन्तु एषा दन्तकथा एवास्ति । तथैव भोजप्रबन्धेऽपि अनेके कवयः एकस्मिन् स्थाने एकत्रिताः निरूपिताः सन्ति । भोजप्रबन्धः कल्पनाभरितः अस्ति अतः तत्र तथ्यं नास्ति ।

बाणभट्टः हर्षचरिते भासं कालिदासं भट्टारहरिचन्द्रम् अन्यान् कवीन् च स्मरति किन्तु भवभूतेः उल्लेखं न करोति। अतः भवभूतिः तस्य परवर्ती स्यात् । मम्मटः (1100 ख्रीष्ट.), धनञ्जयः (995 ख्रीष्ट.), राजशेखरः (900 ख्रीष्ट.) इत्येते भवभूतेः उल्लेखं कृतवन्तः । वामनः (800 ख्रीष्ट.) भवभूतेः पद्यम् उदाहरति अतः भवभूतिः तस्मात् पूर्वं विभाव्यते। राजतरङ्गिण्यनुसारं भवभूतिः कनौजराज्ञः यशोवर्मणः सभापण्डितः आसीत् । यशोवर्मा सप्तमशताब्द्याः अन्ते अष्टमशताब्द्याः च आरम्भे अभवत् इति उल्लेखं विलोक्य भवभूतेः अपि इममेव कालं निर्धारयामः । निष्कर्षरूपेण उच्यते यत् भवभूति ई. 700 उत्तरार्द्धे ई. 800 पूर्वार्द्धे च अभवत् इति ।

---

**भवभूतेः कृतयः**

भवभूतेः त्रीणि रूपकाणि प्रसिद्धानि सन्ति, महावीरचरितम् (नाटकम्), मालतीमाधवम् (प्रकरणम्), उत्तररामचरितम् (नाटकम्) इति । महावीरचरिते सप्त अङ्काः सन्ति। अस्मिन् रामस्य पूर्वचरितं वर्णितम् अस्ति । मालतीमाधवं प्रकरणम् अस्ति अतः अस्मिन् दश अङ्काः सन्ति । अस्य कथावस्तु कविकल्पितम् अस्ति । अत्र मालती नायिका, माधवश्च नायकः अस्ति । द्वयोः प्रेमकथा प्रधाना अस्ति अस्मिन् प्रकरणे । उत्तररामचरितं नाटकम् अस्ति । अस्मिन् सप्त अङ्काः सन्ति। इदं भवभूतेः श्रेष्ठं नाटकं वर्तते । रामस्य उत्तरचरितम् अत्र वर्णितम् अस्ति ।

**भवभूतेः वैशिष्ट्यम्**

भवभूतेः रीतिः गौडी, गुणः ओजः चास्ति । अस्य प्रियं छन्दः शिखरिणी अस्ति । उत्तररामचरिते मुख्यं रसं करुणं प्रयुज्य एषः नूतनं मार्गं निर्मितवान् । कालिदासः प्रकृतेः कोमलं स्वरूपं वर्णयति किन्तु भवभूतिः प्रकृतेः कठोरं स्वरूपं वर्णयति । भवभूतेः रामः मर्यादां परित्यज्य मुक्तमनसा रोदिति । इत्थम् अनेकरीत्या भवभूतिः संस्कृतनाट्यकारेषु विशिष्टः प्रतिभाति ।

**उत्तररामचरितस्य कथासारः**

उत्तररामचरितं नाटकम् अस्ति । अस्मिन् सप्त अङ्काः वर्तन्ते । प्रथमाङ्कस्य नाम 'चित्रदर्शनम्' द्वितीयाङ्कस्य नाम

'पञ्चवटी-प्रवेशः', तृतीयाङ्कस्य नाम 'छाया' चतुर्थाङ्कस्य नाम 'कौसल्याजनकयोगः', पञ्चमाङ्कस्य नाम 'कुमारविक्रमः', षष्ठाङ्कस्य नाम 'कुमारप्रत्यभिज्ञानम्', सप्तमाङ्कस्य नाम 'सम्मेलनम्' अस्ति । नामानुगुणं प्रत्येकस्मिन् अङ्के कथावस्तु निरूपितं वर्तते ।

रामस्य उत्तरजीवनम् आधारीकृत्य इदं नाटकं विरचितम् अस्ति । युद्धानन्तरं सर्वे वानराः अन्ये राजानश्च रामस्य राज्याभिषेकाय अयोध्याम् आगताः आसन्, ते स्वस्थानं प्रति प्रस्थानं कुर्वन्ति । रामस्य मातरः गुरुः वसिष्ठश्च सपत्नीकः ऋष्यशृङ्गस्य आश्रमं गताः सन्ति अतः अयोध्यायां कोऽपि गुरुजनः न वर्तते । अष्टावक्रः गुरूणां सन्देशं नीत्वा रामस्य समीपम् आगच्छति । तदनु चित्रवीथीदर्शनेन सीतायाः मनसि पुनः गङ्गां गत्वा स्नानस्य इच्छा भवति । प्रथमाङ्के एव सीताविषयः अपवादः नगरे प्रसरति। दुर्मुखस्य मुखात् अयम् अपवादः रामेण अपि श्रूयते । तदा रामः सीतायाः इच्छापूर्तेः व्याजेन सीतां वनं प्रेषयति । द्वितीयाङ्के शम्बूकस्य वधार्थं रामः पञ्चवटीं प्रविशति । तत्र सः सीतया सह उषितानि स्थानानि विलोक्य रोदिति । तृतीये अङ्के गङ्गायाः आशीर्वादेन छायारूपा सीता रामं द्रष्टुं शकनोति किन्तु रामः तां द्रष्टुं न पारयति। वासन्त्या सह रामस्य वार्तालापः भवति । तेन सीतायाः मनसि रामस्य मनोदशा तथा त्यागकारणं स्पष्टीभवति । रामस्य मनसि अद्यापि सीतायाः प्रेम वर्तते इति ज्ञात्वा सीता प्रसन्ना भवति ।

चतुर्थाङ्के अरुन्धती सीतया शून्याम् अयोध्यां गन्तुं नेच्छति । तस्याः अनुसरणं रामस्य मातरः अपि कुर्वन्ति तथा वसिष्ठादयः सर्वे वाल्मीकेः आश्रमं प्रति यान्ति । अत्र कौसल्या-जनकयोः मेलनं भवति । जनकः सीतानिर्वासनात् अत्यन्तं दुःखितः अस्ति । तत्र लवः प्रविश्य द्वाभ्यां सह वार्तालापं करोति । अङ्कान्ते रामस्य अश्वमेधयज्ञस्य अश्वः आश्रमबालकैः बध्यते । पञ्चमे अङ्के कुशलवयोः पराक्रमवर्णनं वर्तते । लक्ष्मणस्य पुत्रेण चन्द्रकेतुना सह लवः योद्धुम् उद्यतः भवति। लवः जृम्भकास्त्रस्य प्रयोगं करोति । एतत् दृष्ट्वा सुमन्त्रः विस्मितो भूत्वा जृम्भकास्त्रस्य उत्पत्तिं कथयति । रामस्य नाम आकर्ण्य क्रुद्धः लवः तस्य विषये जल्पति । अनेन पुनः चन्द्रकेतुना सह तस्य युद्धारम्भो भवति ।

षष्ठाङ्के लवस्य चन्द्रकेतोश्च पराक्रमस्य वर्णनं वर्तते । रामः शम्बूकस्य वधं कृत्वा युद्धस्थानम् आगत्य गभीरवचसा युद्धविरामं कारयति । लवं विलोक्य रामः सीतां स्मरति । तदानीं कुशस्यापि प्रवेशो भवति । द्वयोः हस्ते राजचिह्नं तथा सीतासदृशीं मुखाकृतिं विलोक्य रामः 'नूनम् एतौ सीतापुत्रौ स्याताम्' इति सम्भावयति । सप्तमाङ्के गर्भनाटकस्य परिकल्पना वर्तते । नगरवासिभिः सह रामः सीतायाः त्यागानन्तरं किं किं जातम् इति नाटकं दृष्ट्वा जानाति । इत्थं कारुण्यपूर्णं नाटकं दृष्ट्वा रामः मूर्च्छितः भवति तदा गङ्गायाः आज्ञया सीता स्वयं रामं चेतयति । गङ्गायाः वचनेन सीतापवादः निवृत्तो भवति तथा रामसीतयोः मेलनं भवति इत्थम् इदं नाटकं सुखान्तं विहितम् अस्ति भवभूतिना ।

**मङ्गलाचरणम्**

**इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।**

**वन्देमहि च तां वाचममृतामात्मनः कलाम् ॥ 1॥**

**पदच्छेदः** – इदम (2.1) कविभ्यः (4.3) पूर्वेभ्यः (4.3) नमोवाकम् (2.1) प्रशास्महे (लट् उ.पु.ब.व.) वन्देमहि (लट् उ.पु.ब.व.) ताम् (2.1) वाचम् (2.1) अमृताम् (2.1) आत्मनः (6.1) कलाम् (2.1) ॥

**अन्वयः** – पूर्वेभ्यः कविभ्यः इदं नमोवाकं प्रशास्महे, आत्मनः कलां ताम् अमृतां वाचं वन्देमहि च ॥1॥

**पदार्थः** – कविभ्यः – पुरातनकाव्यकर्तृभ्यः व्यासवाल्मीकिकालिदासादिभ्यः, इदं – मङ्गलाचरणरूपं, नमोवाकं – नमोवचनं, प्रशास्महे – निर्दिशामः ।आत्मनः – परमात्मनः, कलाम् – अंशभूतां, तां – प्रसिद्धाम् अनिर्वाच्यां वा, अमृतां – शाश्वतीं, वाचं – वाग्देवतां, वन्देमहि च – प्रणमामश्च ।

**भावार्थः** – पूर्वकवीन् नमस्कुर्वन् महाकविः मङ्गलाचरणे लिखति यत् पूर्वकाव्यकर्तृभ्यः व्यासादिभ्यः इदं नमोवचनं निर्दिशामः। किञ्च परमात्मनः अंशभूताम् अमृतां शाश्वतीं वाणीमपि प्रणमामः ।

## टिप्पणी

**( क ) समासपदानि** – नमोवाकम् – नमः इति शब्दस्य वाकः उक्तिः यस्मिन् तत् बहु ।

**( ख ) छन्दः** अस्मिन् मङ्गलाचरणपद्ये अनुष्टुप् छन्दः वर्तते ।तल्लक्षणं यथा– 'श्लोके षष्ठे गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥'

**( ग ) विशेषः** 'वन्देमहि' इत्यस्य स्थाने कुत्रचित् 'विन्देम देवतां वाचम्' इति पाठभेदः अस्ति ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) भवभूतेः पितुर्नाम .............. आसीत् ।(नीलकण्ठः, श्रीकण्ठः, नारायणः)

(2) उत्तररामचरितम् ............... प्रकारकं रूपकम् अस्ति ।(प्रकरणम्, नाटकम्, नाटिका)

(3) तृतीयाङ्कस्य नाम .............. अस्ति ।(चित्रदर्शनम्, सम्मेलनम्, छाया)

(4) ........... गुरूणां सन्देशं नीत्वा अयोध्याम् आगच्छति । (अष्टावक्रः दुर्मुखः, शम्बूकः)

(5) लक्ष्मणपुत्रस्य नाम ............. अस्ति ।(चन्द्रकेतुः चित्रकेतुः, मकरकेतुः)

(6) उत्तररामचरिते ............. अङ्काः सन्ति ।(सप्त, पञ्च, नव)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) भवभूतेः गुरोः नाम किम्?

(2) भवभूतेः प्रियं छन्दः किमस्ति?

(3) रामः कस्य मुखात् सीताविषयकम् अपवादं श्रुणोति?

(4) वसिष्ठादयः सर्वे कस्य आश्रमं गताः सन्ति?

(5) गर्भनाटकस्य परिकल्पना कस्मिन् अङ्के वर्तते?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) जृम्भकास्त्रस्य उत्पत्तिं कः कदा च कथयति?

(2) सीतायाः मनसि पुनः गङ्गां गत्वा स्नानस्य इच्छा कदा भवति?

(3) रामः केन व्याजेन सीतां वनं प्रेषयति?

(4) 'पदवाक्यप्रमाणज्ञः' इति पदेन किं ज्ञायते?

**4. संक्षेपतः परिचयं कारयत ।**

(1) कविभ्यः ।

(2) वन्देमहि ।

(3) भवभूतेः ।

(4) गुरूणाम् ।

(5) मुखाकृतिम् ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) मङ्गलाचरणम् ।

(2) भवभूतेः कृतयः ।

(3) रामः ।

**छात्रप्रवृत्तिः**

छात्राः महावीरचरितं मालतीमाधवञ्च पठेयुः ।

**शिक्षकप्रवृत्तिः**

उत्तररामचरितस्थान् अन्यान् विविधश्लोकान् गापयेत्॥

●

# १४ मृच्छकटिकम्

**प्रस्तावना** – संस्कृतसाहित्ये यथा अनेकेषां कवीनाम् आचार्याणां वा परिचयो न प्राप्यते, स्वल्पो वा प्राप्यते, संशययुक्तो वा प्राप्यते तथैव शूद्रकस्यापि वर्तते । तस्य विषये इदम् इत्थम् इति दृढं वक्तुं नैव शक्यते । मृच्छकटिकस्य प्रथमाङ्कस्य प्रस्तावनां दृष्ट्वा केवलं तावत् अनुमानं कर्तुं शक्यते यत् कवेः व्यक्तित्वं बलविद्यावैभवसम्पन्नं तथा युद्धादिकौशलयुक्तम् आसीत् इति। तत्रैव लिखितं यत् शतं वर्षाणि दश दिनानि च एतावत् आयुष्यम् आसीत् तस्य, ततस्तेन अग्निप्रवेशः कृतः । किन्तु कविः स्वस्य अग्निप्रवेशस्य लेखनं कथं कर्तुं शक्नोति ? इति महती संशीतिः वर्तते ।

प्रस्तावनायां तद्विषये लिखितं यत् सः द्विजः, वीरः, धीरः, योद्धा, तपस्वी, शिवभक्तः प्रशस्तगुणसम्पन्नः चासीत्। एतस्मात् अधिकं किमपि न प्राप्यते, किञ्च, एतदपि सत्यमेव स्यादिति शङ्का अद्यापि सेव्यते ।

शूद्रकः प्रायः दाक्षिणात्यः स्यात् । मृच्छकटिके 'खुण्डमोटकः', 'सापवासिनि !', 'नाणकमोषिका', 'वयं दाक्षिणात्याः', 'कर्णाटकलहप्रयोगम्' इत्यादयः दक्षिणेषु प्रयुज्यमानाः शब्दाः वर्तन्ते । तेन अनुमातुं शक्यते यत् शूद्रकः दाक्षिणात्यः स्यादिति ॥

**कविपरिचयः**

शूद्रकस्य कालविषयेऽपि सम्भाव्यते यत् सः कालिदासात् अपि पूर्वम् अभवत् । कालिदासः मालविकाग्निमित्रे लिखति 'भाससौमिल्लककविपुत्रादीनाम्' इति । अत्र सौमिल्लस्य उल्लेखः अस्ति । राजशेखरस्य मतानुसारं रामिलः सौमिलः च शूद्रककथाकारौ आस्ताम् । तेन लिखितं यत्–

**तौ शूद्रककथाकारौ रम्यौ रामिलसौमिलौ ।**
**काव्यं ययोर्द्वयोरासीदर्धनारीनरोपमम् ॥**

एतत् अवलोक्य शूद्रकः कालिदासस्य पूर्ववर्ती सम्भाव्यते । तथापि विदुषां मतान्तराणि सन्त्येव ।

शूद्रकस्य नाम्ना इदं प्रकरणमेव प्राप्यते मृच्छकटिकम् । अन्ये ग्रन्थाः कविना विरचिताः स्युः किन्तु अद्य अनुपलब्धाः सन्ति। अथवा कविना एकमेव प्रकरणं विरचितं स्यात् ।

**मृच्छकटिकस्य कथासारः**

मृच्छकटिकं प्रकरणप्रकारकं रूपकम् अस्ति । अस्य रचयिता महाकविः शूद्रकः अस्ति । प्रकरणत्वात् अत्र दश अङ्काः वर्तन्ते । अस्य नायकः चारुदत्तः, नायिका वसन्तसेना, प्रतिनायकः शकारः अस्ति । विदूषकः मैत्रेयः चारुदत्तस्य सखा अस्ति। प्रथमे अङ्के चारुदत्तस्य दारिद्र्यं वर्णितम् अस्ति । राजमार्गे वसन्तसेनाम् अनुगम्यमानः शकारः वर्णितोऽस्ति। भीता वसन्तसेना अन्धकारस्य लाभेन चारुदत्तस्य गृहे आभरणानि न्यासरूपेण दत्त्वा स्ववासं प्रति गच्छति । द्यूतेन सर्वं पराजितः संवाहकः वसन्तसेनया रक्ष्यते । अनेन संवाहकः संन्यासी भवति । चारुदत्तस्य गृहे स्थापितानि आभरणानि शर्विलकः चोरयति । न्यासः प्रत्यर्पणीयः इति विचिन्त्य चारुदत्तः स्वपत्न्या दत्तां रत्नमालां वसन्तसेनायै प्रेषयति । वसन्तसेना प्रियदत्तोपहारं मत्त्वा रत्नावलीं स्वीकरोति।

आभरणानि चोरयित्वा शर्विलकः वसन्तसेनायाः गृहम् आगच्छति । वसन्तसेनायाः दास्याम् मदनिकायां सः अनुरक्तः आसीत् अतः एतावत् धनं समर्प्य मदनिकां मोचयितुम् इच्छति । वसन्तसेना एतत् ज्ञात्वा मदनिकां मोचयति, आभरणानि च स्वीकरोति। ततश्च वसन्तसेना एकदा चारुदत्तेन मेलितुं तद्गृहं याति । तदा सुवर्णशकटप्राप्तये चारुदत्तस्य पुत्रः रोहसेनः रोदिति । वसन्तसेना तं रुदन्तं दृष्ट्वा स्वकीयानि आभरणानि मृदः शकटे संस्थाप्य सुवर्णशकटं निर्मातुम् आदिशति । अस्मादेव प्रसङ्गात् अस्य प्रकरणस्य नाम मृच्छकटिकम् इति अभवत् ।

चारुदत्तं मेलितुम् आगता वसन्तसेना भ्रमवशात् शकारस्य रथे उपविशति । उद्याने रथो गच्छति तदा शकारः रथे वसन्तसेनां पश्यति । सः वसन्तसेनां कामपूर्तये प्रार्थयते । वसन्तसेना तदाधीना न भवति अतः शकारः तस्याः कण्ठमवरुध्य तां मूर्च्छितां मृतां ज्ञात्वा उद्याने एव पर्णैः आच्छाद्य ततः पलायते । शकारः चारुदत्तं विरुध्य न्यायालये अभियोगं करोति यत् वसन्तसेनायाः

हत्या चारुदत्तेन कृता । विरुद्धैः प्रमाणैः चारुदत्ते अभियोगः सिद्धः भवति । न्यायपालकः चारुदत्ताय मृत्युदण्डं प्रयच्छति । शूलारोपणाय चारुदत्तं स्मशानं नयन्ति चाण्डालाः ।

तत्र उद्याने संवाहकः संन्यासी स्वीयानि आर्द्रवस्त्राणि पर्णचये स्थापयति । जलार्द्रवस्त्रेण पत्रचयस्य अधः मूर्च्छिता वसन्तसेना सचेता भवति । सा चारुदत्तवृत्तान्तं श्रुत्वा झटिति तत्र गच्छति । तस्मिन्नेव काले कश्चित् आर्यकः, यः चारुदत्तेन पूर्वम् उपकृतः आसीत्, सः वर्तमानं राजानं निहत्य स्वयं राजा भवति । चारुदत्ते कृतः अभियोगः असिद्धः भवति । वसन्तसेनया सह चारुदत्तस्य मेलनं भवति । चारुदत्तः शकारादीन सर्वान् दुष्टान् क्षाम्यति । तान् न दण्डयति। इत्थम् इदं प्रकरणम् अत्र पूर्णं भवति ।

**मृच्छकटिकस्य मङ्गलाचरणम्**

**पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-**
**रन्तः प्राणावरोधव्युपरत सकलज्ञानरुद्धेन्द्रियस्य ।**
**आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या**
**शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥**

**पदच्छेदः** – पर्यङ्कग्रन्थि बन्धद्विगुणितभुजगाश्लेष संवीतजानोः (6.1), अन्तः (अ.), प्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य (6.1), आत्मनि (7.1), आत्मानम् (2.1), एव (अ.) व्यपगतकरण्म् (2.1), पश्यतः (6.1), तत्त्वदृष्ट्या (3.1), शम्भोः (6.1), वः (2.3), पातु (लोट् प्र.पु.ए.व.), शून्येक्षणघटितलयब्रह्मलग्नः (1.1), समाधिः (1.1) ॥

**अन्वयः** – पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः अन्तः प्राणावरोधव्यपरतसकलज्ञानरुद्धेन्द्रियस्य आत्मनि तत्त्वदृष्ट्या व्यपगतकरणम् आत्मानम् एव पश्यतः शम्भोः शून्येक्षणघटितलयब्रह्मलग्नः समाधिः वः पातु ।

**पदार्थः** – पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः पर्यङ्कस्य – योगासनविशेषस्य यो ग्रन्थिः – सन्धिस्थलं तस्य बन्धे – धारणे द्विगुणितः – द्विगुणतो यो भुजगः – सर्पः, तस्य आश्लेषेण – वेष्टनतयासमालिङ्गनेन संवीते – समाच्छन्ने जानुनी – जानुद्वयं यस्य तस्य, बद्धपद्मासनस्येति भावः । अन्तः प्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य अन्तः – शरीराभ्यन्तरे प्राणानाम् – प्राणापानसमानोदानव्यानानां अवरोधेन – निरोधेन व्युपरतम् – निवृत्तं सकलं – सम्पूर्णं ज्ञानं – बाह्यविषयकबोधः येषां तानि, अतएव रुद्धानि – स्ववशे स्थापितानि इन्द्रियाणि – श्रवणादीनि येन तस्य । आत्मनि – प्रत्यक् चैतन्ये तत्त्वदृष्टया – यथार्थज्ञानेन, व्यपगतकरणं व्यपगतं – विनष्टं करणं – ज्ञानसाधनभूतमिन्द्रियं शरीरम्, आत्मानम् – विशुद्धचैतन्यस्वरूपम्, पश्यतः – अनुभवतः साक्षात्कुर्वतः, शम्भोः – शिवस्य, शून्येक्षणघटितब्रह्मलग्नः शून्यस्य – सर्वथा निराकारस्वरूपस्य ब्रह्मणः ईक्षणेन – दर्शनेन घटितः – सम्पन्नः: लयः – लीनता यस्मिन् स चासौ ब्रह्मलग्नः – परमब्रह्मसम्बन्द्धः। समाधिः – एकतानतया ब्रह्मचिन्तनम् । वः – सामाजिकान् युष्मान् पातु – रक्षतु ।

**भावार्थः** – समाधिसमये विशेषासनावसरे यस्य जानोः सर्पवेष्टनकारणात् आयासपूर्वकं बंधनं जातम् अस्ति, यश्च प्राणादिवायून अन्तः अवरुध्य बाह्यज्ञानात् विरतः अस्ति, यः सर्वाभिमानैः मुक्तः सन् तत्त्वज्ञानमात्रेण ब्रह्मसाक्षात्कारं करोति, इत्थं सर्वत्र शून्यदर्शनेन स्वयं बद्धः शिवस्य समाधिः युष्मान् रक्षतु इति भावः ॥

**मृच्छकटिकस्य साहित्यिकं मूल्याङ्कनम्**

अस्य प्रकरणस्य कथावस्तु तत्कालीनस्य समाजस्य चित्रणं नेत्रपथम् अवतारयति । न केवलं कथा दृष्ट्या अपि तु राज्यस्य शासनव्यवस्था, व्यावहारिकं जीवनं, नगरस्य आकर्षणविषयाः, गणिकानां व्यवहारः, दासप्रथा, द्यूतक्रीडा, विटस्य धूर्तता, चौरकर्मादि नैके विषयाः अत्र निरूपिताः ।

मृच्छकटिकप्रकरणे दशाङ्कात्मके भागे संपूर्ण रूपकं महाकविना शूद्रकेन वर्णितमस्ति । प्रकरणेऽस्मिन् सच्चरित्रस्य चारुदत्तस्य वर्णनं सर्वातिशायि, सौन्दर्यमणिः वसन्तसेना अत्र यद्यपि गणिका तथापि प्रमुखनायिकारूपेण कविना वर्णिता।

प्रकरणेऽस्मिन् आर्यकस्य राज्यप्राप्तिः, अपि कविना सम्यग्वर्णिता । संपूर्णमपि प्रकरणं विभागदूयेन मध्ये रूपकत्वेन निरूपितम् ।

(1) वसन्तसेनाचारुदत्तयोः प्रणयप्रसङ्गः ।

(2) राज्यविद्रोहः तथा च आर्यकस्य पुनः राज्यप्राप्तिः ।

दशाङ्कानां नामानि –

(1) अलङ्कारन्यासः

(2) द्यूतकारः संवाहकः

(3) संधिच्छेदः

(4) मदनिका शर्विलकः

(5) दुर्दिनम्

(6) प्रवहणविपर्ययः

(7) आर्यकापहरणम्

(8) वसन्तसेनामोचनम्

(9) व्यवहारः

(10) संहारः

मृच्छकटिकं न केवलं कथावस्तुना मनोहरम् अपितु चरित्र-चित्रणेन उत्तमं रूपकम् । अत्र मुख्यः रसः विप्रलम्भश्रृङ्गारः अत्र प्रसादगुणः तथा मागधीशौरसेनीप्राकृतादिभाषाणामपि केचन प्रयोगाः दृश्यन्ते ।

शूद्रकस्य इदं वैशिष्ट्यं वर्तते यत् तेन तत्कालीने समाजे गणिका अपि उत्तमा 'वधूः' भवितुमर्हतीति सम्यक् निरूपितमस्ति।

अतः एव उच्यते मनीषिभिः यत् दशरूपेकेषु परिगणितं प्रकरणं प्रायः न प्राप्यते, परं प्राप्तं एकमपि मृच्छकटिकं प्रकरणं सर्वान् अतिशेते ।

- मृच्छकटिकस्य अनेके अनुवादग्रन्थाः प्राप्यन्ते ।
- टीकायामपि सर्वप्राचीना टीका पृथ्वीधरस्य वर्तते ।
- जीवानन्देनापि एका टीका लिखिता ।
- हरिदासेन अस्य व्याख्या सम्यक् प्रकाशिता ।

## टिप्पणी

**(क) समासपदानि** (1) पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः । पर्यङ्कस्य ग्रन्थिः, तस्य बन्धे द्विगुणितः भुजगः, तस्य आश्लेषेण संवीते जानुनी यस्य, तस्य(ब.व्री.) (2) शून्येक्षणघटितलयब्रह्मलग्नः । शून्यस्य ईक्षणेन घटितः लयः, स चासौ ब्रह्मलग्नः (कर्मधारयः, समाधेः विशेषणत्वात् ब.व्री.)

**(ख) पदविशेषः** – समाधिः । समाधीयते अस्मिन् मनः इति समाधिः । अयं शब्दः पुंल्लिङ्गे वर्तते । भ्रमवशात् जनाः स्त्रीलिङ्गं मत्वा प्रायः रुचिशब्दवत् रूपाणि वदन्ति ।

**(ग) स्रग्धराछन्दः** । तल्लक्षणं पूर्वं कथितमेव ।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानानां पूर्तिः विधेया ।**

(1) मृच्छकटिकं .................. प्रकारकं रुपकम् अस्ति । (प्रकरण, नाटक, भाग)

(2) ........... समाधिः वः पातु । (विष्णोः, शम्भोः, ब्रह्मणः)

(3) मृच्छकटिके .............. नायिका अस्ति । (वासवदत्ता, विलासवती, वसन्तसेना)

(4) ................. द्यूते सर्वं पराजयते । (संवाहकः, सम्मोहनः, शर्विलकः)

(5) चारुदत्तस्य पुत्रः ............ अस्ति । (रोहसेनः, रोहितः, रमणः)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) शूद्रकः कस्य प्रदेशस्य निवासी सम्भाव्यते?

(2) मृच्छकटिके कति अङ्काः वर्तन्ते?

(3) चारुदत्तस्य सखा कः अस्ति?

(4) शर्विलकः कस्याम् अनुरक्तः आसीत्?

(5) कः वसन्तसेनायै रत्नमालां प्रेषयति?

**3. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) शूद्रकस्य व्यक्तित्वं कीदृशं लिखितम् अस्ति?

(2) 'मृच्छकटिकम्' इति नामकरणं कस्मात् जातम्?

(3) चारुदत्तस्य उपरि किमर्थम् अभियोगः भवति?

**4. संक्षेपतः परिचयं कारयत ।**

(1) आत्मनि ।

(2) शम्भोः ।

(3) समाधिः ।

(4) पातु ।

(5) वः ।

**5. विवरणात्मिका टिप्पणी लेखनीया ।**

(1) शूद्रकस्य कालः ।

(2) शकारस्य दुष्टता ।

(3) चारुदत्तः ।

**छात्रप्रवृत्तिः**

मृच्छकटिकम् नाम्नः कारणभूता घटना आलेखनीया ।

**शिक्षकप्रवृत्तिः**

चारुदत्तस्य दानशीलता छात्रेभ्यः प्रदर्शनीया ॥

●

# १५ निबन्धलेखनम्

अथ किंलक्षण: निबन्धो भवति ? उच्यते – प्राय: यत्किञ्चित् विषयक: स्पष्टार्थसम्बन्धो गद्यबन्ध: निबन्ध: इति । वस्तुत: किञ्चिद्विषयमालम्ब्य स्वाभिप्रायस्य स्वविमर्शस्य च लेखेन निबन्धनं निबन्ध: इति युज्यते वक्तुम् ।

परमात्रार्थ एवास्य शब्दस्य व्यवहारो न भवति, परन्तु लोकेऽन्यत्राप्ययं शब्द: प्रयुज्यते । यत्र स्वाभिप्रायादिर्नास्ति, केवलं तन्त्रान्तरेभ्य: समाहृत्यैकवस्तुविषयोऽर्थ: स्वशब्दैरुच्यते तत्रान्यत्र चेतिवृत्ताख्याने सर्ग–सौन्दर्य–वर्णने चेतनाचेतनार्थानामाकारादिवर्णने चास्य शब्दस्य प्रयोगस्य दर्शनात् ।

निबन्धा: खलु परिशीलनमन्तरेण न शक्या: निबद्धुम् । अस्य निबन्धने बहुविधं प्रशिक्षणमावश्यकं भवति । एतत् सर्वमत्र सङ्ग्रहेणोपन्यस्यते –

**विषयैक्यम्** – निबन्धे खलु एकमेव वर्ण्यविषय: प्रतिपाद्यविषयो वा स्यात् । अथ चायं यथावद् वितनुयात् । यन्नाम चेतसा विचारितं तदत्र वचसा प्रकाशनीयम् । निबन्धान्तं यावत्संनिधापयेत् मनसि स्वीकृतो विषय: । अप्रसक्तस्यानुवाद: प्रसक्तस्य च विसंवादो वा सर्वथा परिवर्जयेत् । एवं सत्यपि रुचिवैचित्र्यं दर्शननानात्वं च समाश्रित्य गृहीतो विषय: प्रस्तुयात् ।

**क्रम:** – निबन्धबन्धने विचाराणां प्रस्तुतिक्रम: विशेषत: ध्यातव्यो भवति । सामान्यत: प्रथमं तावत् प्रस्तावना किं वा विषयावतार:, तत: विषयप्रतिपादनं ततश्चोपसंहार: इति प्रतिनिबन्धं क्रमो भवेत् । संकल्पित–विषयस्य सिद्धान्तस्थापनया निश्चितार्थकीर्तनेन वा निबन्धस्य समाप्ति: स्यादित्यपि सततं ध्येयम् ॥

**संक्षेप:** निबन्ध: नातिदीर्घ: स्यात् । अप्रस्तुतै: विषयै: विचारैर्वा अस्य कलेवरं न कदापि विवर्धयेत । प्रत्येकं निबन्धस्यापेक्षितो विस्तार: निबन्धरचयितु: मर्यादा भवेत् ।

**शैली** – निबन्धस्य निबन्धने स्फुटार्थता, मधुरता, श्लक्ष्णता नैसर्गिकता च पदानां स्यात् । शब्दालङ्कारप्रियता रसिकानां जनानां कदाचिदुद्वेगकरी भवतीति सा सर्वत्र नाद्रियेत । कदाचित् प्रतीयेत तस्योपयोग: तदा साङ्गीकरणीया, नान्यथा । अनुप्रासाद्यपहृतधियां निबन्धरचयितृणां न केवलं रसापकर्ष: अर्थापकर्षोऽपि । अथ च बहुत्र प्रयुक्ता अनौचिती रसिकानामप्रीतये भवति, अत: सापि परित्यक्तव्या । परन्तु अनायासेन सम्पद्यमानो विरलोऽनुप्रास: रसिकानां प्रीतये भवतीति स न वार्यते । तद्यथा – कालिदासेन – प्रजा: प्रजानाथ पितेव पासि – इत्यत्र प्रयुक्त: पवर्णानुप्रास: । एवमेव – मायूरी मदयति मार्जना मनांसि – इत्यादौ ।

अथ च निबन्धे ग्रथितानां वाक्यानां पारस्परिकोऽर्थसम्बन्ध: न कदाचिदपि हन्तव्य: । अवान्तरवाक्यानि पुन: परस्परमर्थेन सम्बद्धानि स्युरित्यपि ध्यातव्यम् । वाक्यरचनापि सर्वदा माधुर्ययुक्ता विशदर्था च स्यात् ।

अत्रेकमुदारणं प्रदीयते । भारविविरचिते किरातार्जुनीये महाकाव्ये भीमेन भाषितं प्रशंसन् युधिष्ठिर: कथयति –

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।

रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥

अस्यायमर्थ: – 1. पदै: स्फुटता न अपाकृता । अर्थात् सुबन्तै: तिङ न्तै: पदै: यद्यद् उक्तं तत्र अर्थस्य स्फुटता कुत्रापि अपाकृता नासीत् । 2. अर्थगौरवं न स्वीकृतम् इति न । अर्थात् प्रयुक्तै: शब्दै: पदै: वा यदर्थ: कथित: तस्य अर्थस्य गौरवं कुत्रापि न स्वीकृतमिति नासीत् । 3. गिरां पृथगर्थता रचिता । अर्थात् भीमेन या वाणी प्रयुक्ता, तस्यां वाण्यां पृथगर्थता आसीत् । अर्थात् पौन:पुन्येन एकस्य अर्थस्य कथनाय वाक्यानि न प्रयुक्तान्यासन् । प्रतिवाक्यम् अर्थस्य पृथक्ता आसीत् । 4. क्वचित् च सामर्थ्यं न अपोहितम् । अर्थात्

स्वीये कथने यानि वाक्यानि प्रयुक्तानि तेषु वाक्येषु सर्वत्र सामर्थ्यमासीदेव । भीमेन प्रयुक्तायां वाण्यामेतादृशमेकपि वाक्यं नासीत् यत्र वाक्ये प्रयुक्तानां पदानां सामर्थ्यमपोहितमर्थात् त्रुटितं दूरीकृतं वा स्यात् । प्रथमवाक्यस्यानन्तरं द्वितीयं वाक्यमर्थेन संबद्धमासीत् । एवमेव द्वितीयं तृतीयेन, तृतीयेन चतुर्थं, चतुर्थं पञ्चमेन – एवं सर्वाणि वाक्यानि परस्परेण सम्बद्धानि आसन् ॥

एतत्सर्वं मनसि निधाय निबन्धः बन्धनीयो भवति । एवं हि क्रियामाणे सुतरां सुश्लिष्टः सुन्दरश्च भवति निबन्धः ।

**निबन्धभेदाः** – निबन्धाः प्रायः चतुधा भवन्ति । ते च विचारात्मकाः, आख्यानात्मकाः, वर्णनात्मकाः, गुणदोषविवेचनात्मकाश्चेति। इदं चात्र नित्यं हृदि करणीयं यत् – इदं वर्गीकरणं तावदेव उपयोगितां याति यावत् कथ्यस्य प्रतिपादनं तत्तद्विशेषतायुक्तं स्यात् । तत्तद्विशेषाणामङ्गानि कानिचिद् विशेषान्तरेष्वपि स्युर्नाम । तद्यथा – आख्यानात्मके निबन्धेऽपि कदाचित् बहु वर्णनं स्यात् । ये च विचारात्मकाः निबन्धाः न भवन्ति, तेष्वपि सर्वत्र भूयान् अल्पीयान् वा विचारस्तु भवत्येव । तथापि निबन्धे स्वाभिप्रायस्य स्वरुच्यादेश्च लेखेन निबन्धनमेव भवति ।

अत्र उपर्युक्तानां विविधानां निबन्धप्रकाराणां स्वरूपादिविषयकं संक्षेपतो विमर्शं करिष्यामः ।

**( 1 ) विचारात्मकः निबन्धः**

विचारो नाम चिन्तनविशेषः । यस्य कस्यचित् विषयमधिकृत्य मानवस्य मनसि यादृशं चिन्तनं प्रवर्तते तन्नाम चिन्तनं विचारत्वेन प्रसिद्धम् । कदाचिदेतत् शब्दप्रमाणेन, कदाचिच्च प्रत्यक्षज्ञानेन मानवस्य मनसि चिन्तनं प्रवर्तते, तच्च चिन्तनं विचारत्वेन शब्दैः उपन्यस्यते । अतः यत्र वस्तुचिन्तासमुत्थं मानसिकमेव चिन्तनं भूयस्त्वेन निबध्यते स विचारात्मकः निबन्धः कथ्यते ।

अत्र क्वचित् सत्यम्, मैत्री, धैर्यं, देशभक्तिः, उद्योगः – इत्यादयोऽमूर्ताः भावाः प्रतिपाद्याः भवन्ति । क्वचिच्च समाजसम्बन्धिनो राजनीतिनिबद्धाः वा विषयाः भवन्ति । तद्यथा – गृहगता दरिद्रता, धनोपयोगः, सत्सङ्गतिः, विद्वन्मानः, शासनपद्धतिः, शिक्षापद्धतिः – इत्यादयो विषययुक्ताः निबन्धाः निबध्यन्ते । अथ च केचन तत्त्वचिन्तनपराः निबन्धाः अपि संभवन्ति । यथा – कर्माकर्मणोः स्वरूपम्, मनस एव बन्धमोक्षयोः कारणता, किं भोगेन कामानामनुपशमः – इत्यादयो वा विषयाः अत्र समाविष्टाः भवन्ति निबन्धबन्धनाय ।

तत् तत् प्रकारकेपु विचारात्मकेषु निबन्धेषु तत् तत् विचारस्य गुणादेः गौरवं करणीयं भवति । कदाचिद्यदि दोषाः प्रदर्श्यन्ते, तदा तेषां परिहारोऽप्यत्र करणीयो भवति । स्वीकृतस्य विचारस्य समर्थनाय निबन्धने यथावसरमाख्यानमुपाख्यानं कथा आख्यायिका वा यथापेक्षमुदाहार्या । एवं विचारात्मकः निबन्धः निबन्धनीयः ।

**( 2 ) आख्यानात्मकः निबन्धः**

आख्यानात्मकेषु प्रस्तावेषु किमपि वृत्तं वृत्तानि वा भूयसा प्रशस्यन्ते । अत्र भूयसेति पदमत्र साभिप्रायमस्ति । न ह्याख्यानात्मके निबन्धे वृत्ताख्यानमात्रेण सकामता प्रस्तोतुः स्यात् । अत्र विवेकपुरःसरं प्रवृत्तेन निबन्धकर्त्रा यद्वृत्तं स्वीकृतं स्यात्तमुपवर्णयता कथमिदं संवृत्तम्, किमिदं श्रेयसे वृत्तमभूदश्रेयसे वा, किमिदं सुष्ठु संविहितमासीदसुष्ठु वा, किमिदं परिहार्यमासीदपरिहार्यं वेति विचार्यम् । पुंसां चरितादिवर्णने तद्गताः गुणदोषाः निपुणं परीक्ष्याः भवन्ति ।

अथ चैतादृशैः आख्यानात्मकैः निबन्धैरितिहासाधारितानि तथ्यानि, ऐतिह्यानि कथानकानि वा निबन्धे आकारीकरणीयानि भवन्ति । तत्र – कस्यचित् महापुरुषस्य चरितं, रामराज्यम्, महाभारतसमरः इत्यादयो विषयाः भवितुमर्हन्ति । यदा महापुरषस्य चरितं निबध्यते तदा यथासंभवं सत्यघटनाः स्वीकरणीयाः भवन्ति । तद्यथा – ययातिचरितम्, अजामिलाख्यानम् । कालिदासस्य श्रीशङ्कराचार्यस्य वा आत्मकथा अप्यत्र निबन्धविषयो भवितुमर्हति ।

इदं जातीयकेषु निबन्धेषु वृत्तक्रमो न कदापि हातव्यः । विशेषाणामल्पकानां प्रयोगः घटनानां विस्तरश्च नादरणीयः । इष्टानिष्टव्यतिकरा यादृशं जनान् प्रबोधयन्ति, कथाश्च यद्यदुपदिशन्ति तत्तत् सुस्पष्टतया निर्देश्यम् । एवमाख्यानात्मको निबन्धः प्रशस्यो भवति ।

**( 3 ) वर्णनात्मकः निबन्धः**

वर्णनात्मके कश्चित् प्रदेशः देशः पदार्थो वा आकारादितः वर्णयितव्यो भवति । कदाचित् काचित् घटना अपि यथाघटितं वर्णनीया भवति । तद्यथा – काशी, सौराष्ट्रम्, अरुणोदयः, संस्कृतपाठशाला, विद्यालयीयः वार्षिकोत्सवः ।

एतादृशे निबन्धे स्वीयकल्पनातः आकारादिवर्णनापेक्षया यथास्थितमाकारादिवर्णनं सर्वथा प्रशस्यते । यतो हि वर्णनं यथार्थं न भवति चेत् निबन्धरचयितुरज्ञानं तत्र प्रकाशितं भवति । अज्ञानञ्च कदापि प्रशस्यं न भवतीति विदितचरमेव ।

**( 4 ) विवेचनात्मकः निबन्धः**

यत्र निबन्धे कवीनामन्येषां ग्रन्थकृतां वा कृतयो गुणदोषतः परिच्छिद्यन्ते, स निबन्धो विवेचनात्मको भवति । कस्यचित् कवेः काव्यविषयकी विवेचना करणीया भवति, चेत् तस्य कवेः शैलीं मनसि निधाय, किं सा पृथक्पदप्रधाना वर्तते उताहो समासबहुला, किमत्र काव्ये व्यङ्ग्यार्थः प्रधानोऽस्ति उत वा वाच्यार्थः, किमिह काव्ये शब्दाडम्बरगौरवमेवास्ति उत वा अर्थगौरवमपि प्रवर्तते, किमत्रोदारः पदवाक्यविन्यासः आहोस्वित् क्लिष्टः, को रसोऽत्र अङ्गी, कीदृशमत्र चरितचित्रणम् – इत्यादयः अर्थाः विवेचनीयाः भवन्ति । तद्यथा – कविता कालिदासस्य, करुणरसनिरूपणे भवभूतेर्नैपुण्यम्, दण्डिनः पदलालित्यम् – इत्यादीन् विषयान् आश्रित्य निबन्धस्य रचना संभाव्यते ।

एतदर्थं कवेर्वाक्यान्यपि यथावसरमुद्धृतं शक्यते । तेन स्वपक्षस्य प्रमाण्यं प्रस्थापितं भवति, तच्च भावकानां कृते परितोषं जनयति, निबन्धस्य कर्ता प्रचुरं यशो लभते ।

**प्रस्तावप्रणयनसंभारः**

यदा कश्चिच्छात्रः निबन्धं निबद्धुं प्रवृत्तो भवति, तदा निबन्धेऽस्मिन्नहं किं प्रस्तुयामिति विचार उदेति । अत्र विषये मया किं लेख्यं किं वोपक्रमितव्यमिति प्रायशो नासौ जानीते । नात्र किमपि विचित्रम्, यतोहि छात्रः प्रायः अल्पश्रुतः मितानुभवश्च भवति । निबन्धननिपुणता तु बहुना श्रवणेन निध्यानेन च शक्यं भवति कालान्तरे । परन्तु तदर्थं कदाचिदिदम्प्रथमतया यत्नस्तु विधेय एव भवति। अस्य प्रयत्नस्य क्रमशः सोपानान्यत्र प्रदीयते ।

**( क ) ग्रन्थावलोकनम्**

भूयसा ग्रन्थावलोकनेन पुरुषः पूर्णतां यातीति विपश्चितः । अयमभिसन्धिः – यः खलु बहु विविधं चाधीते, स स्वे मनसि नाना वृत्तानि, नाना विचारान्, नाना तर्कान्, नाना निदर्शनानि च यतस्ततः संगृह्णाति । अन्यद्वा यद्वेदितव्यं भवति, तत्स सर्वथा समाहरति । अतः यदि कश्चित् निबन्धकारः यदीच्छति सरसं सुन्दरं च निबन्धं निबद्धुं तदा सः ग्रन्थावलोकने स्वीयां रुचिमुत्पादयेत ।

अत्र चायं ध्यातव्यः यत् विनोदार्थाः कथा एव पठिष्यसि चेत् तन्न निबन्धनिपुणतायामलं स्याः । अतः इतिहासग्रन्थान् यात्राप्रबन्धान् चरितनिबन्धान् विज्ञानसंदर्भान् चावहितेन मनसा चिरं अधीष्व । कदाचित् काव्यानि महाकाव्यानि कथाः आख्यायिकाः पठित्वापि निबन्धनैपुण्यं भजति प्रबुद्धश्छात्रः । प्रान्ते चायं निश्चयः यत् विना ग्रन्थानां स्वाध्यायेन निबन्धबन्धने न भवति कस्यचिदपि गतिरिति दिक् ।

**( ख ) निध्यानम्**

न च सर्वं विदितुं योग्यं वस्तु पुस्तकस्थं पुस्तकैकलभ्यं वा भवति । अस्मानभितो वर्तमानायाः जनतायाः याः चेष्टाः वयं पश्यामः, तद्वचांसि च श्रोष्यामः तस्मादपि वयं बहु गृह्णीमः । तस्मात् स्वीये लोचने नित्यमुन्निषिते करणीये । अथ च श्रवणे चोत्कण्ठापूर्वकं सदैव सावधाने स्याताम्, तदर्थं यत्नः करणीयो भवति । बुद्धिमन्तोऽपि ये छात्राः न दृश्ये न च श्रव्ये स्वीयं मनः न नियुज्यन्ते, ते निबन्धरचने तादृशं नैपुण्यं न लभन्ते, यादृशमत्र अपेक्षते ।

अस्यायं सारः – प्रथमं स्वं ज्ञानराशिं सततं विवर्धय । द्वितीयं यत्प्रत्यहं पश्यसि, तत्समासतो वर्णयितुं शोचय । तृतीयं च लब्धावकाशः त्वया ये लोकाः संगताः, अवलोकिताश्च वनोपवनादयः प्रदेशाः, मृग-शकुनीनां च प्राणिनां यादृशः स्वभावः, यादृश्यश्च क्रियाः दृष्टिपथमानीताः, ताः सर्वाः स्वगिरया वर्णनविषयतां नेयाः । अथ च परकृतैः वस्तुवर्णनैः परितोषं मा स्म गमः । तांस्तान् अर्थान् त्वं स्वयमेवालोकय, ततो स्वीयेन वाचा वर्णय । यदा त्वं स्वयमेव उपद्रक्ष्यसि अर्थान् घटनाः वा तदा वस्तुतो विज्ञास्यसि, यत् कियदहं समर्थः वस्तुस्वरूपावगमने इति । यथा यथा वस्तुस्वरूपावगमनं विवर्धते तथा तथा निबन्धबन्धने गतिरपि विवर्धते इति दृशं विश्वसिहि।

**( ग ) संभाषा**

अतीतैः वर्तमानैश्च मेधाविभिः कृताः ग्रन्थाः अवश्यम्पठनीयाः । यदि वयं ततो ग्रन्थेभ्यो बहूपादातुमलं स्मः, तदा तु शोभनम् । अन्यथा वर्तमानैः मेधाविभिः सह यथावसरं संभाषा स्यात् तदर्थमपि यत्नो विधेयः । परिसंवादे संगोष्ठ्यां च समागतानां विविधानां विदुषां वचनानि प्रत्यक्षं श्रुत्वापि वयं समर्थाः भवामः निबन्धग्रथने । विदुषां संगमनेन स्वाभाविकतया परस्परं संभाषणस्याप्यवसरो प्राप्यते । अस्मिन् सम्भाषणावसरे स्वीयमभिव्यक्तिसामर्थ्यं परीक्षितुमवसरः मिलति । अस्मत्समकालाः विज्ञाः किं विचारयन्ति, केन प्रकारेण च स्वीयान् विचारान् स्वीयया भाषया अस्खलितं प्रस्तुवन्ति, तस्य प्रत्यक्षं भवति । एतदपि अस्मदुपकारायैव भवति । अतः लब्धावसरे लाभोऽयं लब्धव्य एव ।

**अथ प्रस्तावप्रणयनप्रकारः**

**( 1 ) विषयवस्तुवरणम्**

यदि स्वयमेव निबन्धं निबद्धुं प्रवृत्तेन जनेन सर्वप्रथमं निबन्धस्य विषयवस्तु विचरणीयं भवति । तदर्थं च अधिकारिणः प्रायः प्रौढाः विद्वांसः भवन्ति, न तु अस्मादृशाः पाठशालायामध्ययनकर्मणि संलग्नाः छात्राः । छात्राणां कृते तु गुरुः अन्यः वा कश्चित् जनः निबन्धं बद्धुं विषयं प्रददाति । अतः सम्प्रति विषयोऽयं प्रस्तुतः नास्ति ।

परं सत्यपि एतादृशे प्रसंगे अस्माभिः छात्रैरयमवगन्तव्यमेव यत् निबन्धस्य बन्धनाय प्रथमं विषयवस्तुवरणमपेक्षितं भवतीति ।।

**( 2 ) विषयस्वरूपनिरूपणम्**

स्वेच्छया परेच्छया वा कस्यचिद् विषयस्य वरणं भवति, तदनन्तरं तस्य विषयस्य स्वरूपमपि निरूपणीयम् भवति । येन निबन्धे कदाचित् कुत्रचित् वा विषयान्तरः न भवेत् । केचिद्विषयास्तावत् तादृशाः स्पष्टाः भवन्ति, यत्र कस्याश्चित् विप्रतिपतेः सन्देहस्य वाऽवकाश एव न भवति । परं कदाचित् विषय एव स्पष्टो न भवति, चेत् निबन्धबन्धेनऽपि गतिर्न भवति । गतिर्भवति चेत् मध्ये मध्ये विचारप्रस्तावनकाले बाधा अनुभूयते । अथवा विषयान्तरदोषेणापि निबन्धः ग्रस्तो भवति । अतः स्वयं गृहीतस्य अन्येन प्रदत्तस्य वा विषयस्य स्वरूपं प्रथममवगन्तव्यम् ।

तद्यथा – रेलयात्रायाः लोके प्रभाव इत्येकः निबन्धस्य प्रस्तावितो विषयः । इह रेलयात्रेति विषयो न, रेलसंविधानकमपि विषयो न, न च रेलयानेतियहासो वा विषयः । एवं सत्यपि केचिच्छात्राः प्रकृतं शब्दन्यासं सहसा प्रपठ्य, निबन्धस्य विषयस्य स्वरूपमनवगच्छन्तः निबन्धकर्मणि प्रवृत्ताः सन्तः विषयान्तराण्यनुधावन्ति । वस्तुतस्त्वत्र यात्राविषये रेलयानेन कीदृशः प्रभावः लोके प्रस्थापितः, तस्य के गुणाः के च दोषाः, कीदृशो यात्रालाभः, कीदृशं यात्रासौकर्यं, कियान् वा समयावशेषः इत्यादिकमत्र विषयस्वरूपमस्ति । रेलयात्रा केन प्रकारेण वा लौकिकाचारपद्धतीः परिवर्तयन्तीति विषयनिर्धारकस्य मतेन विषयस्वरूपमिति ध्यातव्यम् । अन्यथा विषयान्तरानुधावनेन कालक्षेप एव स्यादनर्थकश्च निबन्धनयत्नः ।

**( 3 ) सामग्रीसंग्रहः**

यदा विषयो विस्पष्टतया अवगतो भवति, तदा तत्र किं निबन्धनीयमिति जायते स्वाभाविकी चिन्ता निबन्धस्य कर्तुः मनसि ।

कदाचिद् विषयस्य सारल्यात् सद्यः विचाराः स्फुरिताः भवन्ति । परं यदि कदाचित् अविदितं विषयवस्तु भवति, तदा तत्र सहसा न शक्यते निबन्धुम् । अतः विषयानुरूपं सामग्री-संचयः करणीयो भवति । समुचिताय विषयवर्णनाय तद्विषयकानि पुस्तकानि विचारयितव्यानि भवन्ति । गुरुजनैश्च समं विचारविनिमयः करणीयो भवति । स्वयं या विमर्ष्टव्यं भवति । न जातु सहसोपन्यसितुं प्रवर्तितव्यम् ।

यदा विषयं चिन्तयसि, तदा केऽपि भावाः, कान्यपि वृत्तानि, कानिचित् तथ्यानि, कानिचित् दर्शनानि च ते बुद्धौ प्रतिभासन्ते । तानि यथाकालं यदि कर्गजे विलिख्य न संगृह्यते, उपेक्ष्यते वा तानि तदा समागते प्रसंगे तानि नोपतिष्ठेरन् स्मृताविति महाननर्थः स्यात् । यथोत्पतन्तः पतन्तः पक्षिणः प्रगृह्य पञ्जरस्थाः क्रियन्ते, तथैवेमानि कर्गल-पत्रमारोप्य वशे करणीयानि भवन्ति । नो चेत्काल उपयोक्ष्यमाणानि नोपतिष्ठेरन् । अत्र कर्मणि त्वया क्रमः तावदनादरणीयः । कालान्तरे समागतेऽवसरे भविष्यति क्रमसंरचना । तेषां साधुत्वविचारणा अपि कालान्तरे साधनीया । स्वीकार्यास्वीकार्ययोः निर्धारणं च कालान्तरे भवितुमर्हति । अयं सारः - येन केन प्रकारेण मनस्युत्पद्यमानाः स्वाध्यायकाले समागताः विषयाः पत्रस्थाः करणीयाः इत्यावश्यकं कर्म निबन्धलेखनकर्मणि प्रवृत्तस्य कस्यचिदपि जनस्य ।

**( 4 ) निर्धारणम्**

अथ च यदा मन्यसे यत् संगृहीता मया सामग्री अधुना पर्याप्ता अस्ति, नातः अन्या सामग्री मया अपेक्षते, तदा एकत्रीकृतासु सामग्रीषु या उपयोगिनी वर्तते, तस्याः निर्धारणं करणीयं भवति, निबन्धरचनोपक्रमात् पूर्वं स्वीयायोपयोगाय ।

संगृहीतायाः सामग्र्याः मध्ये के विषयाः प्रकृतार्थान्वयिनः, के चाप्रकृतार्थाः, के च पुनरुक्तभूताः, के च तत्र समर्थनायापोहनाय वाऽपेक्षिततमा इति समीक्ष्य ते त उपादातव्या अपास्याश्चेतरे ।

**( 5 ) क्रमः**

एवं विहिते निर्धारणे विचारसरणिर्विचारणीया । निर्धारितानामर्थानाम् उपन्यासक्रमविशेषोऽन्तरमः कश्चिदास्थेयः । उपानीतानां संगृहीतानां वार्थानां विषय-क्रमविशेषेण प्रस्थापनं गुरुप्रयोजनं भवति । यदि क्रमविशेषः सुचिन्तितः भवति, चेत् विषयस्य प्रस्थापना आदित एव निर्धारिता भवति । सततं धाराप्रवाहेण प्रवाहिता सा विषयान्तरं विनैव, पौनरुक्तदोषमुक्ता सती यथावसरम् उपसंहृतां कर्तुं शक्यते । अतः निर्धारितायाः सामग्र्याः क्रमोऽपि पूर्वतः एव निर्धारितव्यो भवति ।

**( 6 ) मुख्यवक्तव्यांशनिर्देशः तस्य विकासश्च**

एवं विषयं सुनिरूप्य, तच्च मनसि निधाय, यद् वक्तव्यं भवति, तत्प्रध्याय मुख्यस्य विषयस्य ये अङ्गभूताः विषयाः सन्ति तान् क्रमशो विन्यस्येत् । ततस्तत्सम्बद्धान् अवान्तरार्थान् प्रणयेत् । येन येन मुख्यार्थेन यो योऽवान्तरार्थोऽभिसम्बद्धः तत्रैव तं निवेशयेत् । एवंलक्षणाः संक्षिप्ताः क्रमवदर्थविन्यासाः प्रस्तावनिर्मातुः यथेष्टमुपकुर्वन्ति । परं नैष निबन्धो भवति । इदं तु सुश्लिष्टं कङ्कालमात्रम् । सम्प्रतीदं मांसोपचयेन प्रच्छादनीयमुज्जीवनीयं च । तथा कृतेऽयं निबन्धो भवति ।

**( 7 ) निबन्धाङ्गनिर्देशः**

सर्वः निबन्धः अवयवी पदार्थस्तस्यावयवनिर्देशः क्रमप्राप्तः साम्प्रतमुच्यते । निबन्धो नाम वाक्यसन्दर्भो भवति स्वरूपेण । तत्रेष्यते समानतात्पर्याणां वाक्यानां परिच्छेदः स्युरिति । परिच्छेदाभावे निबन्धोऽरुचिकरो भवति दुष्पठश्च । अतः प्रतिपरिच्छेदमिदं चतुष्ट् ऽयमवधातव्यम् - (1) एकार्थता । परिच्छेद एकार्थमुपवर्णयेत्, न नानार्थ्यम् । (2) वैचित्र्यम् । सर्वे परिच्छेदाः समानायामा नेष्यन्ते, न च समानरचनात्मकाः । एवं कृते तत्र निरसता हि प्रसज्येत । (3) विचारपौर्वापर्यम् । यदेकेन परिच्छेदेन प्रतिपादितम्, तत्सम्बद्धमेव परिच्छेदान्तरेण प्रतिपादयेत् । (4) विषयाङ्गनिर्देशकं वाक्यम् । प्रायः परिच्छेदस्यादिममन्तिमं च वाक्यं सर्वप्रधाने भवतः । बहुत्र परिच्छेदेषु प्रथमं वाक्यं वर्ण्य वस्तु निर्दिशति, अन्त्यं च प्रतिपादितपूर्वं समासेन विन्यस्यति । समग्रे निबन्धे त्रीणि मुख्याङ्गानि भवन्ति। तानि च क्रमशः अवतरणिका, शरीरम्, उपसंहारश्चेति पदत्रयेण उपदिश्यते ।।

तत्र अवतरणिका नाम खलु लध्वीष्यते । कदाचिदपि सा नातिविस्तृता स्यात् । अनतिविस्तृते निबन्धे यावतरणिका सा कथंकारं सविस्तरा स्यादिति विचारसामान्यं सर्वदा ध्येयम् । यथा हि गृहस्य कस्यचित् द्वारप्रकोष्ठो बृहत्तरः स्याद् गृहादिति कोऽसंमूढो रोचयेत । अतः अवतरणिका विषयावतारणी लध्वी स्यात् । काममेकवाक्यात्मिका वा भवेत् वाक्यद्वयात्मिका वा । यथेयं रुचिरार्था स्यात्तथा त्वं प्रयतेथाः ।

क्वचित् विषयानुग्राहकं परकीयं वाक्यमाभाणकं वा समुद्धृत्य सामान्यार्थकेन वाक्येन वा निबन्धारम्भः कर्तुं शक्यते, संक्षिप्तेन कथानकेन वा ।

ततः शरीरं तावत् निबन्धस्वरूपमेव । इदं हि नाम गेहं, यस्यावतरणिका मुखद्वारमुपसंहारश्च पक्षद्वारम् । निबन्धशरीरनिर्माणे सर्वदा अनुपातः आदरणीयो भवति । अंशाः सर्वे यथास्थानं स्थापनीयाः । तेषां विकासश्च क्रमशो भवेदित्यपि ध्यातव्यम् ।

निबन्धशरीरे योऽनिपेक्षितोऽर्थः स सदा परिहर्तव्यः । न च स एवार्थः पुनः पुनः वक्तव्यः । न चात्र ज्ञातार्थः समुपन्यसनीयः । तस्माद्यत्र एकेनैव पदेन वाक्येन वा शक्यो भवत्यभिधेयार्थः, तदा पदद्वयं वाक्यद्वयं वा न प्रयोक्तव्यम् । पदानां प्रयोगे वाक्यानां च गुम्फने सविशेषमादरं संधेहि । येन येन पदेन वाक्येन वा ते मनोगतोऽभिप्रायः स्फारं स्फुरति, तत्तत् प्रयुङ्क्ष्व । यथा ते पदानि वाक्यानि वा विशदर्थानि स्युस्तथा यतस्व ।

अन्ते चेदमवधेहि – विषयानुरूपा ते रीतिः स्यात् । गभीरार्थे विषये गौरवान्विता ते भाषा स्यात् प्रहासप्रधाने च लाधवान्विता विडम्बनाबहुला स्यात्, न तु विपर्ययेण ।

अथ उपसंहारविषयेऽपि एवमवच्छ । यथावतरणिका श्रोतृणां शुश्रूषां जिज्ञासां वा जनयति, कौतुकं वा उत्पादयति, तथैव उपसंहारोपि तच्छमयेदिति युज्यते । यथा रुचिकरी प्रभावुका चावतरणिका अपेक्षते तथोपसंहारः अपि परितोषदः स्यादितीष्यते । अत्रोपसंहारः उक्तपूर्वाणां वाक्यानां संक्षेपो वा सिद्धान्तोपन्यासो वा शोभनतरो भवतीति दिक् ।।

**अथ निबन्धाः ।।**

**( 1 ) विचारात्मकः निबन्धः**

**आचारः परमो धर्मः ।।**

अथ कोऽयमाचारो नाम ? किमदः यदिदमाचर्यते, अथासौ येन वयं किञ्चिदाचरामः । किञ्चातः, यद्यसौ द्वितीयः तदा देहेन्द्रियादीनामनन्येषां वा तादृशामाचारता प्रसज्येत । अङ्गीकुर्महे तर्हि प्रथममेव पक्षम् । अथाप्यविशेषेण सर्वस्याप्याचारता स्यादाचर्यमाणस्य । ननु स्यान्नाम कस्तावदेतावता दोषः ? अयं दोषो यत् सर्वोऽपि क्रियमाणो धर्मः स्यात् । उच्यते किल आचारः प्रथमो धर्मः इति । तर्ह्यस्तु सदाचार आचार इति, भीमसेनः सेनः, सत्यभामा भामेतिवत् । स्यान्नामेदम् । कथमिदमुच्यते धर्म इति ? यावता धर्ममूलताऽस्योच्यते स्मृतिभिः । तद्यथा–

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधुनामात्मनस्तुष्टिरेव च ।।

बाढम् । परन्त्वयं विशेषः आचारस्य श्रुतिस्मृत्यादिभ्यः, यदयं स्वरूपेण धर्मतां भजति अनुकरणीयतारूपेण च धर्ममूलताम् । आचारः शीलमिति च पर्यायः । ननु कथमिदमुपपद्यते पूर्वोक्त एव हि श्लोके आचारशीले पृथक् गणयंस्तयोर्भिन्नतामिवाभिप्रैति तत्रभवान् मनुः । नायं दोषः, यत्किञ्चिदान्तरङ्गिकं भेदमूरीकृत्य तथा प्रतिपादनात् । यत्किञ्चिदान्तरङ्गिकं भेदमूरीकृत्य तथा प्रतिपादनात् । यत्किञ्चिद् भेदस्य चाकिञ्चित्करत्वात् । अत एवाग्रे वेदः स्मतिः सदाचारः स्वस्य च प्रियमात्मनः । इत्यादि वदन् मनुः शीलञ्चापरामृशन् तस्याचारेऽन्तर्भावं सूचयति । अत एव चैतं श्लोकमवतारयन् कुल्लूकभट्टः प्राह – इदानीं शीलस्याचार एवान्तर्भावसम्भवात् इत्यादि ।

शङ्करभगवत्पादाश्चाहुः चरणं, चारित्रं, आचारः, शीलमिति पर्यायः ।

वेदो धर्ममूलम् । तद्विदाञ्च स्मृतिशीले – इत्यादि वदन्तो गौतमादयोऽपि आचारं शील एवान्तर्भावयन्त न पृथगेतं गृह्णन्ति ।

किमेवमत्यन्तमेवाऽभेदः शीलाचारयोः ? नेति वदामः । उक्तमेव किल प्राक् विद्यते कियांश्चित् तयोर्भेद इति । स च साधारण-विशेषभावरूपः । आचारो हि द्विविधः मानसिकः कायिकश्चेति । मानसिक एवाचारो व्यवह्रियते शीलं स्वभावः, आत्मगुणा इत्यादिभिर्नामभिः । शारीरिकस्तु आचारनाम्नैव । इममेवाचारं शीलाख्यं त्रयोदशविधं निरूपयति हारीतः । तद्यथा – ब्रह्मण्यता, देवपितृ-भक्तता, सौम्यता, अपरोपतापिता, अनसूयता, मृदुता, अपारुष्यम्, धैर्यम्, प्रियवादित्वम्, कृतज्ञता, शरण्यता, कारुण्यं, प्रशान्तिश्चेति त्रयोदशविधं शीलमिति।

प्रायेणैवं विधानेव गुणान् आत्मगुणान् वर्णयति गौतमः – अथाष्टावात्मगुणाः । दया सर्वभूतेषु, क्षान्तिरनसूया, शौचमनायासो मङ्गलम्, कार्पण्यमस्पृहेति ।

बाह्यञ्चाचरणं स्नानध्यानगुरुपसदनादि यद्धि आनिद्रात्यागाद् आ च पुनः सुप्तेर्विधेयतया प्रतिपादयते श्रुतिस्मृत्यादिभिः । तदिदमुच्यते शारीराचार इति । द्विविधोऽप्ययमेवाचारः क्रमाद् यम-नियमाभिधानाभ्यामभिधीयते काशीखण्डादिषु –

प्रथमं धर्मसर्वस्वं प्रोक्ता यन्नियमा यमाः । अतस्तेष्वेव वै यत्नः कर्तव्यो धर्ममिच्छता ।।

सत्यं क्षमार्जवं ध्यानमानृशंस्यमहिंसनम् । दमः प्रसादो माधुर्यं मृदुतेति यमा दश ।।

एवमेव –

शौचं स्नानं तपो दानं मौनेज्याध्ययनं व्रतम् । उपासनोपस्थदण्डो दशेति नियमाः स्मृताः ।।

तदेवं द्विविधोऽप्याचारो धर्मत्वाविशेषेऽपि भिद्यत एव । धर्मान्तरात् कर्मरूपात् यागादेः । अत एव विशिनष्टीयं भगवती श्रुतिः आचारं कर्मान्तरात्, ततः पृथगाचारं विनिर्दिशन्ती यान्यवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितनि तानि त्वयोपास्यानि नो इतराणि इति । सुचरितञ्च नामात्राचार एव । आचारः प्रथमो धर्मः इति वदन् मनुरपि आचारस्य धर्मेष्वन्यतमतामेव प्रतिपादयति ।

अमुमेवाचारं नितरां प्रशंसन्ति स्मृतयः सर्वश्रेष्ठताञ्चास्य प्रतिपादयन्ति । यथाह मनुः –

आचारः प्रथमो धर्मः श्रुत्युक्तः स्मार्त एव च ।

तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ।।

आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।

आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत् ।।

यथा चाह वशिष्ठः –

आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः ।

छन्दांस्येनं मृत्यकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ।।

अन्योऽपि चास्ति कश्चिदाचारो यो हि विश्रुतः सामयिकाचार इति यश्च भिद्यते भेदैः कालदेशीयानाम् । सामयिकाचारे चास्मिन् विनीतत्वं बहुश्रुतलक्षतयाभिवर्णयति गौतमः । यदाह भगवान् याज्ञवलक्योऽपि –

निजधर्माविरोधेन यस्तु सामयिको भवेत् । सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ।।

तदेवमाचारस्योत्तमधर्मत्वमविगीतं प्रतिपाद्यते प्रायः सर्वैरपि शास्त्रकारैः ।

अत्रैवं शङ्का समुदियात् – किं सर्वविधस्यापि आचारस्याविशेषत उत्तमता किमथवा किमपि तत्र तारतम्यमिति । नन्वविशेषेणैवोक्तम् आचारः परमो धर्म इति ? बाढम् । परन्तु मानसिकाचारः कायिकाचारः इत्यादिना कृतो विभागः सूचयतीव किञ्चित् फलभेदं ततश्च

किञ्चितारतम्यम् । सत्यमस्त्येव कश्चिद्भेद: । यत: अतिशेतेऽयं मनुजमात्रसाधारण: मानसिक आचार: शारीरिकमाचारव्रतं यत् किल भिद्यते वर्णाश्रमादिभेदात् । परिशुद्धस्यैव किल मनस: प्रवृत्तिविशेषो मानसिकाचारो नाम, यस्यैव च सम्पादनेच्छया प्रवर्तन्ते सर्वेऽप्याचारविशेषा: शारीरकादय: । एवं स्थिते को वा सन्देग्धि सम्पादयितु: सम्पत्तिसतस्य प्राधान्ये ? अत एवाहाष्टविधात्मकगुणप्रस्तावे तत्रभवान् गौतम: - यस्यैते चत्वारिंशत् संस्कारा, न चाष्टावात्मगुणा, न स ब्रह्मण: सायुज्यं सालोकञ्च गच्छति । यस्य खलु संस्काराणामेकदेशेऽपि अष्टावात्मगुणा, अथ स ब्रह्मण: सायुज्यं सालोक्यञ्च गच्छति इति ।

मनुरपि यमनियमयोरात्मगुणपक्षीयाणां यमानामेव प्राधान्यं स्पष्टयति -

ब्रह्मचर्यं दया क्षान्तिर्ध्यायानं सत्यमकल्कता । अहिंसास्तेयमाधुर्ये दमश्चेति यमा: स्मृता: ।।

स्नानं मौनोपवासेज्या स्वाध्यायोपस्थनिग्रहा: । नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता: ।।

यमान् सेवेत सततं न नित्यं नियमान् बुध: । यमान् पतत्यकुर्वाण: नियमान् केवलान् भजन् ।।

एतादृश एव किलाचारे रुचिमुत्पादयितुं प्रवर्तन्ते सर्वा: श्रुतय: सर्वाणि च शास्त्राणि । इममेवाचारं सर्वप्रधानतया वर्णयत्याङ्गलेयानामियं सूक्ति: यदि वित्तं नष्टं न किमपि नष्टम, यदि स्वास्थ्यं नष्टं किञ्चिदिव नष्टम्, यदि पुन: सच्चरितं नष्टं सर्वस्वं विनष्टम् इति ।।

**( 2 ) आख्यानात्मक: निबन्ध:**

**( क. ) महादानी कर्ण:**

महाभारतनामके सुप्रसिद्धे आर्षकाव्ये बहवो महानुभावा: स्वकीयं स्वकीयं महिमापूर्णं स्थानमङ्कुर्वाणा: राराज्यन्ते । तेषु कर्ण: एकतम: । अयं महाभारतयुद्धस्यैक: महान् योद्धा, सेनापतिश्चासीत् ।

एवं हि श्रूयते यत् कुन्तिपुत्रोऽयम् । सूर्यत: मन्त्रप्रभावादस्य कुन्त्यां जन्म अभवत् । यदायं जन्म लेभे, तदा कुन्ति: कुमारिका एवासीत् । कौमार्यावस्थास्थिता कुन्ति: जन्मानन्तरमेव जातमात्रं पुत्रमिमं मञ्जूषायां स्थापयित्वा अश्वनाम्ना प्रसिद्धिङ्गतां नद्यां प्रवाहितवती । नद्यां प्रवहन्नयं केनचित् अपुत्रेण अधिरथनामकेन सूतेन दृष्ट:, सद्य: गृहीतश्च । पुत्रसुखं कामयमानोऽयमधिरथ: सहसा प्राप्तं सुतमेनं सङ्गत्य परममानन्दमन्वभवत् । स गृहं संगत्य स्वप्न्त्यै राधायै नवजातमिमं शिशुं समर्पितवान् । प्राप्तपुत्रा असौ राधापि परमं हर्षमनुभूतवती । एवं जनन्या परित्यक्तो यं बाल: पालकौ पितरौ प्राप्तवान् । एतौ पितरौ एव तस्य कर्ण इति नामाभिधानं कृतवन्तौ ।

पूर्वे वयसि कर्ण: द्रोणाचार्यं धनुर्विद्यादाने प्रार्थितवान् । परन्तु स सूतपुत्र आसीदत एव द्रोणाचार्या: तं पाठयितुमसामर्थ्यं प्रकटितवन्त: । प्रतिषिद्धे पाठने सति कर्ण: खिन्नोऽभवत् । कालान्तरेऽसौ क्षत्रिय: सन्नपि स्वात्मानं ब्राह्मणं ज्ञापयन् परशुरामं निकषा गतवान् । तत्र संगत्य स शस्त्रास्त्रविद्यां पाठयितुं निवेदितवान् । परशुराम: तं ब्राह्मणं मन्यमान: सर्वा: अपि युद्धविद्या: पाठितवान् ।

गच्छता कालेन परशुरामेण ज्ञातं यदयं ब्राह्मणो नास्ति । संज्ञाते वर्णविपर्यये परशुराम: क्रुद्ध: सन् शशाप - सर्वमपि यत् पठितं तत्समये समुपस्थिते सति निष्फलं भविष्यतीति । शापग्रस्तोऽयम् कर्ण: आजीवनं सर्वत्र निष्फलतां प्राप्नोत् ।

कर्ण: दानित्वेनापि सुप्रसिद्धो वर्तते । एवं हि श्रूयते यदयं जन्मत एव कवचकुण्डलधारी । अत: युद्धभूमौ सत्यपि शस्त्रास्त्रप्रहारे निराहत एवायं तिष्ठति स्म । घोरे महाभारते युद्धे प्रवृत्ते कवचकुण्डलाभ्यां परिरक्षितोऽयं न केनापि वशमायाति स्म । अस्यां स्थितौ कृष्णेन कल्पितया योजनया अनुसारमिन्द्र: ब्राह्मणस्य वेशमाधाय कर्णं कवचं कुण्डलं च याचितवान् । यद्यपि कर्ण: सर्वं जानाति स्म, तथापि स ब्राह्मणवेशधारिणे इन्द्राय कवचकुण्डलं मुदा समर्पितवान् । कवचकुण्डलाभावे अजेयोऽयं योद्धा रणे अर्जुनेन सरलतया हत: । अयमप्यस्य महायोद्धु: जीवनस्यापरोऽन्तिमश्च कारुणिक: प्रसंग: ।

दौर्भाग्यमावहन्नपि कर्ण: स्वाभिमानपूर्णं जीवनं यापितवान् । द्रौपदीस्वयंवरप्रसंगे यदायं सूतपुत्रोऽस्तीति कारणं दर्शयन्त: स्वयंवरे भागग्रहणोऽनर्होऽयमिति केचन प्राहु:, तदायं गर्जनापूर्वकं निवेदितवान् यत् - सुतो वा सुतपुत्रो वा यो वा को वा भवाम्यहम्।

दैवायत्तम् कुले जन्म ममायतं तु पौरुषम् । इति ।

एवं वस्तुतो वीरवरोऽयं देवदुर्विपाकेन निखिलेऽपि जीवने सर्वत्रान्यायस्योपेक्षायाश्च भाजनमभूदिति महान् क्लेशस्य विषय: ।।

**( ख ) ययात्युपाख्यानम्**

आयुरात्मजस्य नहुषस्य यति–ययाति–संयात्यायाति–वियति–कृतिसंज्ञा: षट् पुत्रा महाबलपराक्रमा: बभूवु: । यतिस्तु ज्येष्ठोऽपि सन् राज्यं नैच्छत् । तत: ययाति: भूभृदभवत् । उशनसश्च दुहितरं देवयानीं शर्मिष्ठां च वार्षपर्वणीमुपयेमे ।।

यदुं च तुर्वसुं चैव देवयानी व्यजायत । द्रुह्युं चाणुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ।।

अर्थात् ययातित: देवयान्यां यदुनामक: तुर्वसुनामकश्च पुत्रद्वयमजायत । तथैव ययातित: शर्मिष्ठायां द्रुह्यु: अणु: पूरु: चेति पुत्रत्रयमजायत । एवं सम्मिल्य ययाते: पञ्च पुत्रा: आसन् ।

शुक्रशापात् चाकालेनैव ययातिर्जरामवाप । प्रसन्नशुक्रवचनाच्चायं जरा एषा यदि कश्चित् स्वीकृत्य स्वीयां युवावस्थां ददाति, चेद् जरामुक्त: सन् पुनर्युवा भवितुमर्हतीति शापान्मुक्तिमार्ग: प्राप्तवान् । तत: स्वीयां जरां संक्रामयितुं स: ययाति: प्रथमं स्वीयं ज्येष्ठं पुत्रं यदुमुवाच – तव मातामहस्य शापादियमकालेनैव जरा मामुपस्थिता अस्ति । तामहं तस्यैवानुग्रहाद् भवत: संचारयाम्येकं वर्षसहस्रम् । न तृप्तोऽस्मि विषयेषु । त्वद्वयसा विषयानहं भोक्तुमिच्छामि । नात्र भवता प्रत्याख्यानं कर्तव्यम् ।

इत्युक्त: स नैच्छत्तां जरामादातुम् ज्येष्ठपुत्र: यदु: । तत: तं पिता शशाप – त्वत्प्रसूतिर्न राज्यार्हा भविष्यति इति ।

अथ अन्यानपि स्वीयान् त्रीन् पुत्रानसौ क्रमश: युवावस्थां याचितवान् । परं तेष्वेकोऽपि स्वीयां युवावस्थां ययात्यै दातुं नोत्ससाह । अन्ते शर्मिष्ठातनयम् अशेषकनीयांसं पूरुं तथैवाऽह ।

पूरु: बाल्यात्प्रभृति मातृ–पितृभक्त: आसीत् । अत: स चातिप्रवणमति: पितरं प्रणम्य सबहुमानं महान् प्रसादोऽयमस्माकम् इत्युदारम् अभिधाय स्वीयां जरां प्रतिजग्राह । स्वकीयं च यौवनं स्वीये पित्रे सानन्दं ददौ ।

पिता ययातिरपि नवं यौवनमासाद्य धर्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयं चचार, सम्यक् प्रजापालनं चाकरोत्।

विश्वाच्या सहोपभोगं भुक्त्वा कामानाम् अन्तमवाप्स्यामीति अनुदिनं तन्मनस्को बभूव । अनुदिनं चोपभोगतश्च कामानतीव रम्यान्मेने ।

ततश्चैकदा स आत्मन्येवमचिन्तयत् – अहो मे मोहाभिनिवेश । न हि काम उपभोगेन शाम्यति, प्रत्युत वर्धत एव । यदि नर: पापदृष्टिं विजह्यात्तदा तस्य सर्वा अपि दिश: सुखमय्यो भवेयु: । धिक् कामतुष्णां या जीर्यतोऽपि न जीर्यति । योऽहं पुत्रसकाशाद्यौवनम् अभियाच्य निस्त्रप: कामानुपभोक्तुमिच्छामि तस्य मम किमस्माद् अन्यल्लज्जाकरं स्यात् । साग्रं वर्षसहस्रं मे व्यतीतं विषयासक्तचेतस: । तथापि दुष्टा तृष्णा मामनुबध्नात्येव । ईहते च मामन्धे तमसि पातयितुम् । पापे तृष्णे । अलमेतावता । इति विचिन्त्य स्वीयाय कनिष्ठाय पुत्राय पूरवे यौवनं दत्वा तमेव च राज्येऽभिषिच्य निर्द्वन्द्वो निर्ममो भूत्वा तपसे वनं प्रययौ ।।

**( 3 ) वर्णनात्मक: निबन्ध:**

**काशी**

अस्माकं भारते देशे नैकानि तीर्थानि सन्ति । तेषु कानिचिन् नगरतीर्थानि सन्ति । एष्वेकतमं सुप्रसिद्धं तीर्थमस्ति काशी । काशी नगरीयमनुगङ्गं स्थिता । इयं ह्यधिवासो भगवतो विश्वनाथस्य मर्त्यलोकस्थितस्य ।

काश्या: नैकविधं वैशिष्ट्यमस्ति । तद्यथा – काश्यां मरणे मुक्तिरिति पुराणाज्ञा: वदन्ति । पुराणेषु श्रद्धाना: जीवनस्यान्तिमे भागे वर्तमाना: विपश्चितोऽविपश्चितो वा, धनिका: अधनिका: वा, दिग्भ्यो विदिग्भ्यश्च अत्र समागत्य निवसन्ति, मृत्युं च प्रतिपालयन्ति ।

येऽपि नाम काशीमभितो ग्रामास्तत्राप्येष समाचारः प्रवर्तते, यद् ग्रामे कश्चिन्मृत्युं प्राप्नोति, तर्हि प्रेतमिहैव आनयन्ति यथाशास्त्रं चान्त्येष्टिसंस्कारेण तं संस्कुर्वन्ति ।

अत्र हि प्रजागरुकाः सन्तः भक्तजनाः भक्तवत्सलस्य परमेश्वरस्य सततं कीर्तनं कुर्वन्ति । एषा चात्र श्रद्धा यत् पुण्य-प्रसन्न-सलिलायां भगवत्यां भागीरथ्यां कृतं स्नानमस्माकं पापानि हनिष्यन्तीति ।

सेयं वाराणसी कदा प्रत्यष्ठात्केन वा निर्वृत्तेति न विशिष्य विद्मः । पुराणेषु निबद्धमस्ति यदैक्ष्वाको राजर्षिः सत्यवादी श्रीहरिश्चन्द्र इहैवात्मानं चाण्डालाय विचिक्रिये । अथ चेदं दृढतरमवगच्छामः यद् यदा सुगतः भगवान् तथागतः सारनाथे मृगाजिरे धर्मस्य अनुशासनं कृतवान्, तदापि काशी (वाराणसी) वैदिकानां विदुषां तपःपूतानां वीतरागाणां ब्राह्मणानामावास आसीदिति । तदात्वेऽपि सहस्रशो यात्रिकाः पावनीमिमां शिवपुरीं तीर्थमिति तारयिष्यति नो भवार्णवमिति धिया सोत्कण्ठं प्रपेदिरे ।

अद्यापि काश्यां पूर्ववत् सामगानां पुण्यो वेदध्वनिः मूर्च्छति श्रवणयोः । अद्यापि शास्त्रार्थे प्रवृत्तानां विप्राणां विचरति कलकलः काष्ठाः । अद्यापीदं पुण्यतमं तीर्थमिति श्रद्धयोपयन्ति यात्रिकाः । अद्यापि समुच्चरन्ति देवालयेषु सायम्प्रातिकाः तूर्यनादाः मङ्गल्याश्च शङ्खस्वनाः । किं बहुना, कालपरिवासेनापि पूर्ववद् विराजते नगरीयं सुरयुवतिरिव निर्जरा ।

काश्याः सायंतनः कालः रमणीयो भवतीति मान्यता । एवं ह्यनुभूयते जनैः यन्नक्तं च यथा दीप्तिमतां विभूतिमत्तां च वाराणस्या विभावयामो न तथा दिवा । स्फटिकाविशदेन पयःपूरेण मन्दमन्दमकति मन्दाकिनी, प्रतिफलितानि चात्रोपकण्ठस्थितानि हर्म्याणि देवतागाराणि च । गङ्गायां तरन्तो दीपाः रमणीयं दृश्यं सर्जयन्ति । तत् दृश्यं दर्शं दर्शं रात्रिरपि कदा व्यतीतेति नावगम्यते ।

किमधिकं ब्रूरूमः, एषा काशी नगरी पृथ्वीतले मानवयोनावतरितैः प्रत्येकं जनैः जीवने न्यूनातिन्यूनमेकवारं दर्शनीयास्तीति निश्चयेन कथयितुं शक्यते ।।

**( 4 ) विवेचनात्मकः निबन्धः**

**( क ) भारतीय-संस्कृतेः स्वरूपम्**

तस्या एतस्या आसेतुहिमालयम्, परःशतेषु संप्रदायेषु प्रविभक्तायाः परःसहस्रेभ्यश्च वर्षेभ्यो लोकोत्तरप्रतिमानवद्भिराचार्यैः महात्मभिश्च जगद्धितसंपादनकामनया अभिवृद्धिं नीतायाः साम्प्रतं च चतुर्दिशम् देवतारूपेण समाहूयमानायाः भारतीयसंस्कृतेः किं स्वरूपं किं वा वैशिष्ट्यमिति महति प्रश्ने समासत एव तत्समाधानमिह प्रदर्श्यते ।

भारतीयसंस्कृतेः स्वरूपावधारणप्रसङ्गे प्रथमं पदमवगाहते आध्यात्मिकी भावना । एषा हि तस्या अधिष्ठानं हृदयमात्मैव वा । तिलेषु तैलमिव, पुष्पे सुगन्ध इव, क्षीर आज्यमिव, प्राणिषु प्राणा इव, शरीरे रक्तमिव वा इयं हि तस्याः सर्वं स्वरूपमभिव्याप्य तिष्ठति। मणिमालायां मेरुमभितो मणिगणा इव आध्यात्मिकीं भावनामभितस्तस्या अन्ये गुणा अभिवर्तन्ते । सैव तत्सूत्रं येन वै भारतीयसंस्कृतेः सर्वाण्यन्यानि रूपाणि संदृब्धानि भवन्ति । एषैव तानि सर्वाणि यमयति । सब्राह्मणोपनिषत्का वेदाः, स्मृतयः पुराणानि, बौद्धानां जैनानां वागमाः, महात्मनां वचांसि, अन्यद्वा भारतीयं वाङ्मयं सर्वमपि आध्यात्मिक्या भावनया साक्षादसाक्षाद्वा ओतप्रोतम् । असंख्यानां भारतीयमहात्मनां मुनीनां साधूनां च जीवनान्यस्या एव निदर्शनानि ।

कीदृग्रूपा पुनरियमाध्यात्मिकी भावनेति चेत्, परोक्षप्रिया हि देवाः प्रत्यक्षद्विषः, कश्चिद्धीरः प्रत्यागात्मानमैक्षत् आवृत्तचक्षुः अमृतत्वमिच्छन्, (कठोपनिपदि 2.1.1), श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते (कठोपनिषदि 1.2.2), इत्यादिश्रुतिस्मृत्यनुसारं सततं संसरणशीले क्षणपरिणामिनि संसारे आपातरम्यां पर्यन्तपरितापिनीम् ऐन्द्रियकां तात्कालिकीं च प्रवृत्तिं विहाय यत्किञ्चित्स्वभाववतोऽप्यात्मनः कल्याणकामनया धीर-धीभिरेव अवलम्बनीया अन्तर्वृतिरूपा दीर्घदृष्टिरेव सेत्येव वक्तुं शक्यते । सा चैषा आध्यात्मिकी भावना समाना सर्वष्वपि भारतीयसंप्रदायेषु । अन्यत्सर्वम् अधस्ताद् वर्णितं भारतीयसंस्कृतेः स्वरूपं वस्तुतोऽस्या

एव विस्तरो व्याख्यानं वा ।

आध्यात्मिकीं भावनामनु समायाति पारलौकिकी भावना । आपातरम्ये पर्यन्तपरितापिनि ऐन्द्रियके जीवनेऽनास्था, आत्मनः कल्याणकामना च स्वत एव अयमेव लोको न पर इति भावनाया विरोधिन्यां पारलौकिकभावनायामेव विश्रान्तिं लभते । तां विना को नु क्षणस्थायिनि सततं संसरणशील इह जीवने शान्तिभाग् भवेत् । एतयैव प्रेरिता भारतीया वीरा रमण्यश्च स्वधर्मस्य स्वदेशस्य च रक्षार्थं हसन्त एव सर्वस्वं प्राणानपि चोत्सृजन्तो भारतीयेतिहासे दृश्यन्ते । सा चैषा पारलौकिकी भावनापि सततमस्मान् कर्तव्यपालनाय प्रोत्साहयन्ती अमूल्यं रत्नमिव भारतीयसंस्कृतेः ।

कर्तव्यपक्षेऽपि वर्णनातीतमेव भारतीयसंस्कृतेः स्वरूपम् । तत्र आत्मसंयमः तावत्प्रथमं पदमधितिष्ठति । नानाविधव्रतोपवासबहुलेन तत्तत्सांप्रदायिकाचारेण, कृच्छ्रातिकृच्छ्रचान्द्रायणादिविधानेन च आत्मसंयमस्यैव भारतीयसंस्कृतौ अनन्यसदृशं महत्त्वमाख्यायते । पुरुषार्थचतुष्टयसाधकेषु चतुर्ष्वाश्रमेषु यद् ब्रह्मचर्यस्य अनन्यसाधारणं प्रमुखं स्थानं तदपि भारतीयसंस्कृतावात्मसंयमस्यैव वैशिष्ट्यं प्रख्यापयति । नैतदहेतुकं यत्पृथिव्यां विभिन्नासु सभ्यतासु केवलं भारतीयसंस्कृतावेव ब्रह्मचर्यस्य एकतमाश्रमत्वेन स्थापना तस्याद्वितीयमहत्त्ववर्णनं च दरीदृश्यते । कस्याविदितं यद् भीष्म-पितामहसदृशादर्शब्रह्मचारिणां जन्मभूमिरपि भारतमेव ।

आध्यात्मिक-भावनावारिणा सिक्तायामेव भूमौ पुनरस्यात्मसंयमस्य संभव इति न व्याख्यामपेक्षते । वस्तुतस्तु यमनियमादीनि सर्वाण्यपि बाह्याभ्यन्तरशुचितासाधनानि आत्मसंयमस्यैव प्रपञ्चः ।

आत्मसंयमनादनन्तरं तस्यैव स्वविलास इव भारतीयसंस्कृतेरपरं वैशिष्ट्यं मातृशक्तेः संमाननम् नाम । भारतीयसंस्कृतेरसाधारणं माहात्म्यमेतत्कृतमेव । विश्वपप्रञ्चस्य मूलकारणभूतामाद्यां महाशक्तिं या देवी सर्वभूतेषु मातृरूपेण संस्थिता (दुर्गासप्तशती 5.71) इत्येवं मातृरूपेण चिरात्संभावयन्त्या, तव देवि भेदाः स्त्रियः समस्ताः (दुर्गा. 11.6) इत्येवं च तां निध्यायन्त्या भारतीयसंस्कृत्या मातृशक्तेः विशेषतः सम्मानः स्वाभाविक एव । परं नियतमेतद्वैशिष्ट्यमखिले संसारेऽसाधारणम् । मातृवत्परदारेषु इति नीतिकृद्भिः अभ्यापगतः सिद्धान्तो व्यवहारेऽपि परस्त्रीषु परदारिकासु च मातः । भगिनि । पुत्रि । इत्यादिशब्दान् प्रयुञ्जानैः वस्तुतः परिपाल्यते भारते पामरैरपि जनैः । किंबहुना, विशेषतो भगवत्याः सीतायाः देव्या द्रौपद्याश्चापमानपरिमार्जनार्थं प्रवृत्तयोः रामायणमहाभारतयोः निर्माणमपि उपर्युक्तसिद्धान्तनिदर्शनार्थमेव जातमिति मन्ये । ततश्च स्त्रीजातेः सम्मानभावनाप्यस्माकं भारतीयसंस्कृतेरवर्णनीयं वैशिष्ट्यमिति निर्विवादम् ।

परस्परं विचारसहिष्णुतापि अपरं वर्णनार्हं वैशिष्ट्यं भारतीयसंस्कृतेः । सामाजिकाचारेष्वपेक्षितेऽपि प्रायेण व्यक्तीनां साम्ये, विचारविषये सर्वेषां स्वातन्त्र्यं चिरादेवाभिमतमासीद् भारतीयानाम् । परस्परं विचारसहिष्णुतामन्तरेण न तत्प्रथत इति साप्यावश्यकत्वेन अङ्गमस्मत्संस्कृतेः । अत एव ईश्वरानीश्वरवाद-वेदपौरुषेयापौरुषेयत्ववाद- वाममार्ग-दक्षिणमार्गादिभेदानां परस्परं सहिष्णुतया संस्थितिर्न कस्याप्यविदिता भारते ।

व्यक्तिस्वातन्त्र्यरूपा वा मनुष्यत्वस्य संमानरूपा वा एषा विचारसहिष्णुतैव वस्तुतो जैनानामनेकान्तवादसिद्धान्तस्य मूलम् । विभिन्नशास्त्रेषु जैनाद्यागमेषु चोपसंगीतगौरवाया अहिंसायाः अपि अन्ततः तत् तत् चेतनव्यक्तीनां स्वव्यक्तित्वविकासार्थम् अबाधस्वातन्त्र्यम् एवाभिप्रायो निष्पद्यते । अत एव भारतीयेतिहासे बलपूर्वक-धर्मान्तरग्रहणस्य वार्ता अश्रुतचरी एव । तदत्र मौलिको भेद आर्यसंस्कृतेः इतरसंस्कृतिभ्यः इति दिक् ।।

**(ख) अल्पव्ययता उत्तमो गुणः**

वर्षार्थमष्टौ प्रयतेत मासान् निशार्थमर्धं दिवसं यतेत ।
वार्धक्यहेतोर्वयसा नवेन परत्रहेतोरिह जन्मना च ।।

श्लोकश्चायं बोधयति विवेकिनः यत् - सर्वेऽपि जनाः धनादिकं सञ्चिनुयुः भविष्यत्सुखलाभायेति । ऋते च केभ्यश्चिद्वाणिज्यादिप्रवृत्तेभ्यः सर्वेषामन्येषां धनसञ्चयो नामायं प्रायः क्रमसाध्यः दीर्घकाल-सम्पादनीयश्च । अत एवोक्तम् -

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः । स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।।

धनसञ्चयोऽयं यथा प्राधान्येन धनस्यार्जनेन सम्पाद्यते तथा अर्जितस्याव्ययीकरणेनापि । यथा यथा संगृह्यते वित्तं यदि तथा तथा व्ययीक्रियते, कथं वैतत् सञ्चीयेत । न शक्यते व्ययः सर्वथा परिहर्तुम् । तदभावे हि न पार्यते जीवितुमपि, अर्थस्य च स्यात् व्यर्थता । अत उत्तमोऽयं धनसञ्चयोपायो यदल्पव्ययता नाम । अत एवोक्तम् -

आयस्य तुर्यभागेन व्ययकर्म प्रवर्तयन् । अन्यूनतैलदीपो हि चिरं भद्राणि पश्यति ।

परन्तु अयमपि नियमः नैव सर्वैरप्यनुसर्तुं शक्यते, यतो लोके ह्यस्मिन् नैके सन्त्येतादृशा येषामायो जीविकायै अपि नैव पर्याप्तः, का कथा सञ्चयस्य । विशेषतश्च बहूनामियम् अस्मद्देशीयानां गतिः । अथापीयमल्पव्ययशीलता एतादृशामपि प्रभवेद् अनावश्यकक्लेशप्रहाणायेति न काप्यत्र संशीतिः ।

प्रायोऽस्मिन् जगति सर्वे जनाः नैककामवशंवदीभूतचेतसः इदमद्य मया लब्धमिदं लप्स्ये मनोरथम् इति दुष्पूरैराशाशतैः विडम्ब्यमानाः प्रभूतं धनं व्ययीकुर्वन्ति । अधिकाधिकधन-लिप्सया चाहर्दिवं सन्तप्यन्ते । केचिच्च भविष्यद्धनलाभं चिन्तयन्तः, ऋणादिग्रहणेन प्रथमत एव महान्तं व्ययं कुर्वन्तः तद्द्वारेणाजीवितान्तं क्लिश्यन्ति । अपि च साधारणमिदं मानसिकं दौर्बल्यं यत् सर्वोऽपि जन आत्मनः सहजा यथार्था च या शक्तिः ततोऽप्यधिकतरां शक्तिं प्रदर्श्य लोकं वञ्चयितुमिव प्रवर्तमानोऽन्तत आत्मानमेव प्रतारयति । शताधीश आत्मानं सहस्राधीशं दर्शयितुमभिलषति । सहस्राधीशो लक्षाधीशं लक्षाधीशश्च कोटीश्वरम् । इयञ्च रीतिर्न केवलं धनविषये, विद्याबुद्ध्याभिजात्यादिष्वपि समुपलभ्यते लोके । परन्तु अयं विशेषो विद्याऽभिजात्यादिविषयको दम्भो न तावते भवेद् अपकाराय यावतेऽयं धनविषयकः । धनाडम्बरशीलो हि जनः धनिनमात्मानं ख्यापयितुं बहुधा धनं व्ययीकरोति । अन्ते च मिथ्यागौरवमनो-मोदकान् आस्वादयन् दरिद्रतादुर्भरं जीवितं यापयति । कति वा न दृश्यन्ते लोके ये किल वंशगौरवमित्यादि यत्किञ्चिल्लपन्त उद्वाहादिषु प्रभूततरं धनं वृथा विकिरन्ति, कुर्वन्ति चात्मानं लोकोपहासभाजनम् । अहो कियदिदं मौर्ख्यं यदयं मिथ्यामानाभिमानो नाम । सत्यमेव खलूक्तं कविशेखरेण शेक्सपियरमहोदयेन फालस्टाफमुखेन- मानः । कोऽयं मानो नाम ? श्वासमात्रम् । अर्थात् वाङ्मात्रम् इति । स्यान्नाम विदूषकमुखनिस्सृतेयमुक्तिः मानान्तरविषये अयथार्था । मिथ्याभिमानस्य विषये पुनः यथार्थैव, यो हि पूर्वोक्तया विधया नैकासामपदां मूलम् ।

सुशकमेव चाल्पव्ययतायाः सम्पादनम् अभ्यासवशात् सद्गुणवत् । यदा यदा किञ्चिद्वस्तु क्रीयते तदा तदा इदं चिन्तनीयं किमेतन्ममात्यन्तमावश्यकम्, किञ्च वा ममार्थिकी शक्तिः पर्याप्ता एतत् क्रेतुमिति । अतएव तत्रभवान् महात्मा गान्धिरुपदिशति - सर्वेणापि आय-व्ययगणनं निर्वोढव्यम् । येन सिंहावलोकनविधया पश्यन् जनो ज्ञातुं शक्नुयात् कियद्वा अमुकस्मिन् मासे मया आवश्यकवस्तूनां कृते धनं व्ययितम्, कियद्वा अनावश्यकवस्तूनामिति । क्रमेण चानावश्यको व्ययः शक्यते परिहर्तुम् इति । एवञ्चेत्थं वक्तुं शक्यते -

प्रत्यहं पर्यवेक्षेत मनुजो व्ययमात्मनः । किमायादधिको व्यर्थः किं वान्यूनोऽयमायतः ।।

अल्पव्ययता चेयं न केवलं प्रत्येकव्यक्तेरेव, विस्तृतराज्यादेरपि भवत्येवाभ्युदयहेतुः । यतः प्रायः सर्वापि नीतिः धर्मादयश्च संकुचितेन रूपेणैकैकशो मनुजान् विषयीकुर्वन्ति, विस्तृरूपेण च राज्यादीनि । भगवान् रामचन्द्रः कुशलप्रश्नविधया राजधर्मानुपदिदिक्षुः आत्मानं नेतुं चित्रकूटमुपागतं भरतं पृच्छति - आयस्ते विपुलः कच्चित् कच्चिदल्पतरो व्ययः इति ।

योगरूढ्या प्राय: धनैकविषयोरपि आयव्ययपदयोरन्यविषयताङ्गीकारेण न कोऽपि दोषो यद्यल्पव्ययतायाः साधुता अन्यानपि विषयतया संगृहीयात् । अतश्च शारीरशक्तेरल्पव्ययस्य साधुतामुत्पश्यन् महाकविः कालिदासो वदति अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्म-साधनमिति । एवं वागादीनां कर्मन्द्रियाणां चक्षुरादीनाञ्च ज्ञानेन्द्रियाणां शक्तिं संरक्षितुमभिलषता नैव तेषामनावश्यक उपयोगः कर्तव्य इत्युपदिश्यते अभियुक्तः प्रसिद्धमेव पुराणादिषु यथा तपोधनाः स्वमुत्तमं धनं तपः न कदापि व्ययितुमुत्सहन्ते, व्ययितं वा कदाचित् महता प्रयत्नेन पुनः पूरयन्तीति । एवञ्चैतत्सिद्धं भवति न केवलं धनतया ज्ञातस्य धनस्य सर्वस्यापि धनस्य अल्प एव व्ययः श्रेयानिति मानवजीवने सर्वत्र अल्पव्ययता नाम गुणएवोत्तम इति दिक् ।।

## स्वाध्यायः

**1. अधोलिखितानां रिक्तस्थानां पूर्तिः विधेया ।**

(1) निबन्धाः खलु .......... उत्तरेण न शक्याः निबद्धुम् । (ज्ञानम्, परिशीलनम्, लेखनम्)

(2) निबन्धाः प्रायः .............. भवन्ति । (पञ्चविधा, षोढा, चतुर्विधा)

(3) कविता कालिदासस्य इत्यनेन शीर्षकेन लिखितः निबन्धः ................. प्रकारको भवति ।

(आख्यानात्मकः, विवेचनात्मकः, वर्णनात्मकः)

(4) सर्वप्रथमं निबन्धस्य ............. विचरणीयं भवति । (विषयवस्तु, शरीरम्, भाषा)

(5) निबन्धे अवतरणिका ................... इष्यते । (विस्तृता, लध्वी, अतिविस्तृता)

**2. एकवाक्येन उत्तरं लिखत ।**

(1) निबन्ध शब्दस्य कोऽर्थः ?

(2) निबन्धे वाक्यरचना कीदृशी स्यात् ?

(3) वर्णनात्मकस्य निबन्धस्य एकमुदाहरणं लिखत ।

**3. यथाविस्तरम् उत्तरं प्रयच्छत।**

(1) किं नाम निबन्धः ? तस्य स्वरूपं लिखत ।

(2) निबन्धस्य शक्यान् भेदान् विवृणुत ।

(3) आख्यानात्मके निबन्धे किं किं वस्तु भवति ?

(4) निबन्धस्य अवतरणिकायाः स्वरूपं लिखत ।

**4. संक्षेपतः टिप्पणी लेख्या ।**

(1) विषयैक्यम् ।

(2) उपसंहारः ।

(3) सामग्रीसंग्रहः ।

**5. निबन्धं लिखत ।**

(1) ययातिचरितम् ।

(2) अल्पव्ययता उत्तमो गुणः ।

(3) भारतीयसंस्कृतेः स्वरूपम् ।

**छात्रप्रवृत्तिः**

छात्रैः पुराणेभ्यः आख्यानानि पठित्वा चरितात्मकाः निबन्धाः लेखनीयाः ।

**शिक्षकप्रवृत्तिः**

वन-पर्वत-नगर-आश्रमादीनां वर्णानात्मकाः लघवः निबन्धाः प्रतिसत्रम् लेखापनीयाः ।

●

# १६ न्यायवाक्यानि

**प्रस्तावना** – संस्कृतसाहित्ये न्यायशब्दस्य प्रयोगः अनेकेषु अर्थेषु भवति । प्रमाणैरर्थपरीक्षणं न्यायः इति लक्षणानुसारमयं न्यायशब्दः न्यायशास्त्रं बोधयति । न्यायालये यन्न्यायः भवति, तमर्थमप्ययं न्यायशब्दः अभिव्यनक्ति। परन्तु अत्र यः न्यायशब्दः प्रयुक्तोऽस्ति सः तेषु लघुषु वाक्येषु प्रयुक्तो भवति, येषु वाक्येषु क्वचित् स्वीयोऽनुभवः, क्वचित् नीतिः, क्वचित् च बोधादिकम् उपदिष्टं भवति ।

संस्कृतसाहित्यस्यायमपि विशेषः यदत्र एतादृशानि न्यायवचनानि रचितानि सन्ति । प्रत्येकं न्यायवचनं स्वस्मिन् महान्तमुपदेशं नीतिं वा संगृह्य तिष्ठति । एतादृशानां विंशतिः न्यायानामत्र विविधेभ्यः स्थलेभ्यः उद्धृत्य संग्रहः कृतो वर्तते।

एतानि न्यायवचनानि न केवलं शास्त्रे साहित्ये वा प्रयुज्यन्ते, अपितु जनसामान्येषु अपि एतानि प्रयुज्यन्ते । किमधिकं ब्रूमः कानिचित् न्यायवचनानि तु लोके लोकैरेव विरचितानि सन्ति । पूर्वं तेषां लोके प्रचारः प्रसारः सञ्जातः, तदनन्तरं तेषां शास्त्रेषु साहित्ये च प्रयोगः सञ्जातः । एकं लघु वाक्यं न्यायरूपेण प्रयुक्तं कदाचित् एकं शास्त्रमिव प्रतीयते । एतदप्यस्य वैशिष्ट्यं सूचयति ॥

---

**अक्षिपात्रन्यायः**

धूलेः कश्चन कणः अपि नेत्रं गतः चेत् नेत्रे पीडा उत्पद्यते । मृदुस्वभावस्य भावनाप्रधानस्य वा जनस्य कृते अल्पा अपि पीडा असहनीया भवति इत्यस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति ।

**अगतिकगतिन्यायः**

कस्मिंश्चिद् विषये उपाय एव न भवति चेत् अल्पस्य महतः वा मार्गस्य आधारेण तरणोपायः मार्गणीयः भवति । तदा आश्रयरूपेण स्वीकृतः कियानपि क्षुल्लकः भवतु साधनस्य अपेक्षया समयस्य एव महत्त्वम् अधिकं भवति ।

**अङ्गारन्यायः**

अङ्गारः उष्णः यदा भवति तदा हस्ते गृहीतः चेत् हस्तं दहति स एव यदा शीतलः भवति तदा स्पृष्टः चेत् हस्तं मलिनं करोति । एवं कस्याम् अपि दशायां तस्य स्पर्शः दोषजनकः एव । तथा एव दुर्जनस्य संगतिः अपि हानिम् एव करोति इति श्रोतयितुम् अस्य न्यायस्य प्रयोगः भवति ।

**अचल-चलन्यायः**

प्रवाससमये वृक्षाः चलन्तः दृश्यन्ते, चलन्ती नौका प्रायः स्थिरा इव भाति, वेगेन भ्रमन् वस्तुविशेषः स्थिरः इव भाति। अत्यन्तवेगेन भ्रमतः व्यजनस्य पत्राणि न दृश्यन्ते । एतत् सर्वं भ्रान्तिवशात् । तथा एकस्य वस्तुनः चलनं स्थिरत्वं वा द्योतयितुम् अस्य न्यायस्य उपयोगः क्रियते ।

**अजागलस्तनन्यायः**

अजायाः गलस्य अधः स्तन इव दृश्यमानः कश्चन मांसखण्डः लम्बमानो भवति । अजायाः शारीरिकप्रक्रियायाम् अस्य स्थानम् न भवति । निरुपयोगिनः प्रयोजनरहितस्य वा वस्तुनः सूचनार्थम् अस्य न्यायस्य प्रयोगः क्रियते । न्यायः अयं तदेव निष्प्रयोजनत्वं दर्शयति ।

**उदाहरणम्-** **धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥**

(ब्रह्माण्डपुराणे अ. 150)

**अण्डकुक्कुटीन्यायः**

अण्डं प्रथमं जातं वा कुक्कुटी प्रथमा जाता इति अद्य यावत् न निश्चितम् । अण्डं विना कुक्कुट्याः निर्माणं न भवति तां विना अण्डस्य निर्माणं न भवति । तथैव अङ्कुरः आदौ जातः वा तस्य बीजम् आदौ जातम्? इत्यत्र अपि पूर्व-अपर-संबन्धः नास्ति परस्परकार्यकारणसंबन्धः अस्ति । अयं बीज-अङ्कुरप्रवाहः अनादिः अनन्तः वर्तते। (सा. 217-218)

**अतिपरिचयन्यायः**

अतिपरिचियेन प्रेमापेक्षया अपमान एव भवति इत्यस्य न्यायस्य अर्थः । यथा- अत्यन्तं मूल्यवान् सुगन्धी चन्दनवृक्षः मलयपर्वते अधिकप्रमाणेन उपलभ्यते । अधिकप्रमाणेन लभ्यते इति कारणेन तत्रस्थाः भिल्लमहिलाः तस्य वृक्षस्य मूल्यम् अज्ञात्वा तम् इन्धनरूपेण विनियुञ्जते ।

**अतिपरिचयाद् अवज्ञा सन्ततगमनाद् अनादरो भवति ।**
**मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥**

(शार्ङ्गधरपद्धतिः 83)

**अन्धकरदीपिकान्यायः**

अन्धस्य हस्ते दीपः स्थापितः चेदपि तस्य अन्धस्य कृते तस्य दीपस्य किमपि प्रयोजनं न भवति । कस्यापि वस्तुनः उपयोगं कर्तुं स्वीया योग्यता नास्ति चेत् तस्य जनस्य कृते तस्य वस्तुनः गुणानां किमपि प्रयोजनं न भवति । एतस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति ।

**अन्धकूपन्यायः**

एकः सत्पुरुषः एकम् अन्धम् उक्तवान् अनेन मार्गेण पुरतः गच्छ इति । परं स अन्धः तत् अश्रुत्वा अयोग्येन मार्गेण गत्वा किञ्चित् कालानन्तरं एकस्मिन् कूपं पतितः । तथैव मनुष्यः सन्मार्गं विहाय कुमार्गम् आश्रयति चेत् अन्ध इव सोऽपि कूपम् एव पतितः भवेत् । एतादृशीं स्थितिं बोधयितुम् अस्य न्यायस्य प्रयोगः भवति । (सा. 493)

**कदलीकण्टकन्यायः**

कश्चन कण्टकः कदलीपत्रे लगति चेत् किं वा कदलीपत्रम् एव कण्टकाग्रे पतति चेत्-परिणामस्तु तदेव । हानिस्तु कदलीपत्रस्य एव न तु कण्टकस्य । तथैव सज्जनस्य सङ्गः दुष्टेन सह भवति चेत् हानिः सज्जनस्य एव दुष्टस्य न- इत्यर्थे न्यायः अयं प्रयुज्यते ।

**कनककुण्डलन्यायः**

सुवर्णस्य आभूषणानि नाम्ना रूपेण च भिन्नानि भवन्ति चेदपि सुवर्णस्य दृष्ट्या तानि एकरूपाणि एव। तेषां पूर्णतः साम्यं भवति । तथा कार्यस्य कारणस्य च मध्ये तादात्म्यम् अस्ति इति अयं न्यायः बोधयति । एतत् जगत् एकं कार्यं ब्रह्म तथा एतस्य कारणम् इत्थं द्वयोः अपि अभेदः एव इति अनेन न्यायेन सूच्यते ।

**कर्णकौन्तेयन्यायः**

अहं कुन्तीपुत्र इति यावत्पर्यन्तं कर्णः न जानाति स्म तावत् सः आत्मानं राधापुत्रं मन्यते स्म । कुन्त्या नदीप्रवाहे परित्यक्तः कर्णः राधानामिकया सूतस्त्रिया पालितः । यदा सत्यं ज्ञातं तदा सः आत्मानं कुन्तीपुत्रं भावयति स्म । एवं कालान्तरे यः विषयः स्पष्टः भवेत् तस्य बोधार्थम् अस्य न्यायस्य प्रयोगः भवति ।

**काकदध्युपघातन्यायः**

कश्चन मनुष्यः केनापि कार्येण बहिः गच्छति स्म अन्यः गृहस्य अन्तरेव वर्तते स्म । गृहे वर्तमानं दधि काकेभ्यः रक्ष्यताम् इति तेन बहिः गच्छता जनेन अन्यस्मै कथितम् । किञ्चित्कालानन्तरं कश्चन शुनकः आगत्य सर्वमपि दधि खादितवान्। काकेभ्यः

एव दधि रक्षणीयम् इति चिन्तयता तेन मन्दमतिना दधिरक्षणस्य महत्त्वं न ज्ञातम् । एवं उपलक्षणम् अज्ञात्वा ये वाच्यार्थमेव आश्रयन्ति तेषां विषये अस्य प्रयोगः क्रियते ।

**कुमारीकङ्कणन्यायः**

एकदा विवाहार्थं काञ्चन कन्यां द्रष्टुं केचन जनाः तस्याः गृहम् आगताः । तदा सा कन्या स्वगृहे धान्यं नास्ति इति ज्ञातवती। तथापि सा केषाञ्चन धान्यकणानां कुट्टनं कृत्वा पिष्टखाद्य संपादयितुं निश्चितवती । परन्तु कुट्टनध्वनिः श्रुतश्चेत् बहिः वर्तमानाः जनाः किं चिन्तयेयुः इति सा शनैः हस्तगतानि कङ्कणानि निष्कास्य स्थापितवती । अन्ते तस्याः प्रत्येकस्मिन् करे एकम् एव कङ्कणम् अवशिष्टम् आसीत् । अयमाशयः यत् अनेकेषां कङ्कणानां कारणेन महान् ध्वनिः (वचणनं) भवति । एकेन कङ्कणेन ध्वनिर्न जायते ।

तथा एक एव भवति चेत् शान्तो भवतीति अस्य न्यायस्य भावः ।

**जलमन्थनन्यायः**

तक्रे मथिते नवनीतम् उद्भवति । परन्तु तक्रं विहाय जलस्य कियदपि वा मथनं क्रियते चेत् नवनीतम् उत्पद्यते किम्? श्रम एव भवति खलु । एवम् अयोग्यस्थाने विफलपरिश्रमम् उद्दिश्य अयं न्यायः प्रवर्तितः ।

**जलमौक्तिकन्यायः**

स्वातिनक्षत्रे शुक्तिकायां जलबिन्दुः पतितश्चेत् मौक्तिकं भवतीति प्रवादः । अर्थात् साधारणोऽपि जलबिन्दुः विशिष्टदेशकालादिबलेन मौक्तिकं भवति । तथा मनुष्योऽपि विशिष्टदेशकालश्रद्धादिकारणेन महीयान् भवतीति अस्य अभिप्रायः।

**संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते ।**
**स्वात्यां सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकम् ॥** (भर्तृहरिकृतनी.श.3))

**पीलुपत्रफलन्यायः**

पीलुनामकस्य वृक्षस्य पत्राणि कटुरसयुक्तानि भवन्ति परं तस्य फलानि स्वादूनि भवन्ति । एकस्यैव वृक्षस्य पत्राणि एकविधानि फलानि च अपरविधानि इत्येवम् आश्रयसाम्ये सत्यपि फलभेदो भवतीति न्यायस्य भावः ।

**पुराणवैराग्यन्यायः**

पुरा कथानां श्रवणकाले ऐहिकसुखेषु वैराग्यं जायते । जगति सर्वं नश्वरम् इति भावना जागर्ति । परन्तु इयं भावना कियत्कालं यावत् तिष्ठेत्? पुराणकथाश्रवणपर्यन्तमेव खलु । तदनन्तरं पुनः प्रापञ्चिकविषयेषु मोहः भवति । एवं तत्कालिकवैराग्यस्य सूचकोऽयं न्यायः ।

**मार्जारकवलन्यायः**

भोजनसमये यदा सर्वे जनाः पङ्क्तौ उपविश्य एकम् एकम् कवलं मुखे स्थापयन्ति तदा तत्रस्थः मार्जारः तेषां हस्तचालनं दृष्ट्वा अयं जनः मह्यं कवलं दद्यात् इति आशां धारयति । एवं स्वार्थी मनुष्यः सर्वम् अपि स्वानुकूलम् एव पश्यति इति भावः।

यथा- अहो कामी स्वतां पश्यति । अभिज्ञानशाकुन्तले 6 ।

**शीतलाप्रस्तरन्यायः**

प्रस्तरस्य अर्थात् शिलाखण्डस्य प्रयोगः अनेकविधः भवति । केचन प्रस्तरस्य शीतलादेव्याः प्रतीकरूपेण पूजां कुर्वन्ति। केचन सोपानरूपेण उपयोगं कुर्वन्ति । एवम् एव वस्तुनः अनेकविधः प्रयोगः भवति । तत्र तस्य वस्तुनः वैशिष्ट्यं कारणं नास्ति जनानां भावना एव कारणम् इति भावः । (सा. 930)

## स्वाध्यायः

**1. एकवाक्येन उत्तरं लिखत ।**

(1) अक्षिपात्रन्याये अक्षिशब्दस्य कोऽर्थः ?

(2) अतिपरिचयात् किं भवति ?

(3) कौन्तेयः कः आसीत् ?

(4) एक एव जनः भवति तदा सः कीदृशः भवति ?

(5) ऐहिकं सुखं किं भवति ?

**2. यथाविस्तरम् उत्तरं प्रयच्छत ।**

(1) अङ्गारन्यायः कदा प्रयुक्तो भवति ?

(2) अन्धकरदीपिकान्यायस्य कः आशयः ?

(3) कार्य-कारणयोः अभेदः केन न्यायेन कथ्यते ?

(4) विफलश्रमस्य निन्दा केन न्यायेन कृता ?

(5) स्वार्थिमनुष्यस्य का दशा भवति ?

**3. संक्षेपतः परिचयं कारयत ।**

(1) अजागलस्तनन्यायः ।

(2) अतिपरिचयः ।

(3) मन्थनक्रिया ।

(4) पुराणानि ।

**4. न्यायवचनं विवृणुत ।**

(1) अन्धकूपन्यायः ।

(2) कुमारीकङ्कणन्यायः ।

(3) पुराणवैराग्यन्यायः ।

(4) अण्डकुक्कुटीन्यायः ।

**छात्रप्रवृत्तिः**

विविधान् न्यायान् स्मरन्तु ।

**शिक्षकप्रवृत्तिः**

वाग्व्यमवहारे न्यायवाक्यस्य छात्रैः प्रयोगः कारणीयः ॥

• • •